CAṆḌAMĀRUTA MAHĀCĀRYA GRANTHASAṂRAKṢAṆA SAṂSTHĀ

ब्रह्मकैवर्तपुराणान्तर्गतम्

घटिकाचलमाहात्म्यम्

GHAṬIKĀCALAMĀHĀTMYAM



Edited by

Dr. K.K.C.S. Badri Narayanan

Vyakarana Siromani, M.A., M. Phil, B.Ed, Ph.D

&

Dr. K.K.C. Lakshmi Narasimhan

Vyakarana Siromani, M.A., B.Ed, Ph.D

Śrī.U.Ve. K.K.C. Sampathkumāra Doṭṭācārya Svāmin's
91th Janma-nakṣatra Commemoration Volume


श्रीमते रामानुजाय नमः श्रीदाशरथिगुरवे नमः

श्रीश्रीनिवासमहागुरवे नमः

चोलसिंहपुरम्
कोयिल् कन्दाडै चण्डमारुतम्

रामानुजाचार्यः सम्पत्कुमाराचार्यः






अस्मत्परमाचार्यवर्याः अस्मदाचार्यवर्याः






Amṛtaphalavallī (Sudhāvalli)



Brahma-tīrtham



Hanumat-tīrtham
(Cakra-tīrtham)



ஸ்ரீ அம்ருதபலவல்லித் தாயார்

ब्रह्मकैवर्तपुराणान्तर्गतम्

घटिकाचलमाहात्म्यम्

GHAṬIKĀCALAMĀHĀTMYAM

(FROM BRAHMAKAIVARTAPURĀṆA)

Edited by

Dr. K.K.C.S. Badri Narayanan

Vyākaraṇa Śiromaṇi, M.A., M. Phil., B. Ed., Ph. D

&

Dr. K.K.C. Lakshmi Narasimhan

Vyākaraṇa Śiromaṇi, M.A., B. Ed., Ph. D

CAṆḌAMĀRUTA MAHĀCĀRYA
GRANTHASAMṚAKṢAṆA SAMṢTHĀ

16/1, Sannidhi Street, Kuzhippanthandalam
Kancheepuram Dist., Tamil Nadu - 603105

2017

Copyright: Dr. K.K.C. Lakshmi Narasimhan
(Email: kkcln3@gmail.com)

First Edition 2017

250 Copies

All rights reserved. No part of this publication may be reproduced or transmitted on any form or by any means, electronic or mechanical, including photocopying, recording, or any information storage or retrieval system, without prior written permission from the copyright owner, indicated above.

Published by:
Dr. K.K.C. Lakshmi Narasimhan
CAṆḌAMĀRUTA MAHĀCĀRYA GRANTHASAṂRAKṢAṆA SAṂSTHĀ
16/1, Sannidhi Street, Kuzhippanthandalam
Kancheepuram Dist., Tamil Nadu - 603105

Front Cover: Wall painting, Śri Rāmānuja Shrine,
Śri Raṅganāthasvāmi Temple, Srirangam

Printed by:
M/s Flash Offset
111 B, Balaji Garden
Thindal
Erode - 12
email: flashoffset02@gmail.com

DEVOTEDLY OFFERED
TO



AND

ALL OUR PŪRVĀCĀRYAS

PROLOGUE

By the benedictions of our *Ācāryas* and our presiding deity Lord Lakṣmīnarasiṁha, we are proud and happy to bring out, for the first time, the original text of *Ghaṭikācala-māhātmya* in Devanāgarī script. This text was published in Telugu script long back. A brief Telugu translation of this work with the name *'Śrī Ghaṭikācala māhātmyamu'* was published in 1997 by Śrī.M. Narasimhan of Anantapur (Andhra Pradesh), with citations of a few important original passages from the main text. Śrī.U.Ve. K.K.C. Tathacarya Svāmin had brought out a brief Tamil translation of *Ghaṭikācala māhātmya*, probably based on the Telugu book *'Śrī Ghaṭikācala māhātmyamu.'*

The present work *Ghaṭikācala māhātmya* is said to be the part of the *uttara-khaṇḍa* (second half) of *Brahmakaivarta-purāṇa*. The *Brahmakaivarta-purāṇa*, according to historians of Sanskrit literature, is one of the versions of the *Brahmavaivarta-purāṇa*, one of the *Purāṇas* authored by Vedavyāsa.

This is common that every sacred place has a manual *'Sthalapurāṇa'* detailing the pious nature of the temple, sacred-waters, Deities, sages, the special plants/trees etc. This work falls in the category of *Upapurāṇas* and *Sthalapurāṇas* though the contents of the work are not less than the merit of *Mahāpurāṇas* except the length.

In the conversation and dialogues of the ancient religious literature, *Ghaṭikācala māhātmya* is the narration by the sage Parāśara to the sage Bhṛgu. This text glorifies the famous Ghaṭikācala (known as Coḷasiṁhapuram in the later days and Sholinghur in modern times) especially the presiding Deities Śrī Yoganarasiṁha accompanied with His consort Sudhāvalli (Amṛtaphalavalli) as well as Śrī Yoga Āñjaneya, both residing on two different hill-tops, one on the west and another on the east. This holy place is known for a number of sacred water-ponds (*tīrtha*), all of them having both spiritual and medicinal values.

Ghaṭikācala with fourteen peaks was golden in the *Kṛta-yuga* and it is of rocky-hill in the present *Kali-yuga*. The presiding Lord Yoga-

herds and stood there without any other option. A deer in the herd reminded him the nature of a true *Vaisṇavite* and advised him to restrain from hunting. The king realized everything, handed over his kingdom to his son and moved to Jagannātha-kṣetra (modern Puri in Orissa) along with his wife.

Once in his dream, Indradyumna uttered, by mistake, the word Hara (Śiva) instead of Hari (Viṣṇu). Suddenly, he reasiled his presence in the Kailāsa, the abode of Śiva. On his enquiry, Śiva told him that the name Hara brought him there. When Indradyumna requested *Mokṣa*, he was advised to attain *Brahma-tejas* by approaching the Lord Nārāyaṇa. Śiva instructed him, "*Ghaṭikācala* is the sacred place where the Lord Yoga-narasiṁha dwells on the hill-top along with His consort Mahālakṣmī. On the slopes and bottom, a number of sages perform penance to attain *brahma-tejas* and *mokṣa*. You should go there for your benefit". The story goes on further.

The temple of this sacred place Ghaṭikācala, visited by Śrī Rāmānuja, remained closed for a few centuries due to continuous wars and battles in this region. It was renovated by Caṇḍamāruta Mahācārya in the 16^{th} century.

In the text of *Ghaṭikācala-mahātmya*, there are some grammatical peculiarities which are indeed some of the common features of the old literature of the ancient seers. In this regard, when we approached Śrī.U.Ve. Araiyar Śrīrāma Śarmā Svami of Tirunarayanapuram (Melukote), an eminent multi-lingual scholar and one of the authoritative persons of *Śrīvaisṇava-sampradāya*, he has kindly shared his views about this sacred place 'Ghaṭikācala.' One of his astonishing remarkable concepts is: the main hill-top of Ghaṭikācala, surrounded by small hills in inner and outer circles, resembles the Lord Narasiṁha in the form of Gaṇḍaberuṇḍa-Narasiṁha, who has eight heads facing all the eight directions. This concept is perceivable only by the ardent devotees of the Lord. We are grateful to this *Svāmin*.

Our *Ācārya* Śrī.U.Ve. K.K.C. Sampatkumāra Doṭṭācārya Svāmin procured a copy of *Ghaṭikācala-māhātmya* long back but a few pages missing in it. The survey of the manuscript of this work resulted that this is not available in any of the prominent Manuscripts libraries of India except

Oriental Research Institute of Sri Venkateswara University, Tirupati. Fortunately, we could procure the copies of the missing pages from Oriental Research Institute, Mysore. We are thankful to authorities of the Institutes mentioned above.

We are also thankful to Śrī. L.M. Ramakrishnan, the President, Bharathi Vidya Bhavan MHSS, Erode and Smt. Aruna Ramakrishnan, the Vice-President, BVB, Principal Smt. Karthiyayani and Smt. S. Philomina Joseph, former Principal, of the same as well as other members to have permitted to take up this work.

We express our thanks to Śrī. Sridharan, Śrī. Parthasarathy and Smt.V.S. Meera, all PGTs of Sanskrit Department of Bharathi Vidya Bhavan, for their valuable help. Śrī K. Sivakumar, PGT, Tamil Department, Bharathi Vidya Bhavan, deserves special thanks for mending of Tamil translation. We are thankful to M/s Flash Offset, Thindal, Erode to have promptly bringing the out the book with neat printing and good binding.

The Caṇḍamāruta Mahācārya Granthasaṁrakṣaṇa Saṁsthā plans to bring out the translation of *Ghaṭikācala mahātmya* at the earliest with the benevolent grace of our Lord Śrimannārāyaṇa and all our *Pūrvācāryas.*

K.K.C. LAKSHMI NARASIMHAN
General Editor & Publisher
Caṇḍamāruta Mahācārya
Granthasaṁrakṣaṇa Saṁsthā

श्रीः

श्रीमते रामानुजाय नमः

श्री वरवरमुनये नमः

श्री श्रीनिवासमहागुरवे नमः ।

श्री सर्वगुरुभ्यो नमः ।

वाधूलश्रीनिवासार्य तनयं विनयाधिकम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम् ।।

महर्षिवेदव्यासविरचिते

ब्रह्मकैवर्त्तपुराणान्तर्गते

श्रीघटिकाचलमाहात्म्यम्

श्रीमदखण्डभूमण्डलमण्डनायमानचोलसिंहपुरवरनिकटोल्लसद्घटिकाद्रौ कृतावतारस्य प्रह्लादाह्लादनैकहेतोः निजकटाक्षवीक्षणामृतलहरीनिष्यन्दपोप्लूयमान मरालायमानाञ्जनेयस्य भवगतो नृसिंहमूर्तेः माहात्म्यप्रतिपादकः व्यासोक्तब्रह्मकेवर्त्त-महापुराणान्तर्गतद्वाविंशतिसंख्याकाध्यायसम्मितग्रन्थः ।

ध्यानश्लोकः

श्रीवत्साञ्चितवत्समध्यविलसच्छ्रीकौस्तुभोद्यन्मणिः
प्राचीनोक्तिविलासिनीप्रविलसच्छ्रीमन्तमुक्तामणिः ।
शश्वत्सेवकचित्तजाड्यतिमिरप्रच्छेदनद्योमणिः
पायान्नो घटिकाद्रिशेखरमणिस्सङ्कल्पचिन्तामणिः ।।

प्रथमोऽध्यायः

श्री पराशरः -

अथ ते प्रीतमनसस्सनकाद्यास्सुरर्षयः । ऊचुः प्राञ्जलयस्सर्वे ब्रह्माणं ब्रह्मवादिनम् ।। १

ऋषयः -

श्रीमद्वेङ्कटशैलस्य माहात्म्यं वदता त्वया । मध्ये किञ्चिदुपन्यस्तमिन्द्रद्युम्नस्य वैभवम् ।।२

राज्ञस्तस्य महाबाहोः कथं ब्राह्मण्यमागतम् । केन वा तपसा ब्रह्मन् कस्य वाराधनक्रमात् ।।३

निस्संशयं विस्तरेण पृच्छतां वद नो विभो ।

श्री पराशरः -

अस्ति द्विजातिप्रवर इन्द्रद्युम्न इति श्रुतः ।। ४

पूर्वजन्मनि राजाऽभूत् समस्तक्षितिमण्डले । स पूर्वजन्मनि भजन्नृपभावं महर्षयः ।।५

जातमात्राद्विष्णुभक्तश्शंखचक्राङ्कितो युवा । पुरीमावासयामास मधुरां जगतीमवन् ।।६

स वाजिस्यंदनोपेतस्सहामात्यैरनुद्रुतः । भटैश्चाश्वपदालम्बैस्सन्नद्धैरपि खड्गिभिः ।।७

वायुजङ्घमिवं वाजिवरमारुह्य सायुधैः । सोष्णीषैरुद्भटैः कैश्चिदाखेटपथकोविदैः ।।८

अन्यैरपि महामात्यैर्मन्त्रज्ञो वनमभ्यगात् । अटन् मध्येवनं राजा मृगयां नृपसत्तमः ।।९

एकाकी हयमारुह्य सर्वांस्त्यक्त्वा मृगानुगः । मध्ये वनस्य मृगयामटन् हरिणमाययौ ।।१०

तं दृष्ट्वा भूपतिं तत्र सज्यमायतकार्मुकम् । सम्भ्रान्तचेता हरिणो भयाद्दुद्राव वेगतः ।।११

किमेतदिति पश्यन्तस्तद्वनस्था विदूरतः । मृगास्तमेकं ददृशू राजानं पृष्टतोऽपि च ।।१२

अर्धलीढतृणास्तत्र न शेकुरपि भक्षितुम् । विभ्रान्तलोचना राजबाणदर्शनतस्थिताः ।।१३

स राजा संसृतिं वीक्ष्य मृगाणामुचितां तदा । न मोचयितुमारेभे सायकं मृगसत्तमे ।।१४

दययारुद्धवेगं तमवलोक्य मृगागणाः । निजगाद नृपश्रेष्ठं श्रेष्ठं धर्मभृतामपि ।।१५

मृगाः -

जगन्नाथे कृताभक्ती राजा न रचिता विभो। मा मोचय शरं राजन् यदेतद्गतिका वयम् ।।१६

निशम्य तद्वचो राजा जातलज्जो जगत्पतिः। हरौ निविष्टचेतास्तु विज्यं चापमधाकरोत् ।।१७

राजा संसृतिमालोक्य हरिणीनां तथा वने । धिगस्तु राजसु क्षात्रं यतो न करुणी मृगे।।१८

मा स्म भीः क्रियतामस्माज्जनाद्वनपथे मृगाः। भवन्तु सुखिनस्सर्वे त्यक्तोऽयं मृगसत्तमः।।१९

इति रक्षां विरचयन् मृगाणां नृपसत्तमः । कृपावेशङ्गतस्तेषु सन्यवर्तत वाजिना ।।२०
मृगयानिस्पृहो राजा पुरीं स्वामभ्यगाद्वनात् । अनुद्रुतैरनुवृतो मन्त्रिभिर्मन्त्रकोविदः ।।२१
राजानमभितो वीक्ष्य पौरजानपदास्तदा । नीराजनादिकास्तत्र क्रियाः काश्चिद्वितेनिरे ।।२२
इन्द्रद्युम्नो जगन्नाथपादसेवा परायणः । क्षात्रमुत्सादयन् वेगात् घृणां समनुपद्य च ।।२३
कंचित्कालमुषित्वाथ न्यस्तभारस्तनूद्भवे । कलत्रमात्रसहितो हरिद्वारमुपेत्य वै ।।२४
तपसोद्युक्तसन्नाहो हरिभक्तिमविन्दत । तत्र कांश्चिदुषित्वा तु कालान् कंसारिसेवया ।।२५
ततोऽन्यं देशमागत्य जगन्नाथं जगत्पतिः । तत्र चक्रे तपस्तीव्रं जटिलो व्रतसत्तमः ।२६
स तत्र गत्वा यत्रास्ते भगवान् भूतभावनः । कृष्णः कमलपत्राक्षो देवकीनन्दनस्स्वयम् ।।२७
आपदां जीर्णपर्णादामश्मादां च महात्मनाम् । ततो महारथस्तेषामैक्षिष्ट पदमुत्तमम् ।।२८
स्वयं तदा स राजर्षिस्सकलत्रो हरिं भजन् । नान्यचेता नान्यरतो नान्यलोकनतत्परः ।।२९
मुकुन्दभजनव्यग्रः शिवस्मृत्यसहस्सदा । स चिरं दर्भशयनस्सकलत्रो महीपतिः ।।३०
स कदाचन शय्यायां हरिरित्यक्षरद्वयम् । वक्तुकामो जगौ लौल्यात् हर इत्यक्षरद्वयम् ।।३१
यदा प्रामादिकी सैषा हर इत्यक्षरद्वयी । गलिता तं तदा सद्यश्शिवदूतास्सहस्रशः ।३२
विमाने तूत्तमे स्थाप्य निन्युश्शिवपदं परम् । सदा हरस्य विद्वेषात् हरस्मृतिरुपागता ।।३३
इति संजगदुस्तत्र समालोक्य सुरेश्वराः। ततोऽसौ नीतमात्रस्तु स्वप्नोऽयमिति चिन्तयन्।।३४
स्वप्नेऽपि विभ्रमः कस्मादीदृशोऽयमुपस्थितः। यादृशी भावना यत्र स्थितिर्भवति तादृशी ।।३५
इत्येषा वैदिकी मिथ्या पौराणप्रश्रयापि सा । इति संचिन्त्य बहुधा वीक्ष्य विभ्रान्तचेतनः ।।३६
आलुलोके शिवपदं पार्श्वस्थानपि किङ्करान् ।

इन्द्रद्युम्नः -

क्वाहं ज्ञानपरः क्वेमे प्रमथा गणशो गणाः ।।३७
क्व वा संपत्प्रदस्थानं क्व कैवल्यप्रदं पदम्। इति चिन्तयतस्तस्य पार्श्वतो वृषभध्वजः ।।३८
प्रादुरासीत् परञ्ज्योतिः पार्वत्या सह शङ्करः ।

शङ्करः -

साधु साधु महाभाग मद्भक्तस्त्वमनन्यधीः ।।३९
मुदा विरचितं राजन् लाञ्छनं वैष्णवं त्वयि।राजर्षे मा कृथाश्चिन्तामार्जितास्संपदो मया।।४०
किमभीप्सितमस्मत्तः पृच्छतस्ते ददाम्यहम् । तं तथाव्यग्रमनसं तदाकर्ण्य वचस्तथा ।।४१
शङ्करो विस्मयमना इदमूचे महासतिम् । कोऽयं नारायणो देवो मां विना नृपसत्तम ।।४२

मामेव ये प्रपद्यन्ते तेषां नारायणो गतिः । अहमेव परञ्ज्योतिरहमेव महीपते ।।४३
नारायणो जगन्नाथो ब्रह्मा चैवेति गीयते। तद्भक्ता एव मद्भक्तास्तल्लक्ष्म मम लक्षणम्।।४४
इति संचोदितस्तत्र राजा शास्त्रविशारदः । विस्मयं परमं लभ्य प्राह किंचिदुमापतिम् ।।४५

इन्द्रद्युम्नः -

अनादिनिधनोऽनन्तो महर्षिगणसेवितः । ब्रह्मस्वरूपी भगवान् कैवल्यपदनायकः ।। ४६
नारायणो जगद्धाता सर्वेषामन्तरे हि सः। देव किं बहुनोक्तेन भवतोऽपि हृदि स्थितः ।।४७
ब्रह्मणोऽपि तथा वेदैर्गीयते किमु केशवः । तथा च योगिहृद्ध्येयमशेषहृदिवर्तिनम् ।। ४८
कैवल्यदमनादृत्य को भजेदन्यदैवतम् । अनुभुक्तं मयैश्वर्यं पुत्रमित्रकलत्रकम् ।। ४९
इदानीं मुक्तिकामोऽहं तत्प्रदातारमाद्रिये ।

शङ्करः -

तथा यदि तव ब्राह्म्यं तेजश्चेदुपलभ्यते ।।५०
परं पदं महाविष्णोर्नात्रकार्या विचारणा ।

इन्द्रद्युम्नः -

अस्मिंस्तवाञ्जलिरयं ब्राह्म्यं कस्माद्भवेन्मयि ।।५१
केनोपायेन लघुना भविता वैष्णवं पदम् । स लक्ष्मीमिलितोरस्कस्सनकादिनिषेवितः ।
नारायणः प्रसन्नो मे भवेत्तद्वद शङ्कर ।।५२

शङ्करः -

अगण्यकमपुण्यानामृषिणां भावितात्मनाम् । आसीदावासवसुधा श्रीनृसिंहपुरी भुवि।।५३

प्रह्लादैकवरप्रदानरसिकः प्रह्लादनस्सर्वदा
प्रातः फुल्लसरोजकोमलपदश्श्यामोऽरविन्देक्षणः ।
लक्ष्मीलाञ्छितवामवक्षसि चिरं न्यस्ताशयः केशव-
स्तत्रास्ते भगवान्नृसिंह इति विख्यातोऽचलाग्रे पुमान् ।। ५४

यत्रासते महात्मानः ऋषयस्सप्तविश्श्रुताः। घटिकाचल इत्यस्य नाम पौराणिका विदुः ।।५५
तत्रैव रमते साक्षादम्भोजसमवीक्षणः । पद्मयालिङ्गितवपुर्निश्रेयसनिदानभूः ।।५६
इन्द्रादयो लोकपालाः कृष्णद्वैपायनादयः । ऋषयश्च निषेवन्ते प्रतिसन्ध्यामतन्द्रिताः ।।५७
तत्र देवास्सगन्धर्वास्सिद्धाश्च वसवस्तथा । नारायणं नरहरिं निरतं पर्युपासते ।। ५८
पादे तस्य महीन्ध्रस्य ऋषिसंघनिषेविते । तीर्थोत्तमादिसंपूर्णे ममापि रमते मनः ।।५९

यदि कैवल्यपदवी वाञ्छिता नृपसत्तम। यदि ब्राह्म्यं च तेजस्ते तस्मिन्देशे तपः कुरु।।६०

श्री पराशरः -

इतीरितश्शङ्करेण भक्तवात्सल्यशालिना। प्रहर्षमतुलं लेभे प्रथमं नृपसत्तमः ।। ६१

दण्डवत्प्रणिपत्याथ शीघ्रतोषमुमापतिम् । हृदि कृत्वा तदा देशमाजगाम भुवं नृपः।।६२

अथ भुवमवतीर्य राजवर्यस्स च सरसीरुहलोचनासहायः ।

नरहरिपदसेवनं कदा स्यादिति हृदये मतिमाकलय्य हृष्टः ।। ६३

कदा पुनश्शङ्कगदायुधः परस्तथा पुमान् पङ्कजसन्निभेक्षणः ।

पवित्रमूर्तिः परवीरहन्ता कैवल्यदो मे नृहरिस्समेष्यति ।। ६४

इति विरचितचिन्तनः प्रजानामधिपतिरेष महेश्वरप्रसादात् ।

नरहरिमुपसेवितं मुनीन्द्रैरभजदयं घटिचालाधिनाथम् ।। ६५

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये प्रथमोऽध्यायः ।

द्वितीयोध्यायः

श्री पराशरः -

ब्रह्मणो वचनं श्रुत्वा ऋषयो रोमहर्षणम् । विस्मयं परमं तत्र लेभिरे ते परस्परम् ।।१

ऋषयः -

साधु साधु त्वया ब्रह्मन्नानुपूर्व्या महात्मनः । राजर्षेस्तस्य वै तत्वमीरितं विस्मयाकुलम् ।।२

नरसिंहवरात्तस्य ब्राह्मण्यं कथमागतम् । इदानीं श्रोतुमिच्छामो विस्तरेण वद प्रभो।।३

नृसिंहपुरमाहात्म्यं माहात्म्यं घटिकाद्रिणः । कस्मिंस्तीर्थे तपस्तेपे तत्तीर्थस्य च वैभवम् ।।४

आदितो वद नो ब्रह्मन् दैवाद्यत्तदुपस्थितम् ।

ब्रह्मा -

स शङ्करकृतोदेशस्तस्मादेशादपाक्रमात् ।।५

अथापश्यन्नृपश्रेष्ठो हिमवन्तं नगोत्तमम् । तमारोहत एवान्यान् वालखिल्यानपि द्विजान् ।।६

अभक्षान्वायुभक्षांश्च तत्रापश्यन्नृपात्मजः ।

इन्द्रद्युम्नः -

विश्रान्ता इव दृश्यन्ते भवन्तः कामगा इव ।। ७

किं दैवतमुपास्यैवं स्वस्वमाश्रममागताः । प्रतिपाल्य गतिं वोऽहं तिष्ठामि च ऋषीश्वराः ।।८

यूयं वदत तत्वेन पृच्छतः पुरतो मम ।

वालखिल्यादयः ऋषयः -

अस्ति काचिद्भुविश्रेष्ठा नृसिंहस्य पुरी श्रुता ।।९

तत्र देवो नरहरिस्साक्षाल्लोकपितामहः । स वै हिरण्यकशिपुं विनिर्भिद्यासुरोत्तमम् ।।१०

प्रह्लादेन स्तूयमान आस्ते नारायणस्स्वयम्। वयं तस्य गिरेश्शृङ्गमासाद्य सुरसेवितम्।।११

तीर्थे हनुमतस्तत्र स्नात्वा गत्वा नगोत्तमम्। नृहरिं वन्द्य सन्ध्यायामितः प्राप्ता यथागतम्।।१२

श्री पराशरः -

अथायमवनीपालो हर्षगद्गदया गिरा। आभाष्य ऋषिमुख्यांस्तान् दण्डवत्प्रणनाम हि ।।१३

इन्द्रद्युम्नः -

कियद्दूरं नरहरेरद्रिरालक्ष्यते महान् । यत्र यूयं गिरिवरे विष्ठितं परमेश्वरम् ।।१४

स्तुवन्तः पदमर्चन्तः प्राप्नुवन्तः परं प्रियम् ।

श्री पराशरः -

इत्युक्तवन्तस्ते तत्र वालखिल्यादयो नृपम् ।।१५

ऊचुस्तद्वैभवं मार्गमपि पृथ्वीधरस्य वै ।

वालखिल्यादयः ऋषयः -

इतोऽविदूरे धर्मात्मन् श्रीनृसिंहपुराभिधम् ।।१६

पट्टणं पट्टणानां च सत्तमं दृश्यते नृप । इतो हिमवतश्शैलान्नवसाहस्रयोजने ।।१७

पयोष्णी पुण्यविज्ञेया वेगवत्यपराभिधा । तदुत्तरस्य पारस्य परिष्कारवती पुरी ।।१८

नगर्या नैऋतदिशमलङ्कृत्य महीधरः । नरकण्ठीरवस्यैष श्रृङ्गी श्रृङ्गवतां वरः ।।१९

आदृतस्सकलैरेषः पुण्यश्चक्षुष्मतां फलम् । तस्मिन् योगनृसिंहेन्द्रस्वामी विश्वभयापहः।।२०

आस्ते मुमुक्षुभिस्सेव्यो भव्यो लक्ष्मीसहायवान्।गङ्गाञ्च समतिक्रम्य श्रीशैलमचलोत्तमम्।२१

शेषशैलं ततो गत्वा विश त्वं घटिकाचलम् ।

श्री पराशरः -

स राजा तद्वचश्श्रुत्वा ऋषीणां भावितात्मनाम् ।।२२

हस्तामलकवन्मेने कैवल्यपदमुत्तमम् । तत्रोषितो ऋषिगणैस्तां रात्रिं राजसत्तमः ।।२३
प्रभातायां तु शर्वर्यां तैराधिष्टपदेन वै । सह स्त्रिया स राजर्षिर्मध्येवर्त्म निरामयम् ।।२४
मौलिमालां भगवतस्त्रियंबकमहेशितुः। अवगाह्य नदीं गङ्गां कृतमालां सुगन्धिनीम्।।२५
सभार्यस्समतिक्रम्य श्रीशैलं पृष्ठतोऽन्वगात्। ततः पश्चादि्गरेश्शृङ्गमवतीर्य सह स्त्रिया।।२६
ज्वालानृसिंहमानम्य स्तुवन्स्तं कृपयान्वितम् । विनिर्गत्य ततश्शैलाद्धर्षोत्पुल्लतनूरुहः।।२७
समभ्येत्य हि राजर्षिस्स ददर्श शुभङ्करम्। औन्नत्यादधरीकृत्य भानुमत्रविजृम्भितम् ।।२८
अवतीर्णमिवासन्तं स्थितवन्तं नगोत्तमम् । श्रीमन्नारायणपदद्वन्द्वलाञ्छितमस्तकम् ।।२९
शेषशैलं तमभ्येत्य विस्मयं परमाप सः । ततस्तस्य महीभर्तुर्माहात्म्यामृतसागरे।।३०
मज्जतो नान्यथा दृष्टिरासीदव्याकुला तथा। ततो हर्षाश्रुभरितश्शेषशैलमविन्दत ।।३१
अकरोदवगाहं च कपिले तीर्थसत्तमे। शनैरारुह्य शैलेन्द्रं स राजेन्द्रस्सह स्त्रिया ।।३२
पुष्करिण्यम्भसार्द्रस्तु पुमांसं परमं भजन् । ईड्यमानं मुनिवरैर्ब्रह्मेशानेन्द्रवन्दितम् ।।३३
स्तुत्या दिनत्रयं तत्र नीत्वा सद्भिः प्रपूजितः। अवरुह्य गिरेश्शृङ्गादपश्यद्दक्षिणापथे।।३४
तां सुवर्णमुखीं नाम सुवर्णमुखरीं नदीम् । गत्वा स्रोतस्विनीं भूतसेव्यामुत्तरवाहिनीम्।।३५
तत्रावगाह्य शुद्धात्मा सन्ध्यामन्वास्य मध्यमाम्। तस्याः प्रागुत्तरे तीरे वटमेकं ददर्श ह।।३६
शिलाविवरसंभूतमूर्जितं पृथिवीरुहम् । तस्योपरि चिरालम्बिरक्षोयुग्ममदृश्यत ।।३७
पूर्वजन्मकृतैः पापैरेधमानं परस्परम् । सुव्रतानुव्रताभिख्यं द्वन्द्वं विख्यातपौरुषम् ।।३८
पश्यतो राजसिंहस्य तस्मिन्नेव क्षणे जहौ । राक्षसं रूपमत्युग्रं तयोरेकस्तपस्विनोः ।।३९
वैष्णवं रूपमास्थाय पुप्लुवे वियदन्तरे। ततो दृष्ट्वा स राजेन्द्रस्सभार्यस्सपरिच्छदः।।४०
आः किमेतदिति प्राह व्याकुलो भवति स्म ह। अथान्तरिक्षे वागुच्चैराविरासीन्महर्षयः।।४१
कथमस्य नृसिंहस्य वैभवः केन वर्ण्यते । यदस्य पुष्करिण्यम्भःकणसंगेन रक्षसोः ।।४२
अनयोरेकमुन्मुक्तं का कथा गुणवर्णने । इति वाचमुपाशृण्वन्नाश्चर्याकुलचेतनः ।।४३
पार्श्वे स दृष्टवान् दिव्यकन्यकाः अन्यमानसाः।

इन्द्रद्युम्नः -

कन्याः कथयत प्रेम्णा किमेतदनयोः परम्।४४
जातमेकं परं कस्मादेनसो भवनं कृतम् ।
कस्य वा नलिनीतोयराशेश्शीकरवैभवम् ।।४५
कस्माद्बिन्दुस्समपतत् त्वत्तश्श्रोतुं समुत्सहे ।

दिव्यकन्यका: -

अस्ति कश्चिद्विजश्रेष्ठस्तीर्थाचलसमीपतः ।।४६

नाम्ना सोमव्रतो भार्यामनसूयामुपेत्य सः । पुष्करं सौम्यमासाद्य तपस्तेपे सुदारुणम् ।।४७

पुत्रार्थी वैष्णवीं भक्तिमास्थाय द्विजसत्तमः । काले कतिपये जाते सुतद्वयमविन्दत ।।४८

जनिक्षणेन तौ रक्षोरूपौ प्राभवतां विभो ।

इन्द्रद्युम्नः -

जनुषि ब्राह्मणस्याभूद्रक्षोरूप कथं तयोः ।।४९

केन पापेन महता विस्तरान्मे प्रशंसत ।

दिव्यकन्यका: -

पुरास्य दण्डकोद्देशे ब्राह्मणस्य पिताऽभवत् ।।५१

सुतपा इति तस्याख्यां ददुः पूर्वं सुरोत्तमाः। सर्षिसङ्घनिषेव्यस्तु विचचार तपः परम्।।५२

अपूर्वेयमिति व्याख्यामथासह इवातुरः । वैराग्यवशगो रूपं भिक्षुवत्समपद्यत ।।५३

तस्य शुश्रूषते भार्या भिक्षां चैव प्रयच्छति। अङ्गावमर्दनं नित्यं करोति सह याति च।।५४

स तादृग्रूपवांश्चापि भर्ताऽयं काममोहितः । प्रातरुत्थाय सन्ध्यायां भार्यासक्तिमुपेत्य वै।।५५

क्षणादारूढपतितो भिक्षुकर्मबहिष्कृतः । दिनात् कतिपयादूर्ध्वं केनापि विधिना द्विजः ।।५६

त्यक्त्वा सन्यासरूपं तद्वैष्णवं पदमेयिवान्। सा च भार्या वरारोहा प्रासूत सुतमुज्ज्वलम्।।५७

स तु कालेन महता गृहमेध्यनसूयया । तपस्वी नियताहारस्सस्त्रीको गहनं गतः ।।५८

धेनुशैलस्य प्राग्भागे तपोनिष्ठः प्रियानुगः । स कदाचिच्छिलापृष्ठे रक्षोमिथुनमैच्छत ।।५९

तत्क्षणादेव सप्ताश्वं रविं दृष्ट्वा स भार्यया । सुखमावासयाञ्चक्रे पर्वते तादृशे शुभे ।।६०

सा यदास्य वरारोहा संभोगमभिकाङ्क्षति। तदा तदा तया सार्धं राक्षसं भावमिच्छति ।।६१

तद्रूपं ध्यायतस्तस्य सुते रूपं तदाविशत्। पितामहस्य यत्प्रातस्सन्ध्यायां तामसोत्करम् ।।६२

गुणोवतीर्णस्तज्जातस्सुतयोः पापशालिनोः । जन्ममात्रेण पितरं मुक्त्वा सत्वावमर्दिनौ ।।६३

राक्षसौ बलिनौ दृप्तावुपासाते शिलावटम् । जन्मान्तरार्जितेनैष पुण्येन महता विभो ।।६४

विशृष्टरुशिकः पापादूर्वशीशीकरात् पुरा । अथावहित एवासौ सदारस्सादरो नृपः ।।६५

हृष्टचेता इदं वाक्यं कन्यकास्ता जगाद सः ।

इन्द्रद्युम्नः -

आवादीदेतयोरेको वैष्णवं रूपमास्थितः ।।६६

केन पुण्येन कस्माद्वै परः पापमवाप्तवान् । इदन्नो वाञ्छितं कन्या वदतालस्यवर्जिताः ।।६७
दैवादृष्टिपथं याता भवत्यः कार्यवित्तमाः ।

दिव्यकन्यकाः -

राजन् किरातप्रवरौ युवानौ नयकोविदौ ।।६८
पारियात्रगिरौ वासं चक्राते मृगघातिनौ । केनचित् त्वथकालेन चरन्तौ मृगयां वने ।।६९
कञ्चित्तपोधनं सौम्यं सन्यासिनमपश्यताम्। पर्णशालादिकान् सर्वान् रचयन्तौ वनाद्वनम्।।७०
कुर्वाते तस्य शुश्रूषां कैरातं रूपमास्थितौ । ततस्तौ तापसवरमूचतुर्मधुरां गिरम् ।।७१
उपासिनमुपस्थाय हृदिस्थं केशवं विभुम् । किरातावपि तत्स्नेहसंभाषणदयादिकम् ।।७२
अवेत्य गतिमिच्छन्तौ स्वयोग्यं पर्यपृच्छताम् ।

किरातौ -(सुव्रतोऽनुव्रतौ)

स्वामिन् शुश्रूषमाणानां भवन्तं प्रयतात्मनाम् ।।७३
अस्माकं केन विधिना द्विजभावो महामते । आगमिष्यति विश्वज्ञ वद मन्त्रोपदेशतः ।।७४

मस्करि -

किरातवंशौ तौ ज्ञात्वा दुर्मदौ दुरुदाहृतौ । मन्त्रं कमपि संयोज्य व्याजहार महामतिः।।७५
सर्वदा मृग एवाहमित्यमुं मन्त्रमुत्तमम् । जपन्तौ प्रत्यहं लुब्धौ नान्यथाकृतनिश्चयौ ।।७६

दिव्यकन्यकाः-

इत्युक्त्वान्तर्दधे भिक्षुर्वनात्तस्मादतन्द्रितः। तन्नत्वा देवतास्सर्वे साधु साध्वब्रुवन् वचः ।।७७
अदृश्यन्त किरातौ तौ विज्ञाय विधिवत्तथा । मन्त्रं तमेव नियतं जगदु रहसि स्थितौ ।।७८
कस्यचित्त्वथ कालस्य प्रासूयेतां मृगीं तनूम्। आःकिमेतदिति व्यग्रा वनस्था अपि देवताः।।७९
मिथो नभोगता देवा अपि विस्मयमन्वयुः।कदाचिल्लुब्धकश्रेष्ठौ ज्येष्ठा सर्वतपस्विनाम्।।८०
स्वोपदेष्टा यतो योगी तमुद्देशमुपाश्रितौ । यदृच्छया पर्यटन्तौ तौ दृष्ट्वा तपसां निधिः ।।८१
दयालुरन्वमंस्तासौ शिष्यावेताविति स्वयम्।आगच्छन्तं महाभागावित्यामन्त्र्य स योगिराट्।।८२
पस्पृश्य पाणिना देहं पवित्रोदकशालिना । द्वादशाक्षरमन्त्रञ्च मृगयूनोस्तयोरसौ ।।८३
उपादिशद्धर्मपरो मस्करि कृपयान्वितः ।

मस्करि -

सुव्रतानुव्रतौ लुब्धौ ब्राह्मण्यमवलम्बितौ । द्वादशाक्षरयोगेन भवन्तावागमिष्यतः ।।८४

दिव्यकन्यकाः-

निशाम्य स्वोपदेष्टारं निशम्य वचनं तथा । ऊचतुर्लुब्धकश्रेष्ठौ हर्षाविष्टहृदन्तरौ ।।८५

किरातौ -(सुव्रतोऽनुव्रतौ)

स्वामिन् कस्य पदं प्राप्य कर्तव्यो जप उत्तमः। यथा ब्राह्मण्यमस्मासु जायते तन्निवेदय ।।८६

मस्करि -

इतो हि दृश्यते शैलश्श्रीनृसिंहाधिवासितः । हनूमतस्तीर्थवरस्तत्प्राक्सानौ विराजते ।।८७

शीघ्रं गच्छ तमेतद्धि रोचते मम चेतसे । एतस्मिन्नेव ते देवास्सेन्द्रास्साग्निपुरोगमाः ।।८८

अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः । स्नानं कुर्वन्ति नियतं नृसिंहं पर्युपासते ।।८९

भानोरुदयतः पूर्वं यस्स्नानं नियतेन्द्रियः । करोति स विधूतैना वाञ्छितं लभते पुमान्।।९०

युवामपि निराहारौ सर्वस्मिन् प्रियशंसिनौ । उदासीनपरौ तत्र कुरुतं तप उत्तमम् ।।९१

केनचित् त्वथकालेन ब्राह्मण्यमुपलभ्य वै । भवन्तौ परमप्रीतावेष्यतो वैष्णवं पदम् ।।९२

दिव्यकन्यकाः -

इत्याकर्ण्य वचस्तस्य तावुभौ मृगरूपिणौ । महामतिं नमस्कृत्य मनुराजपरौ तदा ।।९३

प्रदक्षणीकृत्य गिरिं घटिकोपपदं परम् । नरसिंहस्य ऋषिभिः पूजितं पुण्यकर्मभिः।।९४

आसाद्य हनुमत्तीर्थं तत्प्राक्सानुविराजितम्। अवगाह्य क्षणात्तत्र जहातुर्हरिणं वपुः ।।९५

मज्जनोत्तरकाले तु आसीदेतां निजं वपुः। तथा संभ्रान्तमनसौ व्यातिष्ठेतां मनूत्तमम् ।।९६

सुव्रतानुव्रतौ लुब्धौ हनुमन्निकटे स्थितौ। शतकृत्वो जपन्तौ तौ मन्त्रराजं महामते ।।९७

आज्ञया स्वगुरोरेव वन्द्य वायुसुतं तथा । प्रस्थितौ पर्णशालायाः करणेऽव्यग्रमानसौ ।।९८

उत्तरं शृङ्गमासाद्य भैरवस्य समीपतः । तदुद्देशे पर्णकुटिं तन्वाते तौ पृथक् पृथक् ।।९९

सिद्ध्यर्थं तदनुव्यग्रौ मस्कराहरणाय वै । शिलापुष्करिणीतीरे वेणुकुञ्जमपश्यताम् ।।१००

मस्कराणां शतं छेत्तुमारभेतामुपावृतौ । वेणुविच्छेदनोद्युक्तौ तौ दृष्ट्वा ऋषिसत्तमः।।१०१

शिलानलिन्या वारुण्यां दिशि द्राविडपोतकः। चुकोप तापसश्रेष्ठस्तपस्वी विप्रशेखरः।।१०२

शशाप च जलं गृह्य कमण्डलुमुखाच्युतम् ।

विप्रशेखरः -

चिराय वर्धिता वंशा उभाभ्यां दारिता यतः।।१०३

तस्मात् सोमव्रताज्जातौ भजतं राक्षसं वपुः।

दिव्यकन्यका: -

इति शापं वितन्वाने विप्रशेखर उज्वले । तयोरेकस्समागत्य जगृहे तत्पदद्वयम् ।।१०५

सुव्रतः -

ब्रह्मंस्त्वया शापितोऽहं कदास्यां शापमोचितः।

दयां विधेहि भद्रं ते मयि सर्वात्मना भवान् ।।१०६

विप्रशेखरः -

केनापि पुण्यभागेन भवन्तौ मृगघातिनौ । हनुमत्सरसि स्नानं भेजाते तीर्थसत्तमे ।।१०७

अतो युवां सन्नधियौ प्रसन्ने सलिलाशये । स्नानतश्शुद्धमनसौ संप्राप्तावीदृशं पदम्।।१०८

तत्रापि त्वं महाज्ञानशाली सर्वप्रियंकरः । कृते युगे तवागामिन्याहरिष्यति मोचनम्।।१०९

फाल्गुनस्यान्तिमे काले स्नातुमप्सरसां गणः। अभ्येष्यति सरस्तीरमूर्वशी चागमिष्यति।।११०

तत्र स्नातोर्वशी केशादाश्यानसमये च्युतः । शीकरश्शीर्षभागे ते मध्येमार्गं पतिष्यति।।१११

तदा मोचनकालस्ते गर्हितायास्तनोरपि । विमुक्तो वैष्णवं रूपमासाद्य भुवि सुव्रत।।११२

पदमेष्यसि पश्चात् त्वं पदमच्युतमव्ययम् ।

इन्द्रद्युम्नः -

किमर्थमितरस्यापि मोचनं नानुपृच्छते ।।११३

सहायोऽपि समानोऽपि सुव्रतोऽनुव्रतस्य वै ।

दिव्यकन्यकाः-

अनुव्रतस्य मुक्त्यर्थमुपायं प्रष्टुचेत्तसि ।।११४

तथोक्त्वान्तर्दधे विप्रस्तत्रैव सरसीतटे । अथ सोमव्रतस्यास्य पुत्रौ जातौ पुराविदौ ।।११५

रक्षोरूपं च विकलं जग्मतुस्तत्क्षणेन तौ । इदमेतद्यथा वृत्तमाख्यातं भद्रमस्तु वः ।।११६

ब्रह्मा -

राजा तद्वचनं श्रुत्वा हर्षनिर्भरमानसः । मुहूर्तं ध्यानमास्थाय व्यातिष्ठत नदी तटे ।।११७

पठति इयममुत्तमेतिहासं रहसि शृणोति पुमान् पुराणसूक्तम् ।

स जगति घटिकाद्रिनाथभूम्ना विधुतकलिः परमेधते चिरायुः ।।११८

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये द्वितीयोध्यायः ।

तृतीयोऽध्यायः

श्री पराशरः -

इत्युक्तवन्तं ब्रह्माणमुपसृत्य सुरर्षयः । हर्षाश्रुसंपरीताक्षा न क्षमन्ते निरीक्षितुम् ।। १

ऋषयः -

ब्रह्मन् कथाकर्णनतो हृष्टा वयमतन्द्रिताः । इन्द्रद्युम्नानुभावस्य श्रवणे जाग्रदाशयाः ।। २

ब्रह्मा -

स राजर्षिवरस्तस्य महानद्यास्तटं गतः । सभार्यो हर्षसंफुल्लनयनो नयकोविदः ।। ३

इदं होवाच भगवान् कन्यकास्ता निरीक्ष्य वै ।

इन्द्रद्युम्नः -

कथं सोमव्रतो विप्रो विमुक्तः पैतृकादृणात् । अन्या वा पुत्रसंपत्तिरासीदस्य प्रसंशत ।।४

दिव्यकन्यकाः -

समाधिर्नाम वैश्योऽसौ ब्राह्मणः पूर्वजन्मनि । पुर्यां माहिष्मतीनाम्न्यां स्ववासमकरोन्नृप ।।५

द्वे भार्ये तस्य वैश्यस्य सुरसा विरसेति च । विरसायां कनिष्ठायां वैरस्यमकरोदयम् ।। ६

यत्र यत्र च स स्नाति तत्र प्रार्थयते नृप। ज्येष्टायामेव मेऽपत्यं स्यादिति प्रार्थयन् स्थितः।।७

कनीयस्यपि भर्तारमनुयाता तपस्विनी । शुश्रूषते भर्त्सितापि कनीया विरसा सदा ।।८

स कदाचिन्नृपश्रेष्ठस्संप्राप्तो घटिकाचलम् । हनुमत्पुष्करिण्यम्भःकणधूतकलिस्तदा ।।९

ततः पश्चादुपारुह्य ववन्दे नृहरीश्वरम् । प्रणामान्ते महावैश्य स्तुवन्नरहरिं हृदि ।। १०

ब्राह्मण्यं प्राप्य तेजस्वी सोमव्रतकृताभिधः । संवन्द्य पुनरुन्मील्यनयने याचते वरम् ।।११

सोमव्रतः -

शिरसा नम्य नृहरिं वाचा सत्वबलेन सः । सुतमेकं कनीयस्यां विरसायामयाचत ।।१२

ततो लब्धवरस्तस्माद्बहिर्निर्गत्य स द्विजः । चिन्तयामास किमिदमाविरासीद्वचो मम।।१३

इति संचिन्त्य विप्रेन्द्र उष्यतां रात्रिमुत्तमाम्। अन्येद्युः प्रातरुत्थाय स्नात्वा पापनिवारिणि।।१४

हनुमत्सन्निधौ स्थित्वा द्विजन्मा स नृपोत्तम। ज्येष्ठायां मम भार्यायामाविरस्तु सुतद्वयम्।।१५

दिव्यकन्यकाः -

वाचमस्य दयां चक्रे तदा द्विजवरो नृप । यस्मात्तु दैवयोगेन तथाविरभवत्तदा ।।१६

तस्याः पुत्रो यवीयस्या देवव्रत इति श्रुतः। यस्य दौहित्र एवासौ ध्रुवो जगति गीयते ।।१७
स तेन पुत्रवान् राजन् लोके विख्यातसात्विकः। नृहरेरनुभावेन ब्राह्म्यं तस्मिन्नभूदिदम्।।१८

ब्रह्मा -

निशम्य तद्वचश्श्राव्यं राजा धर्मभृतां वरः। कन्यास्ता बहु मेनेऽसौ सभार्यो निम्नगापथे।।१९

इन्द्रद्युम्नः -

पुण्यश्लोकवतां पुंसां चरितस्यानुवर्णनात्। आद्यारभ्य वयं हृष्टास्स्वस्ति वोऽस्तु व्रजाम्यहम्।।२०

ब्रह्मा -

ता विसृज्य ततः कन्यास्स राजा सहभार्यया। घटिकाचलमुद्दिश्य प्रययौ दक्षिणां दिशम्।।२१
मार्गमध्ये सुरेशानं व्यालुलोके महारथम् । शतं शतं कुण्डलिनस्तदनुव्रजतो नृपः ।।२२
इन्द्रोऽपि तं महाराजं महाभागं महामतिम् । सभार्यं दृष्टवांस्तत्र धनं निर्धनिको यथा ।।२३
अथाविदूरे मखवान् खस्थ एवाभ्यभाषत ।

इन्द्रः -

राजर्षे भगवंस्तुभ्यमिन्द्रोहमभिवादये ।२४
यतस्ते श्रीनरहरिस्सुप्रसन्नो भविष्यति ।

ब्रह्मा -

इत्युक्तवति देवेन्द्रे स राजर्षिः प्रतापवान् ।।२५
अग्रे सर्वं जगादेदं विष्णुपादनिषेवणम्। बहोः कालान्मया दृष्ट इन्द्रस्त्वं बलिसूदन ।।२६
इतो निषीद भगवन् रसालविटपोत्तमे । तावुभौ नरदेवेन्द्रौ बहुशाखामनुत्तमाम् ।।२७
पुष्पितां काञ्चनमयीं तस्थिवांसौ तलोपरि। तौ काञ्चनमयैः पुष्पैरञ्चितौ रेजतुस्तथा।।२८
स नक्षत्रौ वियद्भागे पुष्पवन्ताविवोदितौ। भुजाद्भुजं पीडयन्तौ तौ मिथो नृसुरोत्तमौ।।२९
हर्षाश्रुवीतनयनाविदमूचतुरेकदा ।

इन्द्रद्युम्नः -

दैवात् प्राप्तो महेन्द्रस्त्वं दिष्ट्यासि प्रापितो नृप ।।३०
इदमेव कृतं पुण्यमयमेव गुणोदयः ।

इन्द्रः -

इदमेव हि सौहार्दमिदं चक्षुस्मतां फलम् ।। ३१
यतो वंशकरस्त्वं हि यतो विष्णुपरायणः ।

ब्रह्मा -

इत्यन्योऽन्यं मुदाविष्टौ शिष्टौ सात्त्विकभावनौ ।।३२

नाटयन्तौ नरसुरौ व्यञ्जनौ तौ निरञ्जनौ । नरदेवर्षभौ तत्र नारायणपरायणौ ।।३३

सुवर्णमुखरीतीरे तूष्णीमास्तां क्षणं विभो । सस्मितालोकनं पूर्वं राजा विबुधशेखरम् ।।३४

प्राह प्रसन्नया वाचा विनयालम्बिचेतनः ।

इन्द्रद्युम्नः -

इदमागमनं तेऽद्य ह्यपूर्वं प्रतिभाति मे ।।३५

शंस श्रीवेङ्कटेशानं प्रस्तोतुं यासि वाथवा। श्रीमद्दक्षिणकैलासमपि वा स्वर्णनिम्नगाम्।।३६

अनुग्रहीतुमस्मान् वा विष्णोराज्ञाप्रचोदितः । इतीरितो देवराजः प्रश्रयावनताननः ।।३७

कृत्वा मनसि विष्णोर्वै शासनं प्राह भूमिपम्। यतो नारायणे देवे भक्तिरव्याहता त्वयि ।।३८

नारायण त्वमेवासि जगतीति विगीयसे । अतो मम महेशानब्रह्मदेवासुरात्मकः ।।३९

श्रीवेङ्कटेशो भगवानवतीर्णस्तवात्मदृक् । कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजः।।४०

स एव भगवान् कृष्णस्तव रूपी जनार्दनः। इत्युक्तो नृपतिश्रेष्ठः किमिति व्याकुलेक्षणः।।४१

पप्रच्छ मघवानन्तमिदमद्भुतभाषिणम् । अदृष्टश्रुतपूर्वं हि भाषितं विबुधोत्तम ।।४२

अन्यादृशी परीभाषा पठिता भवताऽनघ । नृकीटं पुरतः कृत्वा प्रव्याहरसि वासव ।।४३

प्राभवानुगुणं पश्चाद्भणत्वं सर्वभावितम् ।

ब्रह्मा -

इन्द्रद्युम्नस्य विनयं व्याहृतिं निशमय्य सः ।। ४४

उपलाल्य महीपालं प्राह गम्भीरया गिरा। न जानासि महत्कर्म जनस्थाने विसृम्भितम्।।४५

उग्रशासनकर्तॄणां रक्षसां भीमकर्मणाम् ।

इन्द्रद्युम्नः -

क्वायं संरम्भसमये रक्षसां भीमकर्मणाम् ।। ४६

कैषा वावासऽभूत्तेषां कस्माल्लब्धवरास्त्वमी। पीड्यन्ते हि जनास्सर्वे सत्यं शंस बुधोत्तम।।४७

इन्द्रः -

अस्ति कश्चिद्वनोद्देशे कालकेयाधिपो बली । कुम्भोदर इति ख्यातो नरमांसादनो नृप।।४८

स चैकदा जगत्सर्वं पीडयानो महासुरः । ईशानतो लब्धवर ऋषीन्द्रान् भक्षयन्नृप ।।४९

सुरथेन कृताध्यक्षां प्राप्तवान् नृहरेः पुरीम् । ततस्तैरभवद्युद्धमतिप्रबलशत्रुभिः ।।५०

सुरथो निर्जितस्तस्याः पुर्या निष्कासितो नृप। हतकोशो नृपो राज्यात्परिभ्रष्टो हतानुगः।।५१
अमात्यभार्यामात्रेण सहायो वनमभ्यगात् । गते तु तस्मिन् सुरथे राक्षसा बलगर्विताः।।५२
पुरीमावासयाञ्चक्रुस्तत्रत्या अपि बाधिताः । घटिकाचलशृङ्गाणि प्रजा आरुरोहस्तदा ।।५३
मया तत्र गतं दैवात् स्तोतुं नरहरीश्वरम् । पलायमाना बहुशस्तत्र दृष्ट्वा महाप्रजाः ।।५४
तथा प्रजासु निर्व्याजमुत्पन्ना तासु मे घृणा। शृङ्गाग्रे वेष्टितं साक्षाद्द्राक्षं परमं पदम् ।।५५
स्तूयमानं महर्षीन्द्रे नरकण्ठीरवं नृप । दृश्य प्रत्यक्षमुन्निद्रं लीलामानुषविग्रहम् ।।५६
स्तुतिपूर्वं प्रजा रक्ष्या इत्यवोचञ्जनार्दनम् । नरकण्ठीरवो वीक्ष्य मामतिस्निग्धया दृशा।।५७
कालकेया मदोन्मत्ता वराहांश्शूलपाणयः । त इमे राक्षसा गृह्य सुरथं पुरवासिनम् ।।५८
वने विवासयाञ्चक्रुर्बाधयन्तो द्विजर्षभान्। तैस्तु वित्रासिता ह्येता विद्रवन्ति प्रजा विभो।।५९
वरदर्पपरीतास्ते बाधन्ते शूलपाणयः। इत्युक्तवती भूतानामधिपे भूतभावने ।।६०
नृहरौ वचनं चेदमवोचं पृथिवीपते । हतराज्यः कदा राजा सुरथश्च पुरीमिमाम् ।।६१
प्राप्स्यति प्राणिनस्सर्वान् कदा वा पालयिष्यति ।

श्रीभगवानुवाच -

शालिवाहनकाले तु योगनिद्राप्रसादतः ।। ६२
मत्पुरीं पुनरभ्येत्य प्रजा रक्षिष्यते स्वकाः। आगामिन्याञ्च त्रेतायामिन्द्रद्युम्नो महाद्युतिः।।६३
अवतीर्य मदंशांशः पृथिवीं पालयिष्यति । तस्यैषां नगरी वज्रिन् कल्पिता प्रभविष्यति।।६४
आञ्जनेयसहाय्येन तेन भग्नास्स्वयूथपाः । नामशेषः कालकेया गमिष्यन्ति यमक्षयम् ।।६५
ब्राह्मण्यमर्थ्यमानाय तस्मै दास्याम्यनन्तरम् । ततश्चक्राङ्कितो विप्रो वैष्णवं रूपमेष्यति।।६६
इतीरयति राजेन्द्र घटिकाद्रिनिवासिनि । मुहूर्तमवसंस्तत्र प्रजाः पश्यंस्ततस्ततः ।।६७
भगवानपि विश्वात्मा तत्रैवान्तरधीयत । अन्तर्धानंगते विष्णावागमं मत्पुरीं नृप ।।६८
इदानीं मामनुप्राप्तो नारदः श्रुतिगोचरः । शम्भोरनुज्ञया वज्रिन्निन्द्रद्युम्नः प्रतापवान् ।।६९
घटिकाचलनिष्ट्यूतमभिष्टोतुमना नृपः । मध्येमार्गमवातिष्टदिति होवाच वैणिकः ।।७०
अहं तद्वचनात् सर्वानामन्त्र्य दिविषद्गणान् । अनुज्ञया च नृहरेस्त्वामद्राक्षं कथञ्चन ।।७१
कालकेया वराद्धृष्टा बाधन्ते पृथिवीमिमाम् । विशिष्य नरसिंहस्य पुरीं तापसशालिनीम्।।७२
त्वमग्रयायी नृपते चक्रमेव हनिष्यति । सहायो यस्य भगवान् हनूमान् हरियूथपः ।।७३
तस्य किं न भवेन्नाम जगत्यामभिलाषितम् । चक्रञ्च तस्मै दत्तञ्चेद्धरिणा पापहारिणा।।७४
तथा शिलावटे दीप्ते मरुतामेलनायितम्। बहुना किं मयोक्तेन ऋषीणां भावितात्मनाम् ।।७५

सर्वेषां दीनमनसां भागधेयायितं त्वया ।

ब्रह्मा -

इत्युक्तवति देवेन्द्रे मुहूर्तं प्रस्थितो नृपः ।।७६

उवाच हृष्टरोमा वै राजा तममृताशिनम् । विधूय सात्त्विकीं रीतिं राजसीं प्रतिपाद्य सः।।७७

क्रोधसंरक्तनयनो युगान्ताग्निरिवोत्थितः।

इन्द्रद्युम्नः -

अद्य को वा ऋषिगणान् विष्णुभक्तान् प्रबाधते ।।७८

अत्र मां विष्ठितं लोके न जानाति स दुर्मदः। अद्य मत्कोपदीप्ताग्नौ शालभ्यमुपलभ्य वै।।७९

पश्चाद्यमस्य सदनं दुर्मदस्समुपेष्यति । त्रिषु लोकेषु कोपो मे क्रोधमाहरयिष्यति ।।८०

भुवने जयमाकाङ्क्षी को मे कुर्याद्व्यतिक्रमम्।अद्य मद्बाणविद्धानां रक्षसां बलशालिनाम्।।८१

सविधे गृध्रराजानां बृन्दं बृन्दं पतिष्यति । विष्णुभक्तिकृतालम्बान्नृषीन्द्रान् पीडयन्ति वै ।।८२

राक्षसा इति विश्राव्य तिष्ठते मादृशः कथम् ।

ब्रह्मा -

इति सामर्षमुत्थाय वर्धमानस्य भूपतेः ।। ८३

वज्राद्वज्रं समुत्पाद्य मघवान् दत्तवान् करे । रथं रथाद्विनिष्कृष्य शस्त्रमादाच्च वासवः ।।८४

इन्द्राद्या लोकपालास्ते स्वं स्वमंशं ददुः पुनः। अस्त्रं च दत्तवन्तस्ते यातुधानजिगीषवः ।।८५

रत्नाकरो रत्नमालामुरोलङ्कारिणीमदात् । मारुतो दत्तवान् वेगं धर्मराडतनोद्ध्वजम् ।।८६

सारथिं सारथेस्स्वीयादुत्पाद्यादादिनाधिपः। अंशोरंशं समुत्पाद्य वाजिभ्यो वाजनश्च सः ।।८७

दैवतानुज्ञया राजा द्विगुणीकृतविक्रमः । प्राक्रमद्रथमास्थाय सभार्यस्सपरिच्छदः ।।८८

दत्वा तस्मै स देवेन्द्रस्तूणमक्षयसायकम् । यथागतं सहामात्यस्सदेवैरभ्ययात् तथा ।।८९

युद्धाभिकाङ्क्षी कुशली तयोराजपलाशिनोः । निष्क्रम्य स्वपुरादिन्द्रस्सानुगस्सपरिच्छदः।।९०

अन्तरिक्षपथे तिष्ठन् सम्भ्रम्भं भाविनं प्रति । अथ क्रुद्धो जगन्नेता राजा स मुनिसत्तमः ।। ९१

चतुरङ्गबलोपेतः क इमे राक्षसा इति । तृणीकृत्य परान् सर्वान्हरेः पुरमेयिवान् ।।९२

चेतः पथे दृढयति स्म ततो नृपालः श्रीमत् तदेव घटिकाचलवासिदैवम् ।

युद्धाभिकाङ्क्षिभिरनुक्षणमीक्ष्यमाणः कुन्तासिपट्टसधरैरनुयायिवर्गैः ।। ९३

परबलकृतमर्मचिन्तचेताः परिणतसङ्गरमर्मणि प्रवीणः ।

परिचितधनुश्शरागमावलिः परिसरमद्रिवरस्य सोऽवतीर्णः ।। ९४

अवतीर्णः पुराभ्यर्णे प्रतिवादिभयङ्करैः । ज्यास्वनैः पूरयामास दिङ्मण्डलमतो नृपः ।।९५
प्रत्यग्रशस्त्वपरवेदिषु राजसु द्राक्पूर्णास्त्रवित् सुगणितस्स पुराणवेत्ता ।
शास्ता रिपोर्नृहरिपादसरोजलग्नचेता व्यजृम्भत रणाङ्कणलालनीयः ।। ९६

ब्रह्मा -

प्रवर्तमाने राजेन्द्रे शत्रवो रोषविह्वलाः । वव्रुरागान्मिथो भूपं शलभा इव पावकम् ।। ९७

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये तृतीयोऽध्यायः ।।

चतुर्थोऽध्यायः

श्रीपराशरः -

ऋषयस्ते महात्मानमपदानप्रशंसिनम् । प्रशशंसुश्च ब्रह्माणं कथाश्रवणलालसाः ।।१

ऋषयः -

ब्रह्मन्नवहिता यस्मात् पुण्यश्लोकश्रवे वयम् । अतो मुखैश्चतुर्भिस्त्वं वद तद्रणवैभवम् ।।२

ब्रह्मा -

स्वनितमवनिशम्य चापकोत्थं चकितमतिः पललाशिसार्वभौमः ।
तदनु तदनुशासनाय भृत्यौ खरमुखदुर्मुखनायकौ व्यनैषीत् ।।३
हाः किमेतदिति क्रोधादाभाष्य स महाशरः । प्रेषयन् ज्ञप्तये चाशा विज्वरः प्रबभूव ह ।।४
तौ भृत्यौ स्वामिकार्यार्थे चोदितौ ब्रह्मघातिनौ । अभ्याशन्नृपतेस्तस्य प्रापतू राक्षसाधमौ ।।५
अभ्येत्य वाहिनीं सर्वां वाहिनीमिव गर्जतीम्। आलोकयामासतुस्तौ राक्षसौ कामरूपिणौ।।६
आलोक्य पुनरभ्येत्य राजानमिदमूचतुः ।

भृत्यौ -(दुर्मुख-खरमुखौ)

स्वामिन्नास्ते शिलापृष्ठे कस्मिंश्चित् स नरर्षभः ।। ७
अधीश्वरो मानुषाणां साक्षाद्विष्णुरिवापरः । तुरङ्गमाश्च शतशो द्विपेन्द्राश्च सहस्रशः ।। ८
सन्नद्धाश्च रथाः केचिदासते तत्र तत्पदे । दशनागबलाः केचित् केचित् सिंहपराक्रमाः।।९
तस्यानुगाः परार्था वै वराहाभरणान्विताः । सायुधास्सपरीवाहा अनुरूपाः परस्परम् ।।१०

परस्सहस्रमुदिता युवानः खड्गपाणयः । सड्गराजिनसन्नद्धास्सवर्माणस्सपट्टसाः ।।११
दृष्टिविक्षेपमात्रेण निर्दहन्ते परानिमान् । इतोऽर्धयोजनपथे तिष्ठते सपरिच्छदः ।।१२
युद्धरङ्गाभिमत्तोऽसौ काङ्क्षते भवदागमम् । शंसतोरेवमीशानो रक्षसां बलगर्वितः ।।१३
भर्त्सनं व्याकरोदेष तयोररिशुभं श्रुतः ।

कुम्भोदरः -

हे दुर्मुख मया को वा युद्ध्येत त्रिजगत् स्थले ।।१४
मनुष्यमात्रे किं वा त्वमारोपयसि तद्गुणम् । दत्ता हि शम्भुना मह्यं देवताभिरवध्यता ।।१५
नृकीटो दुर्बलः क्षीणः कथं युद्धे जयिष्यति । इत्युक्तवति यातूनावधीशे शत्रुजेतरि ।।१६
क्रुद्धस्वामिनमुद्वीक्ष्य अपसर्पत दुर्मुखः । खरवक्त्रस्तु दुष्टात्मा इदं होवाच स्वामिनम्।।१७

खरमुखः -

ऐरावतं समानीतं गजरत्नं मनोहरम् । अश्वरत्नं च तरवस्सन्तानाद्याहृतास्तथा ।।१८
स्त्रीरत्नं तस्य नृपतेस्सहास्ते राक्षसेश्वर। तं वधित्वा प्रयत्नेन तां स्त्रियं प्राप्स्यते भवान्।।१९
अथवा तमविज्ञाय स्त्रीरत्नं लाघवाद्धर। स हीनः कान्तया राजा प्राणांस्त्यक्ष्यति कानने।।२०
इति शंसतमत्यन्तमुद्धतं निजसेविनम् । राक्षसः कृपयाविष्टः पश्यन् वचनमब्रवीत् ।।२१

कुम्भोदरः -

साधूदितं त्वया वत्स नृशंस गुणशालिना । छद्मना व्याहृतं सर्वं दशास्येन यथा मया।।२२
इदानीं तं रणे हत्वा सामात्यं सपरिच्छदम्। ततो हरिष्ये सुश्रोणिं तस्य राज्ञस्तपस्विनीम्।।२३

ब्रह्मा -

इतीरयन् क्रोधवशंगतोऽस्तौ पार्श्वे महामात्यसुतान् समीक्ष्य ।
सहायक्लृप्तान् हयसादियुक्तान् रक्षोधिपो युद्धपदाभिलाषी ।। २४
हेऽमात्यतनया यूयं सन्नद्धा भवताहवे । तं विजित्य वरारोहां समाहरत शीघ्रतः ।।२५
शासनं भर्तुरालभ्य शश्वदाहवलालसाः । सोत्साहं प्रणमन्तस्ते भर्तारमिदमब्रुवन् ।।२६

अमात्यपुत्राः

अत्रैवावस्थितस्स्वामिन् विजयं त्वमुपेष्यसि। गत्वा तस्य वरारोहामाहरिष्यामहे वयम्।।२७

ब्रह्मा -

इत्यमात्यतनूजास्ते वहन्तो भर्तृशासनम् । रथानारुरुहुश्शीघ्रं खरवाजिनियोजितान् ।।२८
स्यन्दनाग्रे तु तेषां वै श्येनाश्शतसहस्रशः। स्वैरमारुरुहुः केचित् कुर्वते च परिभ्रमम्।।२९

रथानां परितो वृष्टिं पांसुरूपां पयोमुचः । अवर्षन्त तथा तेषां प्रथमं भयशंसनः ।।३०
जञ्झावातस्य निर्घोषो वज्रस्य च महर्षयः । पपात च पुरो भागे तेषां मन्त्रितनूभुवाम्।।३१
ततस्ते तानवज्ञाय उत्पातान् मन्त्रिणस्सुताः । नगर्या निर्ययुस्तस्य त्रिभागबलसंवृताः।।३२
अथ रक्षोमन्त्रिसुतान् समराजिरधिष्ठितान्। अवलोक्य महीपालो जहर्ष च ननाद च।।३३
नानद्यमाने भूपाले समराङ्गणसीमनि । क्रोधमाहारयामासुरट्टहासं च ते सुताः ।।३४
ते क्रोधवशमापन्ना युगपन्नृपतिं तथा । आवव्रुरभितस्तस्य रथपृष्ठमसृक्प्रभाः ।।३५
तेषामुज्जृम्भणं दृष्ट्वा राजा रोषवशानुगः। मण्डलीकृतचापस्तु ज्यारवैस्तानपूरयत् ।।३६
तस्य ज्याशब्दमसहा रथानुन्मुच्य वाजिनः। दिशो दश पलायन्तो नाद्यापि स्वास्थ्यमासते।।३७
शस्त्राणि जगतुस्तेषां पाणिभागात् तरस्विनाम्। बधिरा इव रक्षांसि ते मुहूर्तं चकम्पिरे।।३८
क्षणात् प्रबुद्धमनसस्सचिवात्मभुवस्तदा । गृहीतकार्मुकाश्चान्यान् वाजिनो युयुजू रथे ।।३९
एकं ललाटे द्वे शीर्षे त्रीणि कण्ठे रथोरसि। चतुरो भुजयोश्चैते मुमुचुस्सायकान् शितान्।।४०
विमुच्य शरवर्षाणि तदा ते मन्त्रिणस्सुताः । अट्टहासं प्रकुर्वन्तः समरे रोमहर्षणम् ।।४१
विजयी भविता स्वामीत्युच्चैर्व्याजहुराहवे। तान् मन्त्रिसुतनिर्मुक्तैश्शीघ्रगैः कङ्कपत्रिभिः।।४२
रूषितोऽव्यलसद्राजा जातपत्र इव द्रुमः । स राजा समरश्लाघी ताननादृत्य वेगतः ।।४३
प्रहर्तुमेकं जग्राह शस्त्रं मन्त्रिसुतान् प्रति। उद्दिश्य केतूनुद्ग्रीवान् हयान् सारथिनस्तथा।।४४
मुच्यमानाश्शरास्तेन शिताग्रा गगनान्तरे । रेजिरे राहव इवच्छादयन्तो रिपूदयम् ।।४५
ततस्ते मन्त्रितनया वीक्ष्य वेगवतश्शरान् । दुर्निवारान् शरैस्तीक्ष्णैर्नालं वारयितुं तदा।।४६
न तत्र वाजिनस्संख्ये रथिनो नैव केतवः । न मन्त्रितनया नापि भटा ददृशिरे तथा ।।४७
केवलं ददृशे युद्धमूर्धनि व्यग्रचेतसाम् । व्यूहेऽमात्यभुवां तत्र कङ्कगोमायुलुण्ठिताः।।४८
एतस्मिन्नन्तरे देवास्सर्षिसङ्घास्सचारणाः। पुष्पवृष्टिं प्रमुच्यन्तस्साधु साध्विति सञ्जगुः।।४९
अथ तान् सङ्गरे दृष्ट्वा यमक्षयमुपेयुषः। पुनर्युद्धाभिकाङ्क्षी स युगान्तानलसन्निभः।।५०
खाच्च्युतैः प्रसवै राजा रञ्जितो व्यरुचत्तदा । नक्षत्रमालाभरणस्सुमेरुरिव मूर्तिमान् ।।५१
आलस्यमस्य नैवासीद्युद्धरङ्गे महात्मनः । विष्णोरंशावतारस्य नाभदज्जडिमा हृदि ।।५२
पुष्पराशिंस्यन्दमानमरन्दरसरूषितः । इन्द्रद्युम्नो जहौ जाड्यं स तदा रणमूर्धनि ।।५३
युगावसानसमये शूलपाणिरिव स्थितः । तदन्तरे नालमासन् भूतानि द्रष्टुमाहवे ।।५४
अवशिष्टास्तु क्रव्यादास्तद्दयामोचितास्तदा । राजानमब्रुवन्नेवं सप्त मन्त्रिसुता हताः ।।५५
श्रवणकटुवचस्तदा निशम्य स्वकसचिवात्मजलोपभावलक्ष्यम् ।

हृदयविकलकर्तरिप्रधीरस्सदसि चुकोप स रक्षसामधीशः ।।५६
स मुहूर्तमिव स्थित्वा तूर्ष्णी सर्व इव श्वसन्। उद्यम्य भुजमुद्ग्रीवो वचनं चेदमब्रवीत् ।।५७
हे महामात्य तेजस्विन्नितो यामि समिद्भुवम्। क्षणेन हत्वा तं पापमानये तस्य भामिनीम्।।५८
यातुद्वहमिति व्यक्तमुक्तवन्तमुदारधीः । महामात्यस्सदोमध्ये वारयन्निदमब्रवीत् ।।५९
अस्यताम्भवतात्रैव स्वामिन् तव बलान्वितः। अहमेको गमिष्यामि वारयिष्ये द्विषद्बलम्।।६०
इति गदितवतीह मन्त्रिवर्ये त्रिदशपतेरिपुरेष राक्षसेन्द्रः ।
धृतकनककृते नवाङ्गदे द्वे श्रवणविभूषणमप्यदादमुष्मै ।। ६१
कुण्डलद्वयमृष्टोरुश्रवणो मन्त्रिसत्तमः । पुष्पवद्भ्यामिवाकाशो विरराज रथोत्तमे ।।६२

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये चतुर्थोऽध्यायः ।।

पञ्चमोऽध्यायः

श्रीपराशरः -

पदे पदे मृतस्यन्दि मनोहरमनुत्तमम् । इति ब्रुवाणं ब्रह्माणमब्रुवनृषयस्तथा ।। १

ऋषयः -

ब्रह्मन् हनुमतश्चक्रं कदा वा समराङ्गणे । भुजद्वयं च पूर्वस्माद्दत्तमित्रानुजन्मना ।। २
नृहरेरस्य सन्तोषस्तस्मिन्नाविरभूत् कथम् । सर्वं नो वदतां श्रेष्ठ विस्तरेण प्रशंस वै।।३

ब्रह्मा -

रक्षसां कालकेयानां तस्मिन्नेव महारणे । जयाय नृपतेरिन्द्रो ह्यस्तौषीन्नृहरीश्वरम् ।।४

इन्द्रः -

प्रसीद जगतां नाथ भगवन्नृहरे हरे । परिपालय सर्वज्ञ परिपन्थिकुलं जहि ।।५
धर्मार्थकाममोक्षाणां प्रदाता भगवान् भवान्।त्वं यज्ञस्त्वं वषट्कारः त्वं ब्रह्मा त्वं प्रजापतिः।।६
त्वं वेद्यो वेदविद्भिस्त्वमोंकारस्त्वमसीश्वर। सृष्टिस्थितिलयादीनि कृत्यानि भवति प्रभो।।७
स्थितिभाञ्जीति विद्वांसो ब्रुवन्ति ब्रह्मवादिनः। त्वं तेजस्वी त्वमोजस्वी त्वं वर्चस्वी त्वमीशिता ।।८
षण्णामपि रिपूणां त्वमूर्मिणामपि बोधकः। कल्पादौ योगनृहरे पाल्यन्ते भवता प्रजाः ।।९
तदन्ते रुद्ररूपेण संह्रियन्ते प्रजास्तथा । सृज्यन्ते ब्रह्मरूपेण पुनश्च जगदीश्वर ।।१०

यच्च त्रिष्वपि वेदेषु एक एव हि गीयते । स त्वं प्रसन्नो देवेश पाहि भक्तानतन्द्रितः।।११
स त्वं तत्त्वमसि व्यक्तोऽव्यक्तातीतस्त्वमेव हि । यज्ञगोप्ता यज्ञवेत्ता यज्ञकर्ता त्रयीमयः।।१२
त्वमेव विश्वं बहुधा जातं यज्ञाय ते च यत्। जायमानं च सर्वं यत् त्वं तत्कर्तासि केशव।।१३
सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात्। स भूमिं विश्वतो वृत्वा ह्यत्यतिष्ठद्दशाङ्गुलम्।।१४
पुरुष एवेदगँ सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्येनातिरोहति ।।१५
व्यक्ताव्यक्तगिरस्सर्वा वेदाद्या व्याहरन्ति यम्। सतां सर्वप्रदस्सत्यं प्रत्यग्दृष्टिभिरीड्यते ।।१६
पृथिव्यादीनि भूतानि स्थावराणि चराणि च । त्वदेकवशगानीति व्याहरन्ति मनीषिणः ।।१७
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ।।१८
त्वामामनन्ति बहुधा भगवन्तमनामयम् । दैत्यराजं विनिर्भिद्य हिरण्यकशिपुं पुरा ।।१९
प्रह्लादं ह्लादयन् देव योगभावं समास्थितः। सर्वेषां कर्मणां देव भुवि व्याकुर्वतां जनैः।।२०
पर्वताग्रमधिष्ठाय पश्यसि त्वमनाकुलः ।

ब्रह्मा - एवं हि स्तूयमानस्तु देवेन्द्रेण विपश्चिता ।।२१
मित्रतां सर्वदेवानां व्याजहार जनार्दनः । उदयन्नेव भगवान् सनकादिनिषेवितः ।२२
स पूरयन्नंशुजालैरिन्दीवरपरम्पराम् । इन्द्रस्तुतिपराधीन इन्दीवरविलोचनः ।।२३
नरकण्ठीरवो योगी तमिन्द्रमिदमब्रवीत् ।

श्रीभगवान् -

आगमो ज्ञातपूर्वस्ते निखिलामरनायक ।२४
किमत्र करणीयानि मम शंस रिपून् प्रति ।

ब्रह्मा -

इत्युपश्लोकितो राजा देवानामरिसूदनः ।।२५
प्राह प्रसन्नगम्भीरगीर्भिस्स नृहरीश्वरम् ।

इन्द्रः -

सहायमिन्द्रद्युम्नस्य केनचित् कल्प्यतामिह ।।२६
निमित्तमात्रभूतोऽयं राजा किन्नु जनार्दनः ।

ब्रह्मा -

इति संबोधितो देवो नृहरिश्चिन्तयन् क्षणम् ।।२७
पुरोभागे हनूमन्तं तिष्ठन्तं संददर्श ह ।

श्रीभगवान् -

प्रसन्नोऽहं वरं दातुमागतस्तेऽञ्जनासुत ।।२८

कृतं त्वया महत्कर्म ह्यवतारान्तरे पुरा । सर्वदा त्वत्सहायेऽहं रणकर्मणि कीर्तिमान् ।।२९

प्रतिकल्पं च भविता दशकन्धरकर्म तत् । इति विज्ञाय च पुनरवतीर्णस्वरूपधृत् ।।३०

अतो हनूमान् रुद्राणामवतारस्त्वया कृतः । प्रार्थितो दैवतैरेभी रणकर्मणि सर्वदा ।।३१

इदानीं ते वरं दातुमागतो भद्रमस्तु ते । हनुमन् मा कृथाश्चिन्तां वरं वरय सुव्रत ।।३२

ब्रह्मा -

तमाकर्ण्य तदा वाचं हनूमान् प्रश्रिताञ्जलिः । वरयामास नृहरेर्वरं परिषदन्तरे ।।३३

श्री हनुमान् -

भगवन्नृहरे मूर्ध्नि सर्वदा पदलाञ्छितः। तथापि शङ्खचक्राङ्कमभिवाञ्छामि शास्वतम्।।३४

एष मे प्रथमःकामः एष मे पुण्यसञ्चयः। इदमेव चिरादभाव्यं सत्यं तदिदमीरये ।।३५

ब्रह्मा -

तथास्त्विति प्रतिज्ञाय तस्मै दत्वा भुजद्वयम्।शङ्खं शङ्खाद्विनिष्कृष्य चक्रञ्चक्राच्च केशवः।३६

इदं होवाच नृहरिर्हनूमन्तमुपस्थितम् ।

श्रीभगवान् -

कर्मवृत्तं महत् तत्र पुरतो द्रोहिणामिह ।।३७

रक्षसां कालकेयानां वधार्थं यत्नमास्थितः । इन्द्रद्युम्नो महाराजो हनूमन्तिष्ठते बली।।३८

बहोः कालात्तपस्तप्त्वा स राजा सह भार्यया। ब्राह्म्यं लब्धुं महत्तेजो मदभ्याशमुपागतः।।३९

स दृष्टो मत्पुरं भग्नं तैर्नृशंसैर्दुरात्मभिः। योद्धुकामो बली दुष्टैः प्रस्थितः पावनो नृपः।।४०

सहायं तस्य कुरु वै त्वत्सहायो जयिष्यति। तस्मिन् राजनिमित्तेऽद्य वर्तते पवनात्मज ।।४१

श्रूयन्ते क्रोशतां तेषां रक्षसां कूटयोधिनाम्। भेरीशङ्खमृदङ्गानामतिनादा भयङ्कराः।।४२

शीघ्रं गच्छ सुदुर्धर्षा वारयाशरपुङ्गवान् ।

ब्रह्मा -

शिरस्याञ्जलिमादाय शङ्खचक्राङ्कितो बली।।४३

निष्क्रम्य स गिरेशृङ्गमुत्तरं समुपस्थितः। भगवानपि विश्वात्मा प्रीणयन् सर्वदेवताः ।।४४

सनकाद्यैस्स्तूयमानस्तत्रैवान्तरधीयत । इन्द्राद्या अपि ते देवाः प्रणम्य पुरुषोत्तमम् ।।४५

युद्धावलोकनपराः प्राक्रमन्त नभस्थलम् । एतस्मिन्नन्तरे वायोस्तनयस्तस्य शृङ्गतः ।।४६

उत्थाय चक्रमुद्यम्य जगर्ज स महाबलः। शङ्खं च दध्मौ रभसात् स्थापितं वदनान्तरे।।४७
प्रध्मातशङ्खं तन्दृष्ट्वा कालकेयास्सहस्रशः। मुसलान् पट्टसान् गृह्य रुरुधू रणचत्वरे ।।४८
ततो हनूमान् संरब्धो ध्मातशङ्खो महाजवः । तेषां रथानामुपरि निपपात रुषान्वितः ।।४९
तेषामुपरि क्रुद्धस्य पतनात्ते हनूमतः । ऊरुवेगेन महता पतिताः पृथिवीतले ।।५०
कतिचिच्छङ्खशब्देन कतिचिद्दर्शनक्षणात्। निपेतुरवनीपृष्ठे गृध्राणामुपरीकृताः ।।५१
ततो दृष्ट्वा हनूमन्तं सानुमन्तमिव स्थितम् । प्रतिसूर्यमिवाकाशे देवता हर्षनिर्भराः ।।५२
जयी भवेति वाचं वै वदन्तः खास्थितास्सुराः । पुष्पवृष्टिं प्रमुमुचुर्दुन्दुभिध्वानबृंहिताम् ।।५३
अथो हनूमान् हृष्टात्मा पुष्पभारावपीडितः । वीक्ष्यमाणो जनैस्सर्वैस्सुपुष्पित इव द्रुमः।।५३
पवनजवनभाजनो हनूमान् प्रतिनृहरीन्द्रशिलोच्चयस्तनूमान् ।
समरभुवि विजृम्भमाणकर्मा परिणतदिक्करटीप्रभावमाप ।। ५४
स रामदूतेन तदा मरुद्भुवा प्रसह्य रक्षोबलविप्रमाथिना ।
महारथस्सज्यधनूरुमापते रुद्रस्य नन्दीभगवानिव स्थितः ।। ५५

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये पञ्चमोऽध्यायः ।।

षष्ठोऽध्यायः

श्रीपराशरः -

ऋषयस्तु प्रहृष्टास्ते पवनात्मजवैभवम् । आकर्णयन्तो धातारमिदमूचुरतन्द्रिताः ।। १

ऋषयः -

स्वामिन् हनुमतस्तस्य तपस्थानमनन्तरम्। अवोचस्त्वमिदानीं नो रोचते सङ्गरश्च सः।।२

ब्रह्मा -

संहर्तारमशेषाणां क्रव्यादानां दुरात्मनाम् । अपाङ्गयन् हनूमन्तं राजा स मुमुचे तदा।। ३
तथाविधं च नासीरं प्रहर्तरि हनूमति । पदे पदे वर्धमानं हर्षो राजा व्यजृम्भत ।। ४
अहो वीर्यमहो धैर्यमहो बहुपराक्रमः । दर्श हन्तुं प्रवृत्तस्य रुद्रस्येव प्रदृश्यते ।। ५
इति सञ्जगतुस्सर्वे सामरास्समरुद्गणाः । ऋषयोऽन्योऽन्यमिलिता दिवि संगरदर्शिनः ।।६

अत्रान्तरे महेन्द्रस्य भेरीशब्दमसासहः । केचिद्दुन्दुभिमाघ्नन्तो निर्ययुस्त्रिदशारयः ।।७
इन्द्रद्युम्नो विजयतामिति होवाच देवराट् । कुम्भोदरो विजयतामिति होवाच दैत्यराट् ।। ८
इति तत्र दिविस्थाने कलहोऽभूत् परस्परम्। जायमाने तु कलहे सुराणां च सुरद्रुहाम्।। ९
हाहाकारमकुर्वन्त ऋषयो रोमहर्षणम् । पर्याकुलमुपाश्रित्य देवासुरबलं तथा ।।१०
प्राद्रवद्धनूमान् यत्र वज्रहस्तः पुरन्दरः । हुंकारेण च तान् सर्वानधःकृत्य स मारुतिः ।।११
पुनरभ्यागतः क्षिप्रमिन्द्रस्तुत्युपलक्षितः । तादृग्विधं कर्म वायोरपि वा तत्तनूभुवः ।। १२
अथवा नन्दिनस्साक्षादिति भूतानि मेनिरे । तमप्रतिमकर्माणमभिनन्द्य नरेश्वरः ।।१३
आर्जितां तपसा स्वस्य मणिमालां ददौ तदा। शुशुभे हनुमांस्तत्र स तया मणिमालया ।।१४
नक्षत्राणामिवाकाशे चन्द्रमा इव मालया। उज्जृम्भणं ततः कृत्वा महामात्यः प्रचोदितः।।१५
हनूमता वेगवता योद्धुमाभ्याययौ बली । तमुद्यन्तं महामात्यं राजशासनरक्षकम् ।।१६
गृहीता युद्धमुख्यास्ते वज्रहुंकृतिकास्सुराः।यन्ता तस्य महाशास्ता शास्ता धर्मभृतां नृणाम्।१७
स्यन्दनं प्रेरयामास पवनात्मजसन्निधौ । उपस्थितानां कङ्कानां कलहोऽयमसासहः ।। १८
निपपात महीपृष्ठे ध्वजं तस्य महात्मनः । पतितः केतुरवनौ विरराज रथाच्युतः ।।१९
पुण्यक्षये दिवोमध्यात् प्रच्युतः कर्मविद्यथा । स तमुत्पातमुद्वीक्ष्य दृष्टचेता महाशरः ।।२०
आस्पन्दं वामनेत्रस्य तदा नाजीगणद्रणे । ततो नालीकनाराचैः पट्टसैरपि मुद्गरैः ।।२१
गदाभिर्मुसलैस्तत्र व्याकुर्वन्त रणं परे । हनूमान् राक्षसक्षिप्तान् तानवज्ञाय वेगतः ।। २२
शिलामादाय यातूनां प्रधावत बलं प्रति । चिक्षेप स शिलां तत्र रणमूर्धनि वातभूः ।। २३
आस्फोट्य पुच्छं तेजस्वी अट्टहासमथाकरोत्। तामापतन्तीं ते तत्र दृष्ट्वा वातभुवेरिताम्।२४
कालकेयाश्शिलां तीक्ष्णैर्वारमायासुराशुगैः। मोघं कर्म तदा वीक्ष्य विचिन्त्य च स मारुतिः।२५
पार्श्वे नभस्थलारूढं सालवृक्षमुदैक्षत । तमेकेनैव हस्तेन सालमुत्पाट्य मारुतिः ।।२६
हता यूयमिति व्यक्तमाभाष्य चिक्षिपद्बली । तमप्रतिहतं दृष्ट्वा निशितैस्सायकैरपि ।।२७
उन्मुखेन तदा योद्धुं न शेकुर्भयविद्रुताः । यत्र यत्र प्रधावन्तो दृश्यन्ते पललाशिनः ।।२८
तत्र गत्वा स तान् सर्वान् ताडयामास पाणिना । हनूमता वेगवता हन्यमाने बले तदा ।।२९
क्रोधाविष्टो महामात्यो राजानमभिदुद्रुवे । अथापतन्तं सविधे महामात्यमवेक्ष्य सः ।।३०
ज्याशब्दमकरोत् तत्र भीषणं सर्वरक्षसाम् । तस्य शब्दश्रवेणैव प्राणान्विजहुरञ्जसा ।।३१
महामात्योऽपि दुर्धर्षो चकम्पे रथविष्ठितः । तद्दृष्ट्वा शत्रुहन्तारं राजा धर्मभृतां वरः ।।३२
मर्मस्पृशं वाचमूचे महामात्यमुपस्थितः ।

इन्द्रद्युम्नः -

त्वमेव समरश्श्लाघी अस्त्रशस्त्रभृतां वर ।।३३

श्रुते मदीये ज्याशब्दे यतः प्राणान् न हास्यसि।

ब्रह्मा -

इतीरयति राजेन्द्रे राक्षसः क्रोधमूर्च्छितः।।३४

प्रहस्य किञ्चिद्राजानमिदमुत्तरमब्रवीत् । आस्तां तावदिदं व्यर्थकथनं समरार्जितम् ।।३५

भवादृशेषु किं वायं वीरवादो विशाम्यते। समर्थो यदि युद्ध्यस्व द्वन्द्वं दास्याम्यनन्तरम्।।३६

न चेदस्मादपाक्रम्य सुखी भव सुहृज्जनैः । एवमुक्त्वा महामात्यो रोषपर्याकुलेक्षणः।।३७

ज्यास्वनैः पूरयामास समराङ्गणमाशरः । अधिज्यधन्विमन्त्रीन्द्रो नाराचयुगमादधे ।।३८

इन्द्रद्युम्नोऽपि राजेन्द्रश्शरयुग्ममुपाददे । युद्धं दिदृक्षवस्तत्र तयो राजसुरद्रुहोः ।।३९

आजग्मु ऋषयस्सर्वे सासुरास्समरुद्गणाः। ततो मन्त्री क्रुधाविष्टो मुमुचे सायकद्वयम्।।४०

उभाभ्यामेव बाणाभ्यां राजा चिच्छेद तौ शरौ। ततः पञ्चशरा मुक्ता महामात्येन धीमता।।४१

प्राच्छिनत् पञ्चभिर्बाणैरिन्द्रद्युम्नो रुषान्वितः। पुनः क्रुद्धश्शरान् पञ्चदशपञ्च जहौ तथा।।४२

अवारयच्छरे राजा दर्शयन्पाणिलाघवम्। ताभ्यां मुक्ताश्शरास्तीक्ष्णाश्शतशोऽथ सहस्रशः।।४३

शीर्षापीडा वियद्भागे वीरलक्ष्म्या इवाबभुः।ततः क्षणाद्विनिष्पिष्य कालकेयान् समीरभूः।।४४

स्यन्दने मन्त्रिणस्तस्य वेगवान्निष्पपात ह । ऊरुवेगेन महता रथश्चूर्णीकृतस्तथा ।।४५

पुनरन्यो रथस्तत्र समानीतः क्षणेन वै । तमारुह्य महामात्यो राजानं दशभिश्शरैः ।।४६

जघान समरे वीरो मारुतिञ्च शरैश्शनैः। ताननादृत्य बाणौघान् हनुमान् भीमविक्रम ।।४७

तलेनाहत्य यन्तारं शास्तारं बहु मानयन्। अश्वेनाश्वं द्विपेन्द्रेण द्विपेन्द्रं नरतो नरम् ।।४८

संहत्य सहसा संख्ये श्वसमानो ह्यदृश्यत। राजापि मकुटं तस्य महामात्यस्य धीमतः ।।४९

शरेणैकेन महता ह्यपातयदसौ बली । शरैश्चतुर्भिस्तस्यासौ शकटानि दुरात्मनः ।।५०

शरेणैकेन तेजस्वी वर्मचायसमुत्तमम् । अक्षय्यमपि तूणीरं सायकानां त्रयेण वै ।।५१

युगमेकेन बाणेन वाजिनश्च त्रिभिश्शरैः । शरेण ध्वजमेकेन तथा शास्तारमाहवे ।।५२

दशभिस्सायकैस्तीक्ष्णैरमात्यं निजघान ह । तमप्रतिमकर्माणं युद्धसीम्नि व्यवस्थितम् ।।५३

अवलोक्य महाशास्ता पुरीमेवाभ्यधावत। तथा क्रुद्धो महामात्यो हताश्वो हतसारथिः ।।५४

सच्छिन्नधन्वाश्वरथो हत सैऽन्योऽपि सोऽभवत्। गदामादाय वेगेन क्रुद्धस्सङ्ग्राममूर्धनि ।।५५

हनुमन्मूर्ध्नि चिक्षेप हतस्त्वमिति मन्त्रिराट्। गदां तामायसीं मुक्तामष्टघण्टामणीयुताम् ।।५६

आपतन्तीं रणे दृष्ट्वा राजा रणविशारदः । मिषतां सर्वभूतानामग्रतो नृपसत्तमः ।।५७
शरेणैकेन तां भस्मसात् कृत्वा हस्तलाघवम्। दर्शयन्नखिलैर्भूतैस्स्तूयमानस्तदाभवत् ।।५८
मोघीभवन्तीं तां दृष्ट्वा गदां ब्रह्मर्षिघातिनीम्। स विचिन्त्य मुहूर्तं वै सालमेकं ददर्श ह।।५९
उत्पाट्य सहसा सालमुद्यम्य भुजयोर्युगे। राज्ञस्स्यन्दनमुद्दिश्य स तु चिक्षेप मन्त्रिराट् ।।६०
शाखोपशाखामारूढं मुच्यमानं नभोऽन्तरे । नभस्तरुमिवाश्चर्यकारिणं ददृशुस्सुराः ।।६१
हनुमान् लघुनाभ्येत्य प्रगृह्य तरुमुत्तमम् । प्रचिक्षेप तदा सालं प्रति राक्षसमन्त्रिणम् ।।६२
स तदायान्तमुद्वीक्ष्य शिलायास्तमपोथयत्। आदिदेश महामात्यो शिलामन्यां बधे रिपोः।।६३
तलेन हनुमान् तस्य तां शिलां प्रापतद्भुवि। स वन्ध्यं कर्म तद्वीक्ष्य दन्तान् कटकटापयत्।६४
आदाय तु गिरेश्शृङ्गमाययौ मन्त्रिसत्तमः।अवलोक्य महीपालः पत्रिणां कङ्कपत्रिणाम्।६५
एकेन मन्त्रिणो हस्तं सहशृङ्गमथाच्छिनत्। ततोऽन्येन भुजेनासौ महामात्यो रुषान्वितः।।६६
सालं कमपि पादाभ्यां उत्पाट्य रिपवेऽक्षिपत्। तं वृक्षराजमायान्तं द्रुतमेत्य समीरभूः ।।६७
तेनैव प्राहनत् तत्र राक्षसं मन्त्रिसत्तमम् ।
प्रहतस्तेन तरुणा महामात्यो महाबलः । व्यात्ताननो रणभुवि निरसुः प्रापतद्बली।।६८
ततो देवास्सगन्धर्वास्सेन्द्राश्च परमर्षयः । पुष्पवर्षाणि मुञ्चन्तस्साधु साध्वित्यपूजयन्।।६९
तदानिलात्मप्रभवस्य वैभवं रणाजिरे द्रष्टुमसासहस्तदा ।
क्षयं प्रणीते सचिवाग्रगण्ये शिष्टा निजस्वामिनमापुरासुराः ।। ७०
तं पुष्पकासीनमुदारसत्वं स्वर्वारनारीभिरुपास्यमानम् ।
संमन्त्र्यमाणं सचिवैरनेकैर्द्विजावमन्तारममी ह्यपश्यन् ।। ७१
वर प्रमत्तं वरपीठसंस्थं कृतावलेपं क्षणदाचरेन्द्रम् ।
उपात्तसंरम्भमुदस्तविक्रमं प्रसह्य पञ्चास्यमिव प्रबुद्धम् ।। ७२
अन्धं तमः प्रावरणं गिरीन्द्रमिव स्थितं नीलवरोत्तरीयम् ।
तं रत्नमालाभरणं सुवक्षसं सौदामिनीरञ्जितमम्बुदं यथा ।। ७३
दृष्ट्वा तमासुराधीशमासुरास्ते ससाध्वसाः । हनूमद्भयया मुक्ता भर्तारमिदमब्रुवन् ।। ७४

इति ब्रह्मवैवर्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये षष्ठोऽध्यायः ।।

सप्तमोऽध्यायः

श्री पराशरः -

दक्षिणाभिमुखासीनः पीठे मणिमये शुभे । निश्वस्याहिरिवाशेषानूचे रक्षर्षभस्तदा ।।१

कुम्भोदरः -

हतः खलु विनिष्क्रान्तो महामात्यो बलान्वितः। संरब्धो युद्धनिर्ह्रादी साहसं क्रियते वृथा ।।२

अथवा यच्च सचिवस्स्वयं कालवशं गतः। भयं मुक्त्वा शंसत वो वाञ्छितं प्रददाम्यहम्।।३

ब्रह्मा -

इत्युक्तवन्तं राजानं रक्षसामसुरास्तदा । किञ्चिद्विमुक्तमोहास्ते साभिषङ्गं समूचिरे ।।४

असुराः -

यस्ते वैरिविलुंटावो यस्ते दक्षोभुजो महान्। यस्ते विक्रमकाले तु युध्यते वैरिभिस्सह।।५

यस्ते हर्षकरो मन्त्री यस्ते नासीररक्षकः । स इदानीं वानरेण केनासि विनिपातितः ।।६

ब्रह्मा -

निशम्य तद्वचस्संख्ये पातितं मन्त्रिशेखरम्। पार्श्वे धूम्राक्षभीमाक्षौ विष्ठितौ प्राह नैऋतः।।७

कुम्भोदरः -

हे सुतौ मम भाव्यौ तौ सर्वदा रणकोविदौ । तं वानरं च राजानं निहत्य समरे युवा ।।८

अनन्तरं च हरतं राजभार्यामनिन्दिताम् । अथवा वानरं गृह्य जीवग्राहं महाबलम् ।।९

राजानमपि तत्पत्नीं शीघ्रमागच्छतामुभौ ।

ब्रह्मा -

इत्याकर्ण्य वचस्तस्य तावुभौ समितिञ्जयौ ।। १०

अकुर्वतां महाभीमौ रथारोहणमञ्जसा । हुत्वा वह्निमुपस्थाय वर्धमानौ महारथौ ।।११

विरेजतुरुभौ व्योम्नि चन्द्रसूर्याविवास्थितौ। अक्षौहिणीसहस्रेण व्यूहं कृत्वा तु पद्मकम्।।१२

सङ्गरान्वेषिणौ बालौ निर्गतौ नगराद्बहिः। निर्यान्तौ तौ समीक्ष्याथ मांसागमनहर्षिताः।।१३

शीघ्रमारुरुहुस्तेषां कङ्कव्यूहा रथोपरि । शिवाश्चाशिवशंसिन्यो विनेदुस्तत्पुरस्थिताः ।।१४

आवर्तमुद्रां व्याचक्रुर्झञ्झूवाताः पदे पदे । पांसुवृष्टिं प्रमुञ्चन्तः पयोधास्संप्रतस्थिरे ।।१५

तयोस्सारथिनौ तत्र निर्यत्नात् पतितौ भुवि। स्यन्दनस्यापि मकुटं कार्तस्वरमयं भुवि ।।१६
गतं देवर्षिशापेन महाग्रह इवाबभौ । प्रस्रवन्तो भयात्तत्र वाजिनो रथवाजिनः ।।१७
अभिनेतृकशाखाताद्विमुखीभूय शेरते । वामञ्चाक्षिसुरारातेस्तयोरपि तनूभुवोः ।।१८
प्रास्पन्दत तथा चापमपि भग्नगुणं स्थितम्।ताननादृत्य चोत्पातान् स्थितयोरपि पुत्रयोः।।१९
बभूव महती चिन्ता धैर्यलोपकरी तदा । इन्द्रद्युम्नोऽपि धर्मात्मा युद्धकर्मविशारदः ।।२०

इन्द्रद्युम्नः -

तं होवाच हनूमन्तं कृतकर्माणमाहवे । सज्जीभव तनूजन्मन् पवनस्य महामते ।।२१
दृश्यन्ते बहुधा दूरे यस्य साङ्ग्रामिकारथाः। आवयो राक्षसानाञ्च युद्धकर्माभिलाषिणाम्।।२२
इदानीं सुमहत्कर्म भविष्यति न संशयः । सर्वदा जयिनस्संख्ये वयमत्र न संशयः ।।२३
यस्माद्वायसराजोयमभिकूजति भास्करम् । दक्षिणाक्षिभुजस्पन्दश्शंसते नः क्षणं रणे ।।२४
नृहरेरनुभावेन हनूमंस्तव दक्षिणे । करे भव्यप्रशंसीव दृश्यते हेतिपावकः ।। २५

ब्रह्मा -

एतस्मिन्नन्तरे देवा जयतां हनुमानयम् । देवा दुन्दुभिमाघ्नन्तो व्योमभागे व्यवस्थिताः ।।२६
तमाकर्ण्य महाशब्दं दुन्दुभीनां भयावहम् । धूम्राक्षस्तु दुराधर्षस्स्यन्दनं प्राहिणोद्रणे ।।२७
हनूमानपि शत्रूणां हननेमग्नमानसः । जागृहीति महीपालमुक्त्वा प्राद्रवदासुरान् ।।२८
शिलाभिस्तरुभिश्शृङ्गैर्निष्प्राणान् रजनीचरान्। कृत्वा समरविक्रान्तः प्रदधमौ शङ्खमुत्तमम्।।२९
प्रध्मातशङ्खं तं दृष्ट्वा प्राह तानपि राक्षसान्। धूम्राक्षः क्रोधताम्राक्षो हनूमन्तमपूजयत् ।।३०

धूम्राक्षः -

वानरेन्द्र रणश्लाघी भवानेव न संशयः। यत्त्वां महासुरान् हत्वा ध्मासि शङ्खमलज्जितः।।३१

ब्रह्मा -

इति ब्रुवाणस्य तथा धूम्राक्षस्य पुरस्थितम् । पातालभेदिनं नागं ताडयित्वा जगर्ज सः ।।३२
ताडितो गजराजस्तु विमुखीभूय सन्नुतः । बृंहितं सोऽकरोदुच्चै राक्षसेन्द्रभयप्रदम् ।।३३
ततः क्रुद्धो यज्ञशत्रुः प्राहिणोद्रथसादिनम्। तं देशं यत्र हनुमान् प्रस्थितो व्योम्नि गर्जति ।।३४
स गत्वा वायुजन्मानं शरानाशीविषोपमान्। अष्टौ सन्धाय धनुषि व्याहरन् तदिदं वचः ।।३५

धूम्राक्षः -

भवान् हरीन्द्र यदिमान् सहते यदि सायकान्। अस्माद्वित्रासितस्संख्यात् पातालमुपयाम्यहम्।।३६

ब्रह्मा -

इत्युक्त्वा प्राहिणोद्बाणानष्टौ तानसुरोत्तमः। पञ्चशीर्षाणि वाहीन्द्रानाकाशे ज्वलदर्चिषः।।३७
दुर्धर्षान् वारयामास हेतिराजेन मारुतिः ।
व्यर्थं कर्म स विज्ञाय वितथीकृतकार्मुकम्। मारुतिं तोषयन् सख्ये वचनं चेदमब्रवीत्।।३८

धूम्राक्षः -

वानरेन्द्र न चैवासीत् त्रिषु लोकेषु ते समः । वर्तते नैव सुमते न च वाविर्भविष्यति ।।३९
अयमेको विमुक्तश्चेच्छरो मे संयुगे रुषा। बिभेति स्वेन सैन्येन साक्षादिव दिवस्पतिः ।।४०
अष्टानामपि बाणानां निहन्त्रे हरये नमः। सुखी भव हनुमांस्त्वमितो यास्याम्यधस्थलम्।।४१

ब्रह्मा -

इति ब्रुवन्नधो यातो योधास्य चरणे हतः । वैसारथ्यं मृधे यस्य न जानन्ति सुरर्षयः ।।४२
गते तु तस्मिन् धूम्राक्षे भीमाक्षः क्रोधमूर्छितः। भक्षितोऽयमिति ज्ञात्वा हनुमन्तमुपाद्रवत्।।४३
इतिकर्तव्यतामूढं भीमाक्षं प्रेक्ष्य मारुतिः । धनुरारोपणात् पूर्वं ताडयामास वेगतः।।४४
ताडितो गण्डभागे च प्रभ्रष्टस्स्यन्दनोत्तमात्। बभ्राम शोणितोद्गारी मुहूर्तं भ्रान्तचेतनः।।४५
तं दृष्ट्वा भीमकर्माणं हनूमन्तमथाहवे । न शर्म लेभिरे तत्र कालकेया भयाद्रुताः।।४६
रथपृष्ठावलम्बं तं दृष्ट्वा पार्ष्णिनिषेविणः। हाहाकारं प्रकुर्वन्तः प्राद्रवंस्ते दिशो दश ।।४७
क्षणेन लब्धसंज्ञस्तु भीमाक्षो भीमविक्रमः । पातालभेदिनं नागमारुरोह महारथः ।।४८
आरुह्य नागमायान्तमालोक्य सहसा कपिः । भुजमास्फोटयानस्तु खस्थ एवमभाषत ।।४९
अरे भीमाक्ष दैतेय धैर्यमस्ति रणाङ्कणे । तव मूर्ध्नि पतन्तं मां सहस्व बलभावितम् ।।५०
इत्युत्प्लुत्य वियद्भागे स्थित्वा वानरपुङ्गवः। गजोपरि स्थितस्यास्य मूर्ध्नि वेगात्पपात ह।।५२
तस्मिन् पतति दुर्धर्षे वनौकसि गजोपरि । भूतानि नैव शेकुस्तं वेगवन्तमुदीक्षितुम् ।।५२
तं पतन्तं ततो बुद्ध्वा नेतारं जगतामिव। मायावी स तु भीमाक्षो गजात् तस्मादपासरत्।।५३
अपाक्रमन्तं भीमाक्षमजानन्मारुतिस्तथा । निपपात न तन्मूर्ध्नि वेगाविष्टो गजोपरि ।।५४
पादाग्रहतिमात्रेण चूर्णीभूतो गजाधिपः । नैरृता अपि पार्श्वस्था ऊरुवेगेन चूर्णिताः ।।५५
हनूमानपि विज्ञाय राक्षसं मायया गतम् । वितथं कर्म च तथा चिन्तामेव प्रपद्यत ।।५६
अथ रक्षोऽधिपसुतो भीमाक्षो भीमविक्रमः । मायी दिवमुपस्थाय शरवर्षमवर्षत ।।५७
तत्र सर्वाणि भूतानि भीमाक्षं समरे तदा । ददृशुर्नैव बाणौघं पश्यन्ति स्म वियत्पदे ।।५८
कियत् विलम्बं प्रसहे इत्यालोच्य स मारुतिः। दृश्यादृश्यगतिर्व्योम्नि चन्द्रो मेघ इवैक्षत।।५९

यथा दृष्टो हनुमता गृहीतस्तु तदा पदे । घूर्णितं प्रथमं प्राणान् प्राहिणोद्यमसाधनम् ।।६०
स वै मुहूर्तं भीमाक्षं कुम्भोदरसुतं तथा । घूर्णयन् परिचिक्षेप योजनानां शतं बली ।।६१
तं प्रेरयित्वा रक्षोभिरनेकैर्यमसादनम् । वित्रासयन्नरींस्तत्र राजानं प्राप्तवान् हरिः ।।६२
तं प्राप्तवन्तं नृपतिस्समीरणभुवं तदा । पस्पर्श पाणिना गात्रं हर्षोत्फुल्लतनूरुहः ।।६३
देवदुन्दुभयो नेदुः पुष्पवर्षा दिवश्च्युताः । साधु साध्विति भूतानि प्रशशंसुर्नभस्थले ।।६४
पलायमाना दिशि ये अवशिष्टा रणाजिरे। ते मिलित्वा पुरीं प्राप्ता भर्तुर्भयनिवेदिनः ।।६५
निशम्य कुम्भोदर एष तौ रणे निशम्य पुत्रौ निहताविति स्फुटम् ।
रुषान्वितस्सज्यधनुः खरान्वितं रथं समारुह्य पुराद्विनिर्ययौ ।।६६
स लब्धपर्णो रणकर्मसु स्वयं पुरत्रयारातिमुपेत्य पूजयन् ।
वरं च तस्मात् प्रतिगृह्य दुर्मदः पलाशिनां प्राग्रसरस्तदा बभौ ।।६७
रथस्य तस्योपरि भीमकर्मणो निपेतुरुल्काश्शतशो भयङ्कराः ।
प्रणेदुरुच्चैरशिवं शिवास्तदा भयावहा राक्षसचक्रवर्तिनः ।।६८
महारथस्याहवरङ्गवर्तिनस्तरस्विनस्स्यन्दनमूर्ध्निविष्टिताः ।
जवादधश्येन परंपरास्तदा वितेनुरुच्चैः परिवेषणक्रियाम् ।।६९
शतं शतं कुण्डलिनोद्यतायुधाः पलाशराजस्य मतानुगामिनः ।
रथाधिरूढाश्च परप्रमाथिनः पुरान्निरीयुः कतिचित् खरान्विताः ।।७०
महारथानामुपरिस्थिताः खगा महारथानां भ्रमतो ह्यदक्षिणम् ।
प्रसह्य चक्रुः प्रसभं तरस्विनः प्रणेतुरुच्चैर्बलिभोजिनां गणाः ।।७१
सताननादृत्य शरासबृंहितैर्दिशश्चतस्रो निनदैः प्रपूरयन् ।
पयोधरस्स्फूर्जथुभिर्यथा नभस्थितस्तथाजृम्भत सङ्गरस्थितः ।।७२
स मण्डलीकृत्य धनुश्शरोत्तमा दशाष्टपञ्चाहवमूर्ध्न्ययोजयत् ।
जवेन लक्ष्यं विरचय्य मारुतिं महीपतिं च क्षणदाचरेश्वरः ।।७३
तदा नरेन्द्रस्य शरासनं कराच्युतं शरारोपण काल एव हि ।
प्रभग्नमेतस्य रथाक्षकूबरं प्रभग्नजङ्घाश्च खरास्तु युग्याः ।।७४
अथैनमायान्तमुदीक्ष्य सत्तमः क्षणाद्द्वितीयं विरचय्य कार्मुकम् ।
हनूमता वेगवता रणस्थलीमुपेयिवान् प्राग्रसरो धनुष्मताम् ।।७५
उपेत्य गान्धर्वमुदग्रधन्विनां पुरस्थितश्शस्त्रमनिन्द्यविक्रमः ।

प्रसह्य नासीरभटेषु केषुचिद्विमुच्य बाणांश्च तुतोष सानुगः ।।७६

यमक्षयं नीतमधीक्ष्य सैनिकं निशाचरेन्द्रः कुपितो धनुर्धरः ।
अधीशमुद्वीक्ष्य नृणामनन्यधीराग्नेयमस्त्रं प्रमुमोच वेगवान् ।।७७

स वारुणेनैव रुरोध संभ्रमान्नभस्थले विज्वलितं दुरासदम् ।
तदस्त्रमस्त्रागमवेदिशेखरो दिवौकसां प्राग्रसरेण तोषितः ।।७८

अथो हनूमानपि वेगदर्शिनामनुत्तमः पाणिधृतेन हेतिना ।
निवारयामास शरौघमाशरप्रमोचितं तानपि सञ्जघान ह ।।७९

क्षणेन तत्र व्यथिता यमक्षयं नीता हनूमत्करशालिनारिणा ।
कुम्भोदरो नाम निशाचरेश्वरस्स एक एव स्थितिमेयिवान् रणे ।।८०

स तत्र रुष्टो रणमूर्ध्नि हृष्टो नक्तञ्चरेन्द्रश्शरजालमुच्चकैः ।
ससर्ज कल्पादिषु ताः प्रजा इव प्रजापतिस्तत्र जगर्ज सानुगः ।।८१

समीरजन्मापि रुषावलिप्तः क्लृप्ताट्टहासो जलजं प्रदध्मौ ।
निवार्य नक्तञ्चरराजमुक्तं चक्रेण चासीद्रणमूर्ध्नि हृष्टः ।।८२

प्रध्मातशङ्खं प्रसमीक्ष्य मारुतिं निशाचरः कोपवशं गतस्तदा ।
विज्ञाय मोघं स्वशरौघमाहवे तपः प्रभावार्जितशूलमाददे ।।८३

स शूलमादाय निशाचरः करे पदे पदे चन्दनपङ्कचर्चितम् ।
रणे हयस्यन्दनसूतमाधिनं समीरजन्मानमुदीक्ष्य सोऽब्रवीत् ।।८४

कुम्भोदरः -

वलीमुखोऽसि त्वमतिप्रसह्य वै स राक्षसं चापि भवान् प्रबाधते ।
इमं विमोक्ष्ये त्रिशिखं पुरारिणा प्रदत्तमुन्मत्तविशीर्य पातितम् ।।८५

स चक्रशङ्खाङ्कभुजं च वानरं स चापबाणासिधरं च भूपतिम् ।
प्रवध्य संख्ये त्रिशिखेन चामुना प्रमार्जयेऽश्रूणि निशाटसुभ्रुवाम् ।।८६

ब्रह्मा -

इतीरयन् राक्षसशेखरो भुवि स्थितो दुरात्मा लघुविक्रमो बली ।
दुरासदं दुर्विषहन्तथायुधं मुमोच मर्त्यक्षतजाभिषेचितम् ।।८७

विमुच्यमाने त्रिशिखे वियत्पथे विजृम्भमाणे विरतप्रमादिनि ।
वितत्रसुस्तस्य तथाविधायुधं निरीक्ष्य सेन्द्राश्च सुरा विदुद्रुवुः ।।८८

राजा स तस्यागतिमीक्षितुं प्रभुं नृसिंहतेजोभजनेन हेतुना ।
ततो हनूमानपि शक्तिमान् मृथे बभूव हेतिप्रसवेन तेजसा ।।८९
नृपोत्तमोऽसौ दिवि शूलमुज्वलं परार्ध्यबाणास्त्रसहस्रदुर्गमम् ।
तं कालदण्डप्रतिमं विलोकयन् विचिन्तयामास रणाङ्कणस्थितः ।।९०
सञ्चिन्तयानं प्रसमीक्ष्य दुरितिर्निराह भूपालमिदं वचस्तथा ।
विलम्बनं किं कुरुषे नृपाहवे नारायणास्त्रं प्रतिगृह्यतामिदम् ।।९१
प्रबोधितो भूपतिशस्त्रमुत्तमं तथा न दैत्यप्रवरेण दुस्सहम् ।
अनेकदीप्तांशुकराभमुज्ज्वलं मुमोच फालं प्रति वैरिगर्वितः ।।९२
परस्परं तावभिहन्यमानौ नभस्थले वीक्ष्य तथायुधोत्तमौ ।
सुरा अमन्यन्त भुजङ्गपुङ्गवौ मिथो निगर्वेण रणं गताविति ।।९३
चिरायमाणे सति शस्त्रपुङ्गवे नारायणेयास्त्रवशं गतस्तथा ।
प्रचोदितः प्राग्रसरेण देहिनां समीरजो हेतिवरं मुमोच ।।९४
प्रमुच्यमाने हरिहेतिराजे वेगासहिष्णुस्त्रिशिखो महायुधः ।
अमोघवेगोऽपि समोघवेगो बभूव वेगेन परोक्षतां गतः ।।९५
परोक्षभावं गमिते निजेन वै नारायणे चैव स हेतिराजः ।
उभौ यथावस्थितिमभ्यगातां नृपस्य तूणञ्च भुजं हनूमतः ।।९६
तदा निशम्य प्रवरः पलाशिनां स्थातुं न शक्तो युधि वायुजन्मनः ।
विशंस मायां प्रविधूयमानो रसातलं सानुचरस्समाविशत् ।।९७
पातालमभ्येयुषि राक्षसाधिपे कुम्भोदरे दीनमनन्यचेतने ।
विनेदुरुच्चैरमरेन्द्रडिम्डिमास्सुरर्षयोऽपि प्रशशंसुरम्बरे ।।९८
दीप्तांशुमन्तौ दिवि पुष्पवन्तौ दिशः प्रसन्नास्सुखिनो महर्षयः ।
बभूवुरिन्द्रोऽपि सहानुयायिभिर्गतव्यधोऽमुञ्चत पुष्पवृष्टिम् ।।९९

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये सप्तमोऽध्यायः ।।

अष्टमोऽध्यायः

श्रीपराशरः -

इति ब्रह्मणि विस्रब्धमपदानं प्रवक्तरि । तुष्टुवुः परमप्रीता ऋषयो ब्रह्मवादिनः ।। १

ऋषयः -

ब्रह्मन् प्रवक्ता तथ्यं त्वं त्रिषुलोकेषु विश्रुतः। न ह्यन्यचेतनः क्वापि कथाकथनलालसः ।।२

त्वं विना वचसां देवा ह्यभ्येष्यति जगत्रये। त्वं वेदवेद्यो वेदाङ्गनिष्ठितो वैदिकोत्तमः।।३

त्वमेव जगतां धाता विनीतोऽसि चतुर्मुख । त्वयैकेन प्रजास्सर्वास्सृज्यन्ते चतुरानन ।।४

चतुर्भिश्चतुरो वेदान् सृजसि त्वं मुखैरपि । प्रसीद भगवन् ब्रह्मन् सनकादिनिषेवित ।।५

अस्मासु व्याकुरु गुणान् पुण्यश्लोकानुवर्तिनः।

श्रीपराशरः -

इत्थं स्तुतो जगद्धाता प्रसन्नो ऋषिसत्तमान्।।६

उवाच सूनृतं वाक्यं प्रहर्षमतुलं भजन् ।

ब्रह्मा -

इन्द्रद्युम्नोऽपि हनुमान् रणरङ्गमुपेयिषौ ।।७

श्लाघनीयौ सुरैस्सर्वैरास्थितौ हृष्टमानसौ । ततो देवास्सगन्धर्वास्सेन्द्राश्च परमर्षयः ।।८

राजानमभिषेक्तुं वै नृहरिप्रेषिता ययुः ।

देवाः -

इन्द्रद्युम्न महाराज सदा रणविशारद ।।९

वरं वरय भद्रं ते वरं दातुमिहागताः ।

ब्रह्मा -

इति तैरीरितो राजा हर्षगद्गदचेतसः ।।१०

अवलोक्यागतान् सर्वानिदं होवाच देवताः ।

इन्द्रद्युम्नः -

यदि प्रसन्ना यूयं मे वरदा यदि देवताः ।।११

चिरादीप्सितमेतन्मे ब्राह्म्यं तेजः प्रदीयताम् ।

ब्रह्मा -

इत्थं राजनि ब्राह्मण्यं प्रार्थयत्यमितौजसि ।।१२

विचिन्त्य च मिथो देवा भूपालमिदमूचिरे ।

देवाः -

साधु पृष्टं त्वया राजन् ब्राह्म्यमन्यैर्दुरासदम् ।।१३

कञ्चित् कालमुषित्वात्र राजभावेन भूपते। श्रीयोगनरसिंहस्य प्रभावेन भुवि प्रजाः।।१४

पालयन्नविलम्बेन ब्राह्म्यतेज उपेष्यसि ।

ब्रह्मा -

इत्युक्तवन्तो राजानं सेन्द्रास्सहमरुद्गणाः ।।१५

श्रीनृसिंहपुरे तत्र पुरन्दरपुरोपमे । तीर्थोत्तमाहृतैस्तीर्थैरभ्यषिञ्चन् दिवौकसः ।।१६

इन्द्रद्युम्नेऽभिषिक्ते तु सेन्द्रैर्देवर्षिसत्तमैः । साधु साध्विति भूतानि प्रशशंसुर्जगत्त्रये ।।१७

देवराजस्ततो देवैस्स्तूयमानो यशस्विनम् । उपसृत्य हनूमन्तमब्रवीत् प्राञ्जलिस्तदा ।।१८

इन्द्रः -

अभ्यर्हितोऽसि नृहरेर्हनुमन् भक्तवत्सल । मद्वैरिबलहन्तुस्ते वरं दास्याम्यनुत्तमम् ।।१९

यतो निष्कासितो वैरी पुरादस्मान्महीपते। अद्यारभ्य पुरीयं ते नाम्नाख्याता भविष्यति।।२०

ब्रह्मा -

इति दत्वा हनुमते वरं वरयते सुरैः । सुरर्षिभिस्ततो वज्री स्वां पुरीमाजगाम ह ।।२१

प्रस्तूयमानो ऋषिभिः प्रवरस्तु वनौकसाम् । हनूमानपि तेजस्वी नृहरेः पदमभ्यगात् ।।२२

चिराय राजा राजर्षिवरेण्यः पालयन् प्रजाः । हनुमत्पुरमभ्येत्य तुतोष सह भार्यया ।।२३

स कदाचिन्नृपः पूर्वासन्ध्यामन्वास्य वैदिकीम्। श्रीनृसिंहमभिष्टोतुं प्रायात् पर्वतसत्तमम् ।।२४

आन्दोलिकां स्वर्णमयीं समारुह्य महीपतिः । सभार्यस्सपरीवारश्शिलापुष्करिणीमगात् ।।२५

मध्येमार्गं महाशैले वन्दित्वा देवतर्षभम् । नृपतिः परया भक्त्या ततस्तीर्थतटीमयात् ।।२६

ततश्च पुष्पकादीनि यानान्यैरावतादयः । तरवः कल्पकाद्याश्च यथागतमुपागताः ।।२७

अभिषिक्ते तु धर्मात्मन्यमितौजसि राजनि । तुष्ट इन्द्रश्च भूतानि हृष्टानि जगती तले ।।२८

वसिष्ठः -

अत्र नागाश्च पुन्नागरसालाः केसरा अपि । जम्बूकपित्थजम्भीरतिलकामलकास्तथा ।।२९

कर्णिकाराश्च कुरवः पुत्रजीवास्तरूत्तमाः । स्वयंभुवा वर्धितास्ते दृश्यन्ते फलपूर्णिताः ।।३०

चन्द्रसूर्यौ च दृश्येते स्नात्वा ब्रह्मसरोजले । गगनं गाहमानौ वै ग्रहादिभिरुपाश्रितौ ।।३१
मम पर्णकुटी चात्र जम्बूमूले प्रदृश्यते । सुमतिर्नाम शिष्यो मे तिष्ठते पालयन् गृहम् ।।३२
अत्र व्याघ्राश्च सृमरास्सिंहनागाशिशखावलाः। अविरोधेन मनसा क्रीडन्ते च परस्परम्।।३३
पुरस्तादिह दृश्यन्ते बदर्यः पञ्च भूपते । इमे गाधिभुवा शप्ता निष्पत्रा निष्फला इति ।।३४
अत्र द्विजा महात्मान ऋषयश्शंसि व्रताः । पूजयन्ति महात्मानं नृहरिं दक्षिणामुखाः ।।३५
पृथुलोमा द्विजः कश्चिन्नृहरिध्यानमाश्रितः । सालोक्यमगमद्राजन् सर्वदेवर्षिपूजितः ।।३६
श्रुत्वा वचो वसिष्ठस्य नृपतिर्भावितात्मनः । आश्चर्यमुपलेभे च वचनं चेदमब्रवीत् ।।३७

इन्द्रद्युम्नः -

मुने कथमिह ब्रह्मन् कृतवांस्तप उत्तमम्। विश्वामित्रे च राजर्षौ कथं ब्राह्म्यं त्वया कृतम्।।३८
केनाकारेण नृहरिस्तवाज्ञां दत्तवान् पुरा । केन वा हेतुना शप्ता बदराः पञ्चभूरुहः ।।३९
गाधिपुत्रेण तेजस्विन् सर्वं विस्तरतो वद ।

वसिष्ठः -

स्वारोचिषान्तरे वेदान् चतुरोऽपि स देवराट् ।।४०
विपश्चितो मतानाह स्मयापन्नानुदग्रधीः ।

इन्द्रः -

हे वेदाः कमुपासित्वा वदध्वं गच्छताधुना ।।४१
को नु देवोऽभिलषितो भवद्भिरिह वेद्यताम् ।

वेदाः -

ब्रह्मणो व्यतिरिक्तो वै देवः को वास्ति दुर्मते ।।४२
को नु देवोऽभिलषित इत्यवोचन् विनिर्भयात्। स एक एव भगवान्नेता पाता प्रजास्तथा।।४३
स्रष्टा च ऋषिभिर्वेद्यो वेदवेदान्तगोचरः । संसारतारकस्ताररूपी ब्रह्मर्षिवन्दितः ।।४४
पञ्चशीर्षश्चतुर्बाहुः पञ्चभूतनिषेवितः । इतरदैवतं लोके तत्वज्ञ वद नोचितम् ।।४५

वसिष्ठः -

निशम्य तद्वचस्तीव्रं तप्तनाराचवेदनम्। विपश्चिदिन्द्रो भगवान् प्राह निर्भत्स्य तानिदम्।।४६

इन्द्रः -

हे वेदा मूढहृदयास्तत्वार्थं वो निरामयम् । ईशानं जगदीशानं विहाय वदतापरम् ।।४७
स एव जगतां धाता नेता पाता जगत् त्रये । गीयते ऋषिभिस्सर्वैः ब्रह्मज्ञानिभिरीश्वरः।।४८

नारायणप्रियो रुद्रः पितामहपितामहः । सर्वेषामपि देवानां यः परस्स महेश्वरः ।।४९
स एक पञ्चशीर्षो वै त्रिषु लोकेषु गीयते । तं विना पञ्चशीर्षो यस्ते सर्वे तक्षकादयः ।।५०
शिवपूजाविधेस्तस्य ब्रह्मणस्त्रष्टुभावना ।

वसिष्ठः -

इत्युक्त्वा कुपितो देवराजो वज्रमुपाददे ।। ५१
प्रहर्तुकामस्तान् सर्वान् वेदानुद्धतिमोहितान्। तस्य क्रुद्धस्य चेन्द्रस्य वेदा वेगासहिष्णवः।।५२
ब्रह्माणं शरणं जग्मुः कांदिशीकास्तदा दिवि। स ईक्षन्नागतान् ब्रह्मा वेदान्वेधानुधाविनम्।।५३
कमण्डलूदकेनैव वारयामास वासवम् । स वारितोऽपि वेगेन वज्रं चिक्षेप ब्रह्मणि ।।५४
स वज्रो मन्त्रपूतेन कमण्डलुजलेन वै । वारितो ब्रह्मणा प्रत्यक् चोदितस्स्वामिनं प्रति ।।५५
प्रहर्तुं स्वयमारेभे देवराजं दुरासदम् । इन्द्रो वज्रायुधं वीक्ष्य ब्राह्ममन्त्राभिचोदितम् ।।५६
न शशाक पुरस्स्थातुं दुद्रुवे स दिवस्पतिः । स लब्धप्रत्यभिज्ञानो रुद्रशापविमोचितः ।।५७
यत्रास्ते शङ्करो देवस्तं देशं प्राद्रवत् तथा ।

इन्द्रः -

शरणं भव भूतेश करुणाकर शङ्कर ।।५८
मां प्रत्यायुधराजस्य वेगमुत्सारयाशु वै । इति संबोधितश्शम्भुर्विज्ञायास्य पराभवम् ।।५९
हुंकारेणैव कुलिशं निर्वेगमकरोत् प्रभुः । भक्तानुकम्पी भगवान् ब्रह्मणश्चेष्टितं नृप ।।६०
जानन्निन्द्रमुखात् सर्वं किञ्चित् क्रोधवशं गतः। नखेन ब्रह्मणश्शीर्षमूर्ध्वस्थितमकृन्तत।।६१
तं निगर्वं समुत्सार्य संप्रीणयति वासवम् । चतुर्मुखो भवेत्युक्त्वा तस्य नाम ददौ पुनः।।६२
तदा प्रभृति देवेन नखकृत्तशिरास्स्वभूः । चतुर्मुख इति ख्यातिं ब्रह्माविन्दत भूतले।।६३
चतुर्मुखोऽपि भगवान् स्तुत्वा रुद्रमनामयम् । वेदैरभिष्टूयमानस्स्वां पुरीं प्रययौ नृप ।।६४
अङ्गवैकल्यदोषस्य विनिहत्यै प्रजापतिः । वसतीह स धर्मात्मा श्रीनृसिंहप्रचोदितः ।।६५
शुभ्रांभसि चिरं स्नाते ब्रह्मणि प्राणिनायके । वैकल्यदोषस्तस्यैष न बभूव विशाम्पते ।।६६
चतुर्मुखो गते दोषे श्रीनृसिंहप्रभावतः । ब्रह्मा स्वनाम्ना कासारं तमकीर्तयदुत्तरम् ।।६७
गुरुवारे च यस्स्नाति समाहितमना नृप । मध्याह्नसमये मर्त्यास्तस्य पुण्यफलं शृणु ।।६८
अग्निष्टोमादिकरणे पुत्रादिकरणे तथा । यत्फलं ब्रह्मसरसि स्नायी तत्फलमश्नुते।।७०
यस्तु तर्पयते देवान् पितॄन्वापि समाहितः । तस्य सन्ततिविच्छित्तिर्नैवास्ति मनुजर्षभ।।७१
ब्रह्मपुष्करिणी तीरे वृक्षानारोपयन्ति ये । अमुत्र सुखिनस्सर्वे महीयन्ते परत्र च।।७२

वित्तं विद्याञ्च कुर्वाणो यो दद्याद्धि द्विजमन्मने।यो माघमासि ब्राह्मे च स चिरायुस्सुखीभवेत्।।७३
यो माघमासि मार्ताण्डे किञ्चिदभ्युदिते पुमान्। दैवज्ञांश्च पुरस्कृत्य इमं मन्त्रमुदीरयेत्।।७४
ओं नमो भगवन् विष्णो वासुदेव जगन्मय। हरे नरहरे पाहि घटिकाचलनायक ।।७५
स न विन्दति पाप्मानं प्रातस्स्नायी द्विजोत्तमः। ब्रह्मणोऽनुग्रहेणापि नृसिंहस्यानुभावतः ।।७६

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये अष्टमोऽध्यायः ।।

नवमोऽध्यायः

इन्द्रद्युम्नः -

यस्याज्ञामवलम्ब्यात स्नातव्यं च फलेच्छुभिः। कं देशं वा स भगवानद्यास्ते तन्निबोध नः।। १

वसिष्ठः -

इतो हि दृश्यते शैलो राजन्नेकशिलाभिधः । दक्षिणस्यां दिशि ब्रह्मसरस्तरुविभूषितः ।।२
शिंशुपानाम वृक्षोऽसौ दृश्यते विटपान्वितः। अस्य मूले स भगवान्तिष्ठते भैरवस्स्वयम्।।३
नृहरेश्शासनं गृह्यातीर्थान्येतानि पालयन् । ढाकिन्यादिपिशाचादि रक्षांस्यपि च वारयन्।।४
अनुग्रहाय भक्तानां बृन्दबृन्दमुपेयुषाम् । तस्यैव वामपार्श्वस्थं भैरवं तीर्थमुत्तमम्।।५
अत्र स्नानं प्रकुर्वन्तो ब्राह्मे काले ह्यतन्द्रितः। विपाप्मानो नरास्सर्वे स्वर्गं यातास्सहस्रशः ।।६
गन्धर्वाणां च भूतानां किन्नराणां च भूपते । मज्जतां भैरवे तीर्थे श्रूयन्ते वैदिका रवाः ।।७
अत्र वैखानसा वालखिल्याश्च परमर्षयः। स्नाताश्च शिंशुपास्कन्धे वल्कलान् छादयन्ति च ।।८
प्रातस्स्नात्वा भैरवोदे ब्रह्मोदे स्नातुमिच्छया । वैष्णवाश्च द्विजाश्शैलादवरोहन्ति पार्श्वतः ।।९
अत्र राजर्षयस्स्नात्वा दिलीपाद्या महात्मनः । नृहरेरनुभावेन जीवन्मुक्ता नृपोत्तम ।।१०
नक्षत्राणामधीशस्तु भैरवं तीर्थमेत्य हि । गुरुतल्पगतं दोषं त्यक्तवान् दर्शनक्षणात् ।।११
किं पुनस्स्नानतस्सौख्यं किं किं न भविता नृप।प्रह्लादोऽपि महातीर्थे प्रातस्स्नात्वा जितेन्द्रियः ।।१२
ऋषिभिस्स्तूयमानोऽयमुपास्ते नृहरिं सदा । पुरायं शैलराजस्तु भैरवो बाधते मम ।।१३
शृङ्गेणेति स्वगर्वेण प्रवर्धयितुमारभत् । द्वितीयं मेरुमिव तमुद्धतं वीक्ष्य वासवः ।।१४
भैरवो रक्षते शैलमिति नासृजदायुधम् । किमिति व्याकुलमनाश्चिन्तयानो दिवस्पतिः ।।१५
वलभद्रमुपागम्य प्राञ्चलिर्वाक्यमब्रवीत् ।

इन्द्रः -

प्रलम्बासुरविध्वंसिन्निन्द्रोऽहमभिवादये ।। १६

प्रसीद भगवन् देव वाञ्छितं पूरयाशु नः ।

भगवानुवाच -

किं बिभेति भवानिन्द्र देवानामधिपोऽपि सन् ।। १७

अद्य शंस प्रकाशं त्वं पूरये काङ्क्षितं तव ।

इन्द्रः -

स्वामिन् प्रवर्धते स्वैरमयमेव शिलोच्चयः ।। १८

भैरवाज्ञामधिष्ठाय कुरु तस्य प्रतिक्रियाम् ।

वसिष्ठः -

इत्युक्तो देवराजेन बलभद्रः प्रतापवान् ।। १९

हलाग्रेण विकृष्याधश्शृङ्गं चक्रे शिलोच्चयम्। प्रह्वीभूतं महाशृङ्गस्तदारभ्य शिलोच्चयः।२०

उद्ग्रीवो मन्त्रराजेन सरीसृप इवाभवत् । अवटे तरुभिर्दैर्घ्यमवाप शिखरं नृप ।।२१

हलसूत्रेति विज्ञेया शैलस्योपरि दृश्यते । बलभद्रो हलावर्तन्नाम गर्तं तथाऽकरोत् ।।२२

पनसाम्रनारिकेलांश्च तरूनारोपयद्बली । इदं होवाच भगवान् सेन्द्रान् सर्वमरुद्गणान् ।।२३

श्रीभगवान् -

तपस्यन्ति हलावर्ते भैरवोदनिषेविणः । ये नरास्ते मदाज्ञप्ता लोकानाप्नुयुरुत्तमान्।।२४

वसिष्ठः -

इतीरयित्वा देवेन्द्रं सर्षिसङ्घमरुद्गणम्। देवताभिष्टुतः प्रायात् प्रलम्बघ्नो यथा गतम् ।।२५

हलावर्ते तपस्यन्तस्तरुमूलेषु वाग्यताः । अधोमुखाः प्रदृश्यन्ते ऋषयश्शतशो नृप ।।२६

वैष्णवा अपि मज्जन्तश्शतशो विप्रसत्तमाः । पुष्करिण्यम्भसार्द्रास्तु नृहरिं पर्युपासते ।।२७

इन्दुवारे तु यस्स्नाति भैरवे तीर्थसत्तमे । तस्य पुण्यस्य भूपाल फलं वाचामगोचरम् ।।२८

गौतमस्य पुरा पत्नी देवेन्द्रस्यानुषङ्गतः । आर्जितं सुमहत्पापं मार्जयामास स्नानतः ।।२९

तपश्चरति धर्मात्मा गौतमो ऋषिसत्तमः । भैरवोदस्योत्तरस्यां दिशि शिष्यैस्सभार्यया ।।३०

गण्डशैलस्य पूर्वस्मिन् भागे किञ्चित्सरोऽकरोत्। हलावर्तोत्तरे पार्श्वे तपस्यति स वेदवित् ।।३१

ये स्नान्ति गौतमे तीर्थे नृहरिध्यानतत्पराः । ऋषयस्ते विलम्बेन प्राप्नुवन्ति परं पदम् ।।३२

शिलापृष्टे महात्मानं पुरस्कृत्य च गौतमम्। बटवस्साम घुष्यन्ति कतिचित् संश्रितव्रताः ।।३३

गौतमस्य पुरोभागे दृश्यन्ते विविधा द्रुमाः। कपित्थाः कुरवस्सालाः कोविदाराश्च तिन्दुकाः।।३४
मधुकाः केसरा नागाः पुन्नागाश्च सहस्रशः। बदराश्च धवा नीपा सिन्धुवाराश्च केतकाः।।३५
तिन्त्रिणीजम्बुजम्बीरन्यग्रोधाश्च शिलावटाः। इमे हि तरवो राजन्नश्रसीसानुषङ्गिणः।।३६
पुष्करिण्यम्भसा पूर्णाः प्रवर्धन्ते महीपते। शिलापुष्करिणीतीर्थे स्नात्वा कामान् सहस्रशः।।३७
आयान्ति स्वर्गतो मर्त्या नानादिग्भ्यश्च मानवाः। इमां पुष्करिणीं दिव्यामध्यास्ते विप्रशेखरः।३८
नृहरौ जगतां नाथे भक्तिं कुर्वन्नतन्द्रितः । वैशाखपौर्णमास्यां यो शिलातीर्थे नृपोत्तम ।।३९
स्नानमाचरति प्रातः प्राप्नोति सुखमेष वै । शिलोदे प्रातुरुत्थाय स्नात्वा द्विजवरो नृप ।।४०
ददध्यान्न प्रतिगृह्णीयाद्विन्यस्य नृहरौ मनः। मन्दवारे महातीर्थे शिलोदे स्नाति यः पुमान्।।४१
पूर्वोक्तमन्त्रमुच्चार्य मुच्यते स तु किल्बिषात्। पुरादिकाकसामासीत् पुरोधा ब्रह्मणस्सुतः ।।४२
विश्वरूप इति ख्यातो स्वस्त्रीयोदनुजन्मनाम्। कैतवं तस्य विज्ञाय स्वाराज्यं स्वयमिच्छतः।।४३
इन्द्रस्तु दैवतैस्सर्वैश्चिन्तयन्निदमाह तान् ।

इन्द्रः -

असौ किल पुरोधा मे ब्रह्मणा कल्पितः पुरा ।।४४
निपात्य मामितो राज्ये दैत्येन्द्रमभिषेक्ष्यति। इमानि तस्य शीर्षाणि त्रीणि वज्रेण हन्म्यहम्।।४५
इत्युद्यम्य स वै वज्रं पालयामास मूर्धनि ।

वसिष्ठः -

कुलिशस्य निपातेन त्यक्तजीवोऽभवत् तथा ।। ४६
त्वाष्ट्रस्तु विश्वरूपो वै त्रिभिर्वक्त्रैरवाकिरत्। तित्तिरः कलविङ्कश्च कपिञ्जल इति त्रयः।।४७
ततो देवास्सगन्धर्वा ब्रह्महेति दिवस्पतिम् । प्रशंसन्तो बभूवुस्ते विनिदन्तस्सुरर्षयः ।।४८
आयान्तीं ब्रह्महत्यां वै दृष्ट्वा बलनिषूदनः। त्रिधा विभज्यतामिन्द्रो बभाषे पृथिवीं प्रति।।४९

इन्द्रः

एकांशो ब्रह्महत्यायाः पृथिवि प्रतिगृह्यताम् । अपरांशास्तु तरवः भवद्भिस्सरितः परः ।।५०
इति त्रिभङ्गं संकल्प्य ब्रह्महत्यां ददौ भुवे । ततो महेन्द्रो देवर्षिचोदितः कलिमोचने ।।५१
देवराजस्स वै राजन्नवतीर्णस्स्वयं भुवम् । यत्रास्ते भगवान् योगनृहरिर्भक्तवत्सलः ।।५२
प्रथमं ब्रह्मतीर्थेषु स्नात्वा राजा दिवौकसाम् । भैरवोदे ततस्तीर्थे गौतमीये तदा नदे ।।५३
शिलापुष्करिणीं प्राप स्नात्वा विगतकल्मषः। सुरर्षिभिस्स्तूयमानो नृहरिं स्तोतुमभ्यगात्।।५४
उन्नतं शैलमारुह्य शृङ्गकोटिविराजितम् । तस्योपरि महाशृङ्गे दक्षिणेऽधिष्ठितं हरिम् ।।५५

सनकप्रमुखैर्दिव्यै ऋषिभिर्भावितात्मभिः । प्रह्लादेनापि सततं स्तूयमानं महात्मना ।।५६
वामदेवर्षिमुक्त्यर्थमवतीर्णमनामयम् । सर्वत्राराधितं पूर्वं सप्तर्षिगणसेवितम् ।।५७
रत्नसिंहासनासीनं योगासनविभावितम् । हेमकोटिविमानस्य प्रणवाकारजन्मनः ।।५८
द्वात्रिंशस्तम्भविज्ञेयकक्ष्यासु द्वादशस्वपि । महाकमलमुन्निद्रं मध्ये तस्य विराजिते ।।५९
कर्णिकारत्नखचितं तत्र विज्ञायते नृप । भूपुरं तत्र विज्ञेयं यन्त्रं नृपतिसत्तम ।।६०
ऋतुकोणस्य मध्ये तु बैन्दवं स्थानमुच्यते । तत्र देवमुपासीनं नृहरिं परमे पदे ।।६१
प्रश्रयावनतो वीक्ष्य स्तोत्रयामास वासवः ।।

इन्द्रस्य स्तुतिः -

प्रसीद लोकेश्वर लोकनायक प्रह्लादमुख्यै ऋषिभिः प्रसेवित ।
हिरण्यदैत्येन्द्रवधं क्षणेन वै विधाय सौख्यं कुरुषे त्वमेव हि ।।६२
प्रद्युम्नसंकर्षणवासुदेवमुखैरनेकैरनुरूपभेदैः ।
महाद्रिवासी नृहरे त्वमेवं संदृश्यसे लास्यकरो यदैकः ।।६३
स वामदेवो भरतोऽपि तावुभौ प्रमोचितौ संसृति सङ्गबन्धनात् ।
हरे महात्मन् नृहरेऽस्तु ते घृणा तयोस्त्वेवं घटिकैकमात्रतः ।। ६४
वैवस्वते संप्रति सप्त चर्षयो विमुक्तभावं गमिता जगत्पते ।
तवानुकम्पामनवाप्य कोपाच्छुकादयो मुक्तिपदं न भेजिरे ।। ६५
तवाक्षिपातेषु सहस्त्रशो द्विजा महर्षयश्चापि सुरर्षयस्तदा ।
विमुक्तिकामा भगवन्निराकुलास्तपन्ति तीव्रं तप एव केवलम् ।। ६६
त्वमेव खम्भूरुदकं समीरणश्शिखावलश्चापि भवन्तमन्तरा ।
परं न लोके नृहरे प्रदृश्यते त्वमेव विश्वं विवृषे तथा कृतिम् ।। ६७
असंशयं प्राणिपतिर्विरिञ्चनो लयं व्रजत्यन्तक एष धर्मराट् ।
सर्वे च देवा नृहरे त्वमेकः कल्पावसाने वटपत्रशायी ।। ६८
त्वमेक एवेश्वर भावमेयिवान् तुषारशैलेन्द्रसुतापरिग्रहम् ।
तमोगुणास्फीतवपुर्जटाधरो जगन्ति नेता नृहरे हरे सदा ।। ६९
हरे भवानेव चतुर्मुखस्स्वयं सत्वाधिकोद्रेकतया प्रजापतिः ।

वचस्सवित्रीकरपीडनोचितो जगन्ति पाता नृहरे त्रयीमयः ।। ७०
श्वेते महाद्वीपवटे भुजङ्गमे शेते श्रिया यो भगवान् स राजसः ।
त्वमेव विष्णोर्नृहरे हरे सदा जगन्ति पातासि पवित्रमूर्तिमान् ।। ७१
तवैव वक्त्रान्निगमादिका गिरः पुरातनाश्चेतस एव चन्द्रमाः ।
मुखादहञ्चाक्षित एव भानुमान् कर्णादिशो व्याकुरुषे त्रयी हरे ।। ७२
वेदैकवेद्यं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
अवस्थितं त्वां घटिकाचलस्थितं श्रियानुषक्तं शरणं प्रपद्ये ।। ७३

वसिष्ठः -

इति स्तुतो हृषीकेशो देवराजेन धीमता । सौरबिम्बादिव हरिः प्रादुरासीद्विमानतः ।।७४

श्रीभगवान् -

शचीपतेऽमराध्यक्ष वज्रायुधविभूषण । जानामि सुरशार्दूल भवदागमकारणम् ।।७५
यथा ब्रह्मसरोमुख्यतीर्थेषु सुरसत्तम। स्नातं त्वया तदारभ्य पातकान्मोचितो भवान् ।।७६
अथापि मम सान्निध्यं कृतमत्र भवत्कृते । वरं वृणु सुराधीश कामितं दीयते मया ।
इत्यज्ञाप्तो भगवता देवराजस्ततः परम् ।।७७

इन्द्रः -

यदि मारी कृता भक्त्या भगवन्निदमाद्रिये। स्तोत्रेणानेन हे देव मानवास्सामभिस्स्तुतम् ।। ७८
भवन्तमेव नृहरेस्तोष्यन्त्यानम्रमूर्तयः । तेषां कदाचिदपि वै न भवेयुश्च किल्बिषाः ।। ७९
निरपाया भवेदेषा विष्णुभक्तिश्च शाश्वती । अकालमृत्युरपि वै न भवेन्नृहरे सताम् ।। ८०

वसिष्ठः -

इति पृष्ठो जगन्नाथो नृहरिर्भक्तवत्सलः । तथेति व्यक्तमुक्त्वैवं तत्रैवान्तरधीयत ।। ८१
इन्द्रोऽपि दैवैराहूतस्स्तूयमानस्सुरर्षिभिः । नृहरिं भावयन्नेव स्वाराज्यमभजत्तदा ।। ८२

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये नवमोऽध्यायः ।।

दशमोऽध्यायः

इन्द्रद्युम्नः -

भगवन् साधु विदितं वेदितव्यं मयाऽनघ । विश्वामित्रस्य वै ब्राह्म्यमुपस्थितमुदाहर ।।१

वसिष्ठः -

पुरा मायामधिष्ठाय पुरीं पुरमिवामरीम् । विश्वामित्रो नृपश्रेष्ठः पालयामास मेदिनीम् ।।२

यथार्थनामा धर्मात्मा ररक्ष सकलाः प्रजाः । शतं शतं क्रतूनां वै कृतवान्नृपसत्तम ।। ३

कदाचिदर्थिता तेन क्षात्रगर्वेण भूपते । सुरभिर्नाम पीनोध्नी. धेनुरेषा प्रसह्य वै ।। ४

तमुद्धतमुदीक्ष्याहमभिमन्त्र्य जलेन वै । दूरमुत्सादयन् गर्वादेवमुच्येदमब्रुवन् ।। ५

विश्वामित्र महाराज विमुक्तस्तेजसा मम । ब्राह्म्यानुरूपं किं क्षात्रमित्यवोचमनन्तरम् ।। ६

अथ गाधिसुतस्सम्यग्वेदितस्स्वेन कर्मणा । धिक्कृत्य स बलं क्षात्रं वनमेवाभ्यगात्तदा ।। ७

स गत्वा विपिनं घोरं तपस्तेपे सुदारुणम् । ब्रह्मतेजोऽभिलाषी वै जीर्णपर्णाशनव्रतः ।। ८

जजाप तपनन्स्यस्तललाटो गाधिनन्दनः । नासाग्रन्यस्तनयनो महासौरादिकान् मनून् ।। ९

अत्रान्तरे प्रसन्नो वै भास्वान् ऋषिनिषेवितः । तपस्विनं तु राजानमाचचक्षे दिवि स्थितः ।।१०

कुरुषे व्रतमेतर्त्कि राजर्षे गाधिनन्दन । शैलस्थयोगनृहरिं भज ब्राह्मण्यमेष्यसि ।।११

स दास्यत्यचिरेणैव कालेन ब्राह्म्यमुत्तमम् । वसिष्ठो जपतां श्रेष्ठो तपस्यति तदग्रतः ।।१२

वामदेवस्य मुक्त्यर्थमाविरेष्यति केशवः । नृहरिर्घटिकामात्रतोषितो दास्यते पदम् ।।१३

इतोऽविदूरे धर्मात्मन् दृश्यते घटिकाचलः । ऋषयश्शतशस्तत्र नृहरिं पर्युपासते ।।१४

इन्द्रादयश्च दिक्पालाः प्रजापतिपुरोगमाः । सुरर्षयश्च नृहरिं हरिमाराधयन्ति वै ।।१५

नृहरेस्तु प्रसादेन महर्षीणामनुग्रहात् ।

ब्रह्मा -

वसिष्ठवचनेन त्वं ब्रह्मर्षित्वमुपैष्यसि ।।१६

इति प्रबोधितो राजा गादिसूनुरुपस्थितम्। स दृष्ट्वा द्वादशात्मानं भानुमन्तं तदाऽब्रवीत्।।१७

विश्वामित्रः -

आरभ्य तु बहोः कालात् तपांसि विविधानि वै । कुर्वत्सु विष्णुमृषिषु वामदेवमुखेषु च ।।१८

कथं कथय सर्वर्षिभावितात्मा नमस्कृतिम् । करोति सततं भानोः पुनः पुनरिदं मनः ।।१९

सविता -

पुरा कृतयुगे राजन् ब्रह्मचर्यक्रमे स्थितम् । वामदेवं पिता तस्य वेदमध्यापयत् तथा ।।२०

अधीतवेदवेदाङ्गो वामदेवः प्रसन्नधीः । प्रणम्य पितरं बाल्यात् प्रहिताञ्जलिरब्रवीत् ।।२१

वामदेवः -

स्वामिन्नधीता वेदा मे साङ्गोपाङ्गाश्च संप्रति । प्रदातुकामो गुरवे दक्षिणां प्रतिपादये ।।२२

पूषा -

विचिन्त्य बाल्ये संरब्धं कुमारं कृतचेतनम् । परीक्षार्थमिमां वाचमवोचद्गुरुसत्तमः ।।२३

पिता -

यदि सन्दीयते मह्यं दक्षिणा सुमते त्वया। फाल्गुणे मासि भविता पितृणां श्राद्धमुत्तमम् ।।२४

प्रीणनाय पितृणां वै सुधा प्रादीयतां त्वया ।

पूषा -

निशम्य तद्वचस्सर्वं महर्षीणां महात्मनाम् ।।२५

तथेति शासनं गृह्य प्रासर्पत महामतिः । दूरमध्वानमासाद्य वामदेवो महामतिः ।।२६

सुधा मे भविता कस्मादिति चिन्तापरोऽभवत् । चिन्तयानस्य तस्याथ मतिरासीदनुत्तमा।।२७

अगस्त्यो मत्पितृगुरुस्सर्वं मे वेदयिष्यति । अगस्त्यो भगवानेष वर्तते गिरिगह्वरे ।।२८

सनन्दाद्यैरुपास्यस्तु ब्रह्मा तु प्राणिभिर्यथा। येन विन्ध्यो महाशैलः प्रह्वीभूतस्तपोबलात् ।।२९

यस्य रोषात् क्षणेनैव समुद्रश्चुलकीकृतः। यत्प्रभावान्महेन्द्राद्यास्स्वे स्वे धर्मे प्रतिष्ठिताः।।३०

तमेनमुपसर्पामि सैषवेत्ता मदीप्सितम् । इति सञ्चिन्तितश्शीघ्रं वामदेवस्तु धार्मिकः ।।३१

अगस्त्याधिष्ठितं शैलं ददर्श गिरिगैरिकम् । अथाधिरुह्य शैलेन्द्रं गिरिगैरिकमुन्नतम् ।।३३

सिंहव्याघ्रसमाकीर्णं पुष्पितद्रुममण्डितम् । अनेकशतराजर्षिदेवर्षिगणसेवितम् ।।३४

स तदालोक्य शैलेन्द्रं मुमुदे सहचारिभिः। पुरस्तात्तु शिलापृष्ठे तीर्थं तीर्थनिषेवितम् ।।३५

अगस्त्यमिति विख्यातमवलोक्य तदाऽब्रवीत् ।

वामदेवः -

अकर्दममिदं तीर्थं निशामयतनिर्मलम् ।।३६

आगस्त्यशिष्याः पद्मानि गृह्णन्ति गुरवे सदा। अत्र पूर्वमहल्यायास्सङ्गदोषं सुरेश्वरः।।३७

स्नानादुत्सारयामास कुम्भयोनेरनुज्ञया । पुराऽस्य दक्षिणे तीरे शबरी वेदवत्यपि ।।३८

तपस्यन्त्यौ महात्मानौ ब्रह्मचर्यव्रते स्थिते। कन्यां वेदवतीं साक्षादवतीर्णां श्रियः प्रभाम्।।३९

शुश्रूषमाणा शबरी वृद्धा धर्मपराऽभवत् । अत्रान्तरे दशास्यो वै दिग्जिगीषुः प्रतापवान् ।।४०
दृष्ट्वा धर्षितुमारेभे कन्यां वेदवतीं तदा । संरब्धमवलोक्यैनं धर्षणाय कृतोन्मुखम् ।।४१
शबर्या वार्यमाणं च धिक्कृत्याह तपस्विनी ।

वेदवती -

प्रमत्तोऽसि दशग्रीव हीनग्रीवो भविष्यसि ।।४२
त्रेतायामवतारो मे भविता त्वद्वधे च या ।

वामदेवः -

प्रतिगृह्य जलं शापं तस्मै दत्वा तपस्विनी ।।४३
सिन्धुवारतरोर्मूले क्षणादन्तरधीयत । अगस्त्यतीर्थे यस्स्नाति भौमवारे समाहितः ।।४४
सोऽन्यस्त्रीसङ्गदोषेण मुच्यते नात्र संशयः। सोऽयं वै दृश्यते वृक्षस्सिन्धुवारस्सरस्तटे।।४५
गन्धं गृह्यास्य पवनः कुरुते घ्राणतर्पणम् । अस्मिन्नकर्दमे तीर्थे निमज्जामो ह्यतन्द्रिताः।।४६
देवतास्तर्पयित्वात्र यस्यामः कुम्भसंभवम् ।

पूषा -

तत्र धर्मभृतां श्रेष्ठस्स्नात्वा सब्रह्मचारिभिः ।।४७
तर्पयित्वा ऋषीन् देवान् तस्याश्रममुपाययौ । वामदेवस्सुधर्मात्मा गत्वाश्रमपदं तदा ।।४८
अगस्त्यस्य मुनेरस्य जग्राह चरणौ सुधीः । उत्थाय पादावनतग्रीवं सर्षिगणेश्वरः ।।४९
तदागमं तु तपसा जानन्निदमुवाच ह ।

अगस्त्यः -

वामदेव महाभाग भवदागमनं मया ।।५०
विज्ञातपूर्वं तपसा तदुपायमुदीरये । इतः पश्चिमदिग्भागे शैलराजो विराजते ।।५१
शुकादीनां विमुक्त्यर्थं नृहरिस्थानमेष्यति । चतुर्दशास्य शृङ्गाणि पर्वतस्य महामते ।।५२
पूर्वस्यां दिशि चत्वारि सामान्यस्य महीभृतः। उत्तरस्यां दिशि त्रीणि पश्चिमस्यां तथा दिशि।।५३
दिश्येकं दक्षिणस्यां वै त्रिणीशानदिशि स्वयम्। विद्योतमानो देवर्षिसेवितो राजते सदा।।५४
कृते चामीकरमयस्त्रेतायां रजतात्मकः । द्वापरे ताम्ररूपेण कलौ भाति शिलामयः ।।५५
अस्योपरिष्टान्मुक्त्यर्थं सुरर्षीणां महात्मनाम् । हेमकोटिविमानस्थो नृहरिः प्रादुरेष्यति ।।५६
घटिकामात्रतो यस्मान्महर्षीणां करस्थिता। मुक्तिरस्मादमुं प्राञ्चश्शंसन्ति घटिकाचलम् ।।५७
प्राचीनं शृङ्गमस्यैष हनुमान् प्राप्य दुश्चरम्। तपस्तनोति नृहरेः प्रसादं काङ्क्षयन् वटुः।।५८

तत्र देवास्सहेन्द्रेण सानुमन्मूर्ध्निविष्टितम् । हनूमन्तं तपस्तीव्रं चरन्तं पर्युपासते ।।५९
तस्मिन् शैले महाशृङ्गे हनुमत्तीर्थमुत्तमम् । हेमपद्मशताकीर्णं हेमकारण्डवाकुलम् ।।६०
शोभन्ते सततं तस्य तीर्थे हेममया द्रुमाः । तत्रावतीर्णा ये मर्त्यास्ते सर्वे हेमरुपिणः ।।६१
आगच्छन्तो मृगा व्याघ्रास्सिंहानागाश्च पक्षिणः। सलिलस्पर्शमात्रेण हेमरूपा भवन्त्यमी।।६२
हनूमता हृता जम्बूचारुशाखा सुरालयात्। इह भान्ति सरस्तीरे तच्छायासङ्गिनो जनाः।।६३
हेमरूपा भवन्त्यत्र हनूमदनुशासनात् । वैष्णवाश्च द्विजन्मानश्शैवाश्च जटिला नराः।।६४
तत्र स्नात्वा हनूमन्तमभीप्सन्ति चिरायुषः । ततो भानुरुपेत्यायं प्रतिभावनतस्स्वयम् ।।६५
नृणां विशिष्य वै स्नातुं भानुवारमकल्पयत्। भानुवारे तु यस्स्नाति हनूमद्ध्यानतत्परः ।।६६
संप्राप्य सकलान् कामान् दीर्घमायुस्स विन्दति। पुरा निहत्य रक्षांसि रामश्शस्त्रभृतां वरः।।६७
प्रतिप्रयातस्साकेतं पुष्पकेन प्रभूत्तमः । मध्येमार्गे हनुमतो दृष्टवान् सर उत्तमम् ।।६८
हेमशैलेन्द्रशृङ्गस्य मूर्ध्नि प्राग्दिशि भास्वतः। निर्मले तु शिलापृष्ठे समुल्लसति वारिणि।।६९
हनूमताभिलषितस्स्नानं चक्रे रघूत्तमः । राघवस्तु तदा स्नातः सभार्यस्तत्र वारिणि।।७०
वलीमुखान् पुरस्कृत्य वाचमूचे सुधामयीम् ।

राघवः -

पवित्रमुदकं सेव्यं सर्वैरपि वलीमुखैः ।।७१
विशिष्य हनुमत्सेव्यं सर्वदा प्रभविष्यति । यतोऽभिलाषी हनुमानत्रत्ये तीर्थसत्तमे ।।७२
अतो हनुमतस्तीर्थं व्याहरन्ति पूराविदः ।

अगस्त्यः -

इति कृत्वाऽभिधां तस्य तीर्थस्य भरताग्रजः ।।७३
पुष्पकं तत्समारुह्य प्रययावुत्तरां दिशम् । तत्र प्रातोत्थितः काले स्नात्वा शैलप्रदक्षिणम् ।।७४
कुरुते यो निराहारं तस्य किं नाम नो भवेत् । ते च तस्योत्तरे शृङ्गे धर्मपुत्रादयो नृप ।।७५
महामुनिं पुरस्कृत्य तपांसि परिकुर्वते । तेषां च द्रौपती नित्यं शुश्रूषणपरा सती ।।७६
जनन्या पूर्ववाक्यानि पुण्यान्यभ्यनुगच्छती । तपः कुर्वन्ति नियताहाराश्शंकरचोदिताः ।।७७
दुर्योधनवधार्थाय नृहरिप्रीणनाय च । अर्जुनेन तपस्तीव्रं कृष्णसारथ्यमिच्छता ।।७८
अस्त्रं नारायणं चापि क्रियते सुदुरासदम् । तत्र तीर्थोत्तमं नाम पाण्डवानां सरः कृतम् ।।७९
पाण्डवाधिष्ठितत्वेन पाण्डवोदं च तद्विदुः। तत्र पाण्डवतीर्थे यः प्रातस्स्नातो जितेन्द्रियः।।८०
पुण्यं तत्समवाप्नोति गोसहस्रप्रदायिनाम् । यस्तु पूजयते मोहात्तज्ज्ञात्वा नृहरिं पुमान्।।८१

शिलायां वा दारुणीह स तत्र सुखमेधते । चरन्तस्तापसीवृत्तिं सहधर्मसुतादिभिः ।।८२
आविर्भावं प्रतीक्ष्यन्ते नृहरेर्निर्जरा द्विजाः । दूर्वासमुनिना शप्तस्तेषां तु प्रपितामहः ।।८३
बुधो नाम तपस्तत्र कुर्वन् प्रायात्पुनर्दिवम्। सोमस्यापि पिता स्वामी भगवानत्रिगोत्रभूः।।८४

वामदेवः -

शंस मे तत् कथं तेन ऋषिणा शापितो बुधः ।

अगस्त्यः -

दूर्वासस्तपसा श्रेष्ठो रोषशीलस्सतामसः ।।८५
कदाचिद्धेमशैलेन्द्रं प्राप्तवान् नृहरेः पदम् । हेमकोटिविमानस्थं प्रणमन्नृहरिं तदा ।।८६
तदत्ततुलसीमालां शिलालङ्कारिणीं व्यधात्। पुनरादाय तां कर्णे कण्ठे कट्यां भुजे तथा।।८७
कुर्वाणं तु बुधो वीक्ष्य जहास स्तम्भपार्श्वतः।
दूर्वासास्तपसा श्रेष्ठो रोषशीलस्सतामसः।।८८
तं नृसिंहस्य पुरतस्सुरर्षीणां पुरस्तदा । हसन्तं बुधमुद्वीक्ष्य दुर्वासा इदमब्रवीत् ।। ८९

दुर्वासः -

दुर्बुद्धे हरिणादत्तमालालङ्कारिणो मम । अकार्षीत् स्मितमत्यन्तं यतो भगवतः पुरा ।।९०
तस्माद्द्वादश वर्षाणि भवान् भूमौ वसिष्यति। अलभ्या भगवन्माला प्रसादात्प्रीणनादृते।।९१
पुनरभ्येष्यसि दिवं नृहरिप्रीणनेन वै । ग्रहाणामाधिपत्यं त्वां कल्प्यते चन्द्रमस्सुत ।।९२

अगस्त्यः -

इति संशापितस्सौम्यश्शृङ्गेऽस्मिन् हेमभूभृतः। तीर्थोत्तमे नगश्रेष्ठे स्नात्वा तेपे महत्तपः।।९३
तस्य द्वादशवर्षाणि नृहरेस्सुप्रसादतः । निमेष इव नीतानि बुधस्य परमात्मनः ।।९४
नृहरेरस्य सान्निध्यात् स्वयं स्वस्थ्यमविन्दत । बुधवारे तु यस्स्नाति समाहितमना नरः ।।९५
ऋषिभिस्तूयमानस्तु स याति परमां गतिम् । सर्वत्रैवं प्रियं ब्रूयात् पाण्डवोदे वसन्पुमान्।।९६
अहितं नाभिभाषेत सर्वत्रैव क्षमी भवेत् । तिन्त्रिणीतरवस्तत्र रोहिता बहवो नरैः ।। ९७
न्यग्रोधाश्च वटा नागा यूथिकाश्च सहस्रशः।चाम्पेयाश्चम्पका बिल्वा मन्दाराश्चार्जुनास्तथा।।९७
कुन्दाश्च कोविदाराश्च तरवो हृदयंगमाः । उद्वहन् पवनश्चात्र तेषां गन्धं पदे पदे ।
विश्रमं हरते तेषां तपस्तीव्रं प्रकुर्वताम् ।। ९८

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये दशमोऽध्यायः ।।

एकादशोऽध्यायः

अगस्त्यः -

गिरेः प्रदक्षिणं कार्यं पुंसां यत्किञ्चिदिच्छता। ब्रह्मतीर्थादिकास्सर्वास्स्नातव्या दीर्घिकास्सदा।।१

महादेवः -

कस्मिन् तीर्थे कृतस्नानः कर्म विद्वान् लभेत् सदा । प्रदक्षिणं प्रकुरुते गिरेरस्य तटे तथा।।२

अगस्त्यः -

प्रदक्षिणद्वयं तत्र विज्ञेयं नगसत्तमे । महाप्रदक्षिणं विद्वानान्तरं च यथाक्रमम् ।।३
महाप्रदक्षिणं वक्ष्ये सावधानं निबोधय । यत्कृत्वा शौनकाद्यास्ते नृहरेराजगाम ह ।।४
त्रिपुरस्थपतिः प्राक् च प्राक्पथे द्व्यङ्कणाश्रमः। तमिन्द्रमिति विख्यातं तद्गतं दक्षिणापथे।।५
हेमशैलस्य शृङ्गे तु दृश्यते विविधद्रुमे । यस्मिन् तपस्यते शुक्रः वह्निकुण्डस्य पश्चिमे।।६
तस्य दक्षिणदिग्भागे ममाश्रम उदाहृतः । दृष्टमात्रस्त्वया ब्रह्मन् मत्तीर्थे गिरिगैरिके।।७
एतस्य पश्चिमपथे नन्दिग्राम इति श्रुतः । दूर्वासास्तत्र सततं तपते ऋषिशेखरः ।।८
नीलोत्फलसमाकीर्णं कारण्डवनिषेवितम् । तिष्ठते तत्र वै तीर्थं सोमकुण्डमिति श्रुतम् ।।९
चिरिबिल्वाश्च बिल्वाश्च सिन्धुवारा महाद्रुमाः। शोभन्ते ऋषयो यत्र दूर्वासाद्या उपासते।।१०
तस्याविदूरे धर्मात्मन् महाकाञ्चीति विश्रुता । वसते तत्र मद्भ्राता श्रुततीव्रतपा इति ।।११
तत्र पद्मसरोनाम प्राचीनं परिदृश्यते । जलनागा जलव्याला जलमत्स्या वसन्ति ते ।।१२
स्नातुकामान् ऋषीन् सर्वान्न बाधन्ते तदाज्ञया। तत्तीरे कुटजाः कूटशाल्मलीतरवस्तथा ।।१३
पाटलीपनसाश्वत्थनीपनागाः कपित्थकाः । स्वच्छच्छायाः प्रदृश्यन्ते पुष्पोदयफलोदयाः ।।१४
अस्माकमपि तत्रैव राजते जातुचिन्मनः । पुरा मुनिवरस्तत्र कञ्चित्कालं मया स्थितम् ।।१५
बिसिन्यास्तूत्तरे तीरे बहुभिर्मुनिपुङ्गवैः । तत्र रामस्सह भ्रात्रा ततः प्रादुरभून्मुने ।।१६
राममिन्दीवरश्याममाविर्भूतं मदन्तिके । आजानुलम्बितभुजमासीनं देवमुज्जवलम् ।।१७
चीरकृष्णाम्बरधरं जटिलं सुमहत्प्रभम् । अवलोक्य पटैर्दिव्यैः पूजामकरवं तदा ।।१८
दशाननवधार्थाय सोऽहं राममुपादिशम् । अस्त्रं चानुमयात्तस्मै भ्रात्रा सह निषेवते ।।१९
तत्र तेन सह भ्रात्रा स्नातुं सरसि निर्मले । मयानुज्ञापितो रामो दशास्यमजयद्रणे ।।२०
तत्र गन्धर्वपतयो मोचिता मदनुग्रहात् । हेमाङ्गदश्चित्ररथो हेमकेशो महारथः ।।२१

श्वेतकेतुश्च पञ्चैते गन्धर्वाणां धुरिस्थिताः । दत्तात्रेयाद्वरं लब्ध्वा दुर्मदा निवसन्ति वै ।।२२
दत्तदत्तवरास्सर्वे मदमत्तहृदस्तदा । स वयोभिश्च सन्नद्धैश्चापतूणीधरैश्च तैः ।।२३
ते कदाचिद्दुरात्मानः ब्रह्मलोकजिगीषया । धर्मराजपुरीं याता गन्धर्वपतयस्तदा ।।२४
किङ्करांश्शतशो दृष्ट्वा बाधमानान्विनादितान्। सर्वान्नरान् रौरवके नरकेषु निपातितान्।।२५
श्रुत्वा हाहाकृतं तत्र नरकस्थैर्जनैः कृतम् । तत्क्रोधवशमापन्नाः किंकरानिदमब्रुवन् ।।२६
हे किंकरा भवन्तः के बाधन्ते वा जनानिमान्। कस्य वा शासनं गृह्यनोऽभिशंसत निश्चयम्।२७
किङ्करास्ते महात्मानो भृत्या राजवशे स्थिताः।अलक्षीकृत्य गन्धर्वान् बाधन्ते निरये नरान्।।२८
ते दृष्ट्वा दुर्वरान् दग्धान् वरमत्तान्महात्मनः। किङ्करा लक्षयन्तो वै कूटमुद्गरपाणयः।।२९
पुष्टा प्रमुमुचुस्तेषु शरानासीविषोपमान्। पट्टसान्भिण्डिवालांश्च तोमरांश्छास्त्रसत्तमान्।।३०
विमुच्य तेषु सर्वेषु वितन्वति महास्वरम्। किङ्कराश्च मृधङ्कृत्वा चिराय सुमहाबलाः।।३१
जेतुं गन्धर्वराजेन्द्रान् न शेकुस्तत्र सर्वशः । गन्धर्वैश्च विनिर्मुक्ता निष्टप्ताश्शरपीडिताः।।३२
शरणं धर्मराजानं किङ्करास्समुपाययुः । गन्धर्वपतयो मत्ता इति वाचं प्रशंसिनः ।।३३
नरकान्मोचितास्सर्वे नरा इत्यभिशंसतः । स तानालोक्य धर्मात्मा पितृणामीश्वरस्तदा ।।३४
विज्ञाय धर्मराजस्तु दत्तात्रेयजरोदितान् । मदेन मुदितान् सर्वान् हेमाङ्गदमुखान् तदा ।।३५
मृत्युं कृत्वा पुरःकालः कालदण्डं प्रगृह्य वै। निर्गत्य सह सैन्येन कोपाविष्टः परेतराट्।।३६
ममाथ कालदण्डेन गन्धर्वेन्द्रान्विगर्वितान्। कालदण्डेन मथितान् गन्धर्वेन्द्रान्विगर्वितान्।।३७
कालत्रिकोऽपि तं दृष्ट्वा दत्तात्रेय व्यचिन्तयत्।विचिन्त्य सुचिरं कालं मां तीव्रतपसि स्थितम्।३८
वसन्तं तत्र संप्रेक्ष्य प्रत्यक्षमिदमूचिवान् ।

दत्तात्रेयः -

मया दत्तवराः केच गन्धर्वाणां तरस्विनाम् ।।३९
पतयः पञ्चनगरीं गता धर्मपतेरमी । तान्वीक्ष्य सुदुराधर्षान् कालकिङ्करचोदितः ।।४०
दण्डमुद्यम्य चोद्युक्तः प्रहर्तुं मुनिपुङ्गव । कालदण्डो दुराधर्षो भविता च वचो मम ।।४१
यथार्हति तथा त्वं वै कुरु तत्र गतो मुने । स्वामिबुद्धिं विधधते त्वयि सर्वे सुरर्षयः ।।४२
यतो नरहरिस्साक्षादध्यास्ते भवदाशये । इत्यहं बोधितस्तेन धर्मराजमुपेत्य वै ।।४३
दत्ताज्ञां च पुरस्कृत्य गन्धर्वांश्च व्यमोचयः। मया सुबोधिता ह्येते धर्मराजाद्विमोचिताः।।४४
पञ्चगन्धर्वपतयो न्यवसन् भ्रातुराश्रमे। ते मया बोधिता नित्यं धर्म्यं पन्थानमाश्रिताः।।४५
कृतावगाहाः पद्मोदे ब्रह्मर्षिगणसेविताः। उषित्वा सुचिरं कालं तपः कृत्वा सुदारुणम्।।४६

विधूतमददुर्गर्वाः प्रयातास्त्वां पुरीं पुरा । तत्र ये पितृदेवांस्तु तर्पयन्ति द्विजर्षभाः ।।४७
तुलसीकाननं ये वै बिल्वानारोपयन्ति ये। ते सर्वे मत्प्रसादेन मम भ्रातुश्च वैभवात् ।।४८
नृहरौ भक्तिमन्तस्तु सात्त्विकाः प्रभवन्ति वै । पश्चिमे तस्य दृश्यन्ते वृक्षा गगनहेलिनः।।५०
सततं फलपूर्णास्तु पूर्णास्सर्वर्षिसत्तमैः । ते तु वाल्मीकिना सम्यग्वर्धिता मुनिना सदा ।।५१
शाखोपशाखा शोभन्ते भूरुहः पुष्पशालिनः । वाल्मीकेराश्रमपदं तत्रैव प्रतिभासते ।।५२
कुर्वन्ति नियताहारास्तपो यत्र सुरर्षयः । पुरा स ऋषिशार्दूलस्तपस्तेपे महातपाः ।।५३
सप्ताशीतिसहस्राणि वर्षाणि नियतव्रतः । निरास्थस्य मुनेस्तस्य जलपर्णाशनादिषु ।।५४
वल्मीकभूतदेहस्तु सर्वाणामभवत् पदम् । तस्मिन् काले प्रजानाथो नारदेन प्रचोदितः ।।५५
तस्याश्रमपदं भेजे सरस्वत्या पितामहः । वीक्षमाणो दिशस्सर्वा वंशपुञ्जमवैक्षत ।।५६
तत्र वल्मीकभवनं प्रजानां पतिरुत्तमम् । स विस्मयाकुलो वाणीमभाणीदन्तिकस्थिताम्।।५७

ब्रह्मा -

प्रिये पश्य महात्मायमात्मानं नावबुध्यते । ईदृशी भक्तिरन्येषां नृहरौ नैव केवलम् ।।५८
अयं तु कुरुते तीव्रं निराशी तप उत्तमम् । मयापि शङ्करेणापि दुरवापमिदं प्रिये ।।५९

अगस्त्यः -

इत्युक्त्वा स गिरां देवीं वल्मीकस्य पदं गतः। दैवतैस्स्तूयमानो वै प्राह गम्भीरया गिरा।।६०
उत्तिष्ठोत्तिष्ठ भद्रं ते अस्माद्वाल्मीकतो मुने । चतुर्मुखोऽयमभ्येति भवदीयाश्रमं पदम् ।।६१
इति संबोधितस्तस्य वचनैव महातपाः । तस्माद्वल्मीकतो मुक्तिस्सर्पस्त्वच इवाभवत् ।।६२
बहिर्निर्गत्य तेजस्वी कमण्डलुनबोदकैः । नयने मार्जयन् पार्श्वे ब्रह्माणं दृष्टवान् मुनिः ।।६३

वाल्मीकिः -

धातश्चेमानि भूतानि जायन्ते हि जगत्पते। येन जातानि जीवन्ति यत्प्रयान्ति नमोस्तु ते।।६४
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । नमस्ते पृष्णिसंस्थाय ब्रह्मणे परमेष्ठिने ।।६५
यस्याज्ञया तिष्ठतीदं जगत् स्थावरजङ्गमम् । नमो वेदान्तवेद्याय ब्रह्मणे ते महात्मने ।।६६
भगवन् त्वन्मुखे भाति यथा गीर्देवता सती । इयं हि सर्वभूतानां कुरुते स्वरभेदनम् ।।६७
पाशाङ्कुशधरा वाणी वीणापुस्तकधारिणी । एषा वसति सर्वेषु मुग्धकुन्देन्दुनिर्मला ।।६८
इयं प्रसन्ना नृणां वै प्रवर्तयति संपदः । दीर्घमायुश्च निरतं कवितां च सुधामयीम् ।।६९
सैषा सुधास्वधास्वाहा स्तुतिश्च धृतिरेव च। गायत्र्यादीनि छन्दांसि ब्रह्मन्नस्यां भवन्ति वै।।७०
हीर्धीर्भीरपि संपुष्टिर्निद्रा हिंसा तथा मतिः । इयं देवी भगवती दुर्गा लक्ष्मी सरस्वती ।।७१

छाया सुवर्चला सेयं एकाकी बहुरूपिणी ।

अगस्त्यः -

इति स्तुवन् मुनिश्रेष्ठः परमेष्ठिनमन्तिके ।।७२

अध्यासीनं गिरा सार्धं दण्डवत् प्रणनाम ह। उत्थाप्य भगवान् ब्रह्मा प्रणमन्तं मुनीश्वरम्।।७३

संस्थाप्य पार्श्वभागे तं प्राह सूनृतया गिरा।

ब्रह्मा -

अमुना तपसा भूम्ना यस्माद्वल्मीकतो जनिः।।७४

अभवत्ते ततस्सद्भिस्तस्माद्वाल्मीकिरुच्यते। इत्थं निर्गलिता वाणी वाल्मीके भवतो मुखात्।।७५

पुरा हि मा निषादेति श्लोकरूपिण्यनुत्तमा। व्याकुलस्त्वं नदीतीरे किमेतदिति चिन्तया।।७६

मुनिस्तु वैणिको ब्रह्मन् तदा ते निकटं गतः । तद्वाक्यान्नृहरेः पादे शैलस्य क्रियते तपः।।७७

आनुपूर्व्येण भगवानेष ते बोधयिष्यति । तदहं वचसा देव्यास्सर्वैरपि सुरोत्तमैः।।७८

तव प्रशंसां च कीर्तिं च दातुकाम इहागतः। अद्य प्रभृति कीर्तिस्ते ब्रह्मन् तेजो मदीप्स्यसि।।७९

वचो देवी भवद्वक्त्रे प्रादुर्भवति भारती । ब्राह्मणैः क्षत्रियैर्वैश्यशूद्रैरपि समादृतम्।।८०

काव्यं रामायणं नाम करिष्यति भवान् मुने । अनन्यसुलभा कीर्तिस्ते समाविर्भविष्यति।।८१

भविताऽऽदिकविस्त्वं हि त्रिषु लोकेषु विश्रुतः ।

अगस्त्यः -

मन्त्रपूतं जलं गृह्य कमण्डलुमुखाच्च्युतम् ।।८२

सारस्वतमनुं तस्मै सोपदेश्य दिवं गतः । सारस्वतमनुं ग्राह्य ब्रह्मणो वचनाच्च्युतम् ।।८३

गिरां देवीं मनसि वै संस्थाप्य ध्यानमास्थितः। गिरां देव्यनुभावेन वाल्मीकिर्मुनिपुङ्गवः।।८४

कृत्स्नं रामायणं तत्र व्याकरोन्नृहरेः पदे । तस्याश्रमपदे तीर्थं रामनामाङ्कितं महत् ।।८५

तत्तीरे भूरुहः पञ्च पुष्पिणः फलिनस्सदा । आम्रः कपित्थः पनसो नारिकेलोऽथ जम्बुकः ।।८६

इमे हि पञ्च तरव ऋषीन् संप्रीणयन्ति वै। तस्योत्तरस्यां दिशि वै शिलाकूट इति श्रुतः।।८७

यस्तु योगनृसिंहादेः पादोत्तम इतीर्यते । तत्र सर्वेषु च स्वैरं षड्जस्वरविहारिणः ।।८८

बर्हिणः परिहृष्यन्तः परिनृत्यन्ति सर्वशः । स तनोति तपस्तीव्रं मन्ता तत्र ऋषीश्वरः ।

यस्य विष्णुश्च रुद्रश्च ब्रह्मा तनुभुवः पुरा ।। ८९

इति ब्रह्मकैवर्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये एकादशोऽध्यायः।।

द्वादशोऽध्यायः

वामदेवः -

ब्रह्मन् ब्रह्मादयो देवास्सङ्गताः पुत्रतां पुरा । अत्रेरस्य प्रभावं वै वद मे वदतां वर ।।१

अगस्त्यः -

पुरा तु सिंहलद्वीपे सिन्धुद्वीपर्षिचोदितः । और्वो नाम तपस्श्रेष्ठः पुत्रकामश्चकार ह ।।२
निराहारो जितक्रोधो यस्मिन् पुष्करसत्तमे । स ब्रह्मर्षिगणैरीड्यो विष्णुभक्तिपरोऽभवत् ।।३
वैष्णवोऽसौ द्विजातेषु दृष्टेषु भरतर्षभ । संफुल्लमानस्तापसे स क्षेत्रस्तापसस्सदा ।।४
सतां प्रीणयते नित्यमनाहारो जितेन्द्रियः । जितामर्षो जितोऽयस्तु विष्णुभक्तिपरायणः ।।५
और्वस्त्रिषवणस्नायी वासुदेवकृताशयः । त्रिसन्ध्यं वन्द्यमानो वै वैष्णवानृषिसत्तमान् ।।६
तस्य शुश्रूषते भार्या श्रुतकीर्तिरिति प्रिया । अरुन्धतीव भर्तारमनिन्द्यगुणशालिनी ।।७
भर्तुर्विलम्बमसहा भर्त्रनन्तरभोजिनी । भर्तुर्विलोकनपरा नित्यं भर्तृहिते रता ।।८
सा सत्यवादिनी साध्वी विष्णुभक्तसहोदरी । उपास्ते पुत्रकामा वै वैष्णवांश्च द्विजर्षभान् ।।९
ते सर्वे ऋषयस्तत्र वैष्णवाः पुत्रमिच्छतोः । दम्पत्योर्विनमन्त्योर्वै व्रतं वीक्ष्येदमब्रुवन् ।।१०

ऋषयः -

यद्वयं वैष्णवा विष्णो यद्वयं वेदवादिनः । वाक्कायमनसैः शुद्धाः प्रसन्नो भविता भवान् ।।११
षट्त्रिंकबन्धमया देवा गौरवं ग्रहणं तथा। अनुल्लङ्घितमस्माभिः प्रसन्नो भविता भवान् ।।१२
तत्कृत्वा भक्तिरन्यासु देवतासु कदाचन। कृता न चेद्यदास्माभिः प्रसन्नो भविता भवान् ।।१३
कायेन मनसा वाचाप्याचार्ये दैवते गुरौ । भक्तिमन्तो यदि वयं प्रसन्नो भविता भवान् ।।१४
विद्यावृत्तं विबोधो वा विनयो वाऽथ शेमुषी। धर्मस्सत्यं सदास्मासु प्रसन्नो भविता भवान् ।।१५
परदारपरद्रव्य परहिंसापराङ्मुखाः । वयं यदि महाविष्णो प्रसन्नो भविता भवान् ।।१६
जिता यद्यरयो देव जिता यदि षडूर्मयः। प्रीतिः कृता चेत् सर्वत्र प्रसन्नो भविता भवान् ।।१७

अगस्त्यः -

इत्थं प्रबोधितो विष्णुर्लक्ष्मीवान् शुभलक्षणः । प्रादुर्भवन्नाह गिरा तेषामग्रे प्रसन्नया ।।१८

भगवान् -

त्वद्विधा वैष्णवा लोके न भवन्ति कदाचन । प्रसन्नो भवतामग्रे वाञ्छितं करवाण्यहम् ।।१९

ऋषयः-

यदि प्रसन्नो भगवानस्माकं पुरतो भवान् । और्वाय पुत्रसंपत्तिर्दीयतां निरवग्रहा ।।२०

श्रीभगवान् -

अथाह तान् महानासीज्जम्बूद्वीपे महर्षयः । हनुमत्पर्वतो नाम तत्रास्ते मम वासभूः ।।२१
चतुर्दशास्य शृङ्गाणि प्रसेव्यन्ते सुरर्षिभिः । तेषु द्वे शिखरे रम्ये सनकादिनिषेविते ।।२२
तत्र दक्षिणशृङ्गाग्रे ममैव भवनं विदुः । तत्र ब्रह्मर्षिदेवर्षिपूजितं भवसेवितम् ।।२३
हिरण्मयं तद्विमानं हेमकोटीति विश्रुतम् । पुराऽहं प्रार्थितो देवैर्हिरण्यनिधनेच्छुभिः ।।२४
सिंहरूपं समास्थाय मया तस्य वधः कृतः । तदा सर्वा मिलित्वा वै देवता इदमूचिरे ।।२५
नरोत्तमार्थं भगवान् नरसिंहाभिधो भवान् । इदं तत्त्वाभिधां गृह्य देवास्सेन्द्रास्सहर्षिभिः।।२६
स्तुवन्ते हृष्टमनसः प्राप्नुवन्ति यथागतम् । हिरण्यकशिपोः पुत्रः प्रह्लाद इति विश्रुतः ।।२७
आजन्मसिद्धमद्भक्तिपरिणामप्रसन्नधीः। इदं होवाच मामेत्य बालः प्रह्लादनो नृणाम् ।।२८

प्रह्लादः -

विष्णो भीममिदं रूपं संहरेति स भक्तिमान् । प्रशान्तो योगनृहरिस्तदा तेन प्रबोधितः ।।२९
सात्त्विको भावमव्यग्रस्सर्वर्षिगणसेवितः । संयोगं हृदये कृत्वा कर्म कर्मविदां वरः ।।३०
अहं हनुमतश्शैलं प्रह्लादेन प्रचोदितः । तत्र भक्तपराधीनो हेमकोटिविमानगः ।।३१
प्रादुर्भूतस्तु तत्राहं प्रददामि शुभं नृणाम् । बिम्बो मे सर्वदा तत्र हेमकोट्यां विराजते ।।३२
यथा सन्निहितस्तत्र तथा प्रादुर्भवाम्यहम् । शुकादयस्तु ऋषयो भवितारो मुमुक्षवः ।।३३
तपांसि कुर्वते तत्र मद्भक्ता मत्परायणाः । वसिष्ठाद्याश्च ऋषयस्सप्तसप्तार्चिरर्चिषः।।३४
सामीप्यं प्राप्तुकामास्तु कुर्वते केवलं तपः। चतुर्णां पुरुषार्थानां काङ्क्षिणश्च पृथक्पृथक्।।३५
कतिचित्पर्णभक्षास्तु चरन्ति तप उत्तमम् । सान्निध्यं कर्तुकामोऽहं हेमकोटिपदे स्थितः।।३६
प्रीणयिष्यामि सततं ब्रह्मर्षीन् भावितात्मनः। वसिष्ठः कश्यपश्चात्रिर्जमदग्निश्च गौतमः ।।३७
भरद्वाजोऽपि धर्मात्मा तपस्यति शिलोच्चये। सवित्रैर्वाभ्यनुज्ञातो ब्राह्म्यमिच्छन् महातपाः।।३८
विश्वामित्रस्तु हनुमच्छैलराजमुपेष्यति । शैलस्य पश्चिमपथे शिलाकूटे महर्षिभिः ।।३९
पूज्यमानस्तपस्तीव्रं मन्त्रिराट् तनुते सुधीः। संस्तुतो यदि धर्मात्मा तपस्तीव्रो जितेन्द्रियः।।४०
सभार्याय प्रजां स्निग्धामत्रिरूर्वाय दास्यति । अहं च तुष्टो देवर्षिगणवाक्येन चोदितः ।।४१

अत्रेः पुत्रत्वमापन्नो मार्जये पैतृकं ऋणम् ।

अगस्त्यः -

इत्युक्त्वा भगवान् तान् वै सनकादिप्रपूजितः ।।४२

लक्ष्म्या सह हृषीकेशश्शीघ्रमन्तरधीयत। अथ ते ऋषयस्तत्र वत्साद्या हृष्टचेतसः ।।४३

ऊचुः प्रसन्नया वाचा तमौर्वं ऋषिसत्तमम्।

ऋषयः -

श्रुता हि भगवद्वाचा भवता ऋषिसत्तम ।।४४

गच्छ शीघ्रं महाशैलमत्रेराश्रममुत्तमम् ।

अगस्त्यः -

इति संसूचितस्त्वौर्वः पुत्रार्थं सह भार्यया ।।४५

अत्रेराश्रममासाद्य लब्धवान् पुत्रमुज्ज्वलम् । एतस्याश्रममभ्येत्य स्नाति वज्रसरोजले ।।४६

अत्रेः प्रसादात् सर्वे ते लभन्ते पुत्रसंपदः । नारङ्गा नारिकेलाश्च पूगा जम्बीरजम्बवः।।४७

रसालामलकाश्चात्र सर्वे च फलशालिनः। तस्य शीलवती नाम कन्याऽत्रेर्भाविणात्मनम्।।४८

स दक्षिणां गतश्चाशामौर्वोऽत्युग्रतपामुनिः। सुवर्च इव मार्ताण्डमुद्वाह्योग्रतपो मुनिः ।।४९

तस्या भर्ता सुदुष्टात्माऽन्यस्त्रीसक्तमनास्सदा। ताम्रपर्णानदीतीरे वासं चक्रे सुदुर्मदः ।।५०

तथापि तस्य शुश्रूषां कुरुते धर्मचारिणी । सदा व्यग्रमनास्साध्वी भर्तुरीप्सितकर्मसु ।।५१

केनचित् त्वथकालेन तस्योग्रतपसो मुनेः । अगम्यागमनद्वारा व्याधिरासीद्दुरासदा ।।५२

बहिर्निर्गमने शक्तिर्नैव तस्य बभूव ह । आहारादौ स्पृहा नैव फलादीनां मुनेरभूत् ।।५३

यत्र वेश्योद्भवा गीता यत्र गीता मनोरमा । यत्र हास्यकथास्तत्र स करोति सदा मनः ।।५४

सन्ध्याकर्मसु नैवासीन्मनस्तस्य कदाचन। वेदाश्च विस्मृतास्तेन शास्त्राणि विविधानि च।।५५

पूतिगन्धस्तुतस्याभूत् सर्वैरपि च दुस्सहः। कुत्सितं वपुरास्थाय ग्राममध्ये स्थितोऽभवत्।।५६

तस्य शीलवती भार्या सततं प्रियभाषिणी। पदे पदे वीक्षमाणागृह्य प्रियमपोषयत् ।।५७

स्यन्दमानाञ्चलालां वै मार्जयन्ती पटाञ्चलात्।शोणितानि स कीटानि महाग्रन्थिशतानि च।।५८

व्याधेः प्रतिक्रियामस्य कोऽपि लोके वदेत्प्रभुः। इत्यस्या महती चिन्ता यदा प्रादुरभून्मुने।।५९

तदाऽशरीरवचनमन्तरिक्षे बभूव ह । मा भीतिः क्रियतां वत्से हरिष्यामि तव व्यथाम्।।६०

दिव्यञ्च रूपं भर्तुस्ते प्रभविष्यति बालिके। त्वय्येव भर्ता निरतो रम्स्यते नात्र संशयः ।।६१

उत्तरस्यां दिशि महान् दृश्यते हनुमद्गिरिः। तस्यैव भविता नाम घटिकाचल इत्यपि ।।६२

तत्रास्ते जनकस्तेऽत्रिरनसूया च तत्प्रिया । वत्से तत्पार्श्वमभ्येहि सर्वं तद्वेदयिष्यति ।।६३
इत्यनुज्ञापिता साध्वी भर्तारं गृह्य पाणिना । आरोपितकटीभर्त्रा प्रययौ उत्तरां दिशम् ।।६४
विज्ञातुमस्य माहात्म्यं बहुशोऽभिप्रशोभितम् । नृहरिः कल्पयामास दूरमध्वानमात्मनः ।।६५
अनेकशतवर्षाणि गामिनी पथि भामिनी । साध्वी प्रगृह्य भर्तारं चिन्तया सह दुःखिता ।।६६
मूर्छालुरेव भविता श्वोभूते व्याधिपीडितः। कुत्सितोऽपि चिरायुर्वा जीवेदिति हि मे मतिः।।६७
दीर्घमायुश्च ते भर्ता दिव्यरूपञ्च यास्यति। इति यद्युदितं वाक्यं नभसा किमु सांप्रतम् ।।६८
कियद्दूरं भगवतो नृहरेरचलस्य वा । अमुना हि वनेनाहं शक्नुयान्न निषेवणे ।।६९
इति चिन्त्य वरारोहा भर्तुराज्ञास्पृहा सती। हुत्वा वह्निमुपस्थाय प्राब्रवीत्प्राञ्जलिस्तदा।।७०

शीलवती -

यदि प्रसन्नो भगवान् चित्रभानुर्मया हुतः। यद्यस्ति मयि साध्वी त्वं मा भवित्री विभावरी।।७१

अगस्त्यः -

इति सा शंसिता देव्याशीलवत्या विभावरी। नालमागमनायाभूत्तपस्वी ब्राह्मिणीस्थलम्।।७२
मार्ताण्डोत्थारुचिर्मध्ये नभः प्रतपदंशुकः। द्विजर्षभस्तूयमानः पूज्यमानः पदे पदे।।७३
त्रिमूर्तिरनघोऽचिन्त्यो द्वादशात्मा दिवाकरः । कर्मसाक्षी नभोमध्ये प्रांशुको वै व्यजृम्भत।।७४
चिरायमाणो मार्ताण्डो मध्ये व्योमपदं तदा। ऋषयश्चिन्तयामासुर्यज्ञकर्मसु कोविदाः।।७५
दिनानां संख्यया शून्याः ज्योतिष्टोमादिकाःक्रियाः। कर्तुं न प्रभवोलोके ऋषयो धर्मचारिणः।।७६
दुष्टात्मानस्तु मन्देहास्तदानीं राक्षसाधमाः । वर्धते जनतास्सर्वा अर्घ्याभावेन गर्विणः।।७७
स्वर्गात्प्रच्यावयन्ति स्म सेन्द्रानपि मरुद्गणान्।धनदञ्च महात्मानं वरुणञ्च जलाधिपम्।।७८
सर्वाधिपत्ये ते सर्वे मन्देहा नाम राक्षसाः । द्विजानामर्घ्यराहित्याद्दुश्चिन्ताश्च बभूविरे।।७९
सन्ध्यासु ब्राह्मणाश्चापः त्रिरूर्ध्वं विक्षिपन्ति हि।ता आपो वज्रसदृशाः मन्देहान्दारयन्ति हि।८०
मन्त्रपूतार्घ्यराहित्या दुर्मदा गर्वभूषिताः । क्रुद्धास्ते राक्षसास्सर्वे बाधन्ते बहुशो जनान्।।८१
तेषां महत्वं विज्ञाय सेन्द्राविष्णुपुरस्सराः । ब्रह्माणं शङ्करञ्चापि पुरस्कृत्य च देवताः।।८२
ततो हनुमतश्शैलं नृहरिस्थानमुत्तमम् । अभ्येत्य पश्चिमे शृङ्गे ददृशुर्मुनिसत्तमम् ।।८३
अनसूयामपि मुनेर्धर्मपत्नीं यशस्विनीम् । ददृशुर्भक्तिनिरतां छायामिव दिवाकरे ।।८४
अथावलोक्य ते सर्वे दिविस्थास्समुपागताः । अब्रुवन्निदमत्रेस्तु भामिनीं धर्मचारिणीम् ।।८५
ब्रह्मविष्णुशिवा देवि त्वत्सन्निधिमुपागताः । अभ्येत्यैवासते पुण्यः त्वद्दाम्पत्यव्रतेन च ।।८६
अनसूये त्वया भर्त्रा निरसूयं तपः कृतम् । इदानीं फलितं तत्ते श्रीनृसिंहपदाश्रयात् ।।८७

इहावतीर्णा देवि त्वत्पार्श्वे नारायणादयः । देवा देवि प्रसादं ते कीर्तिञ्च तपसां बलात् ।।८८
कन्या शीलवती याते तया सा शापिता निशा। शून्या भवेति यदि तन्मूर्छागमनशङ्कया।।८९
तदाप्रभृति मन्देहा बाधन्ते ब्राह्मणानिमे। अनुस्मरन्तः पूर्वाणि वैराणि जगतीतले।।९०
त्वया मानयितव्या ते कन्या शीलवती सती । मानिता यदि सेदानीं शर्वरीमुद्धरिष्यति ।।९१
ततो निशम्य तां वाचमनसूया सुधामयीम् । शिरस्यञ्जलिमाधाय प्राप्य कन्यामभाषत ।।९२

अनसूया -

प्रसिद्धकन्ये भवति प्रशंस त्वं निशां प्रति। आगच्छेति महाधर्मलोपो मा प्रास्यदां त्वया।।९३
ब्रह्मादयोऽपि ते देवा इदमूचुरुपेत्य माम् । त्वद्दाम्पत्योद्धृतं रक्षो बाधते जनता इति ।।९४

अगस्त्यः -

इति संबोधिता मात्रा तथेति प्रत्यभाषत । तस्मिन्नेव क्षणे शैलमद्राक्षीन्नृहरेः पदम् ।।९५
ततो देवा वरं तस्यै मुनेरत्रेर्नतभ्रुवे । ददुस्ते पुत्रकामा ये पद्मनाभमुखास्तदा।।९६
देवि प्रसन्नो भगवान् विष्णू रुद्रः पितामहः। एते त्रयो ह्यपत्यार्थे विनियुक्ता भवन्त्विमे ।।९७
इह वज्रसरो नाम शिलाकूटे विशोभते । अत्र स्नानेन तपसा वज्रिभूतो भविष्यति ।।९८
इति दत्वा वरं तस्मै देवतास्स्वस्थचेतसः । ब्रह्मादयो महात्मानः प्रययुस्स्वस्वमन्दिरम्।।९९
दूर्वासाश्शङ्करस्यांशो दत्तात्रेयस्तु वैष्णवः। ब्रह्मा तु चन्द्रमा अत्रेः पुत्रत्वे तेऽभवंस्तदा।।१००
स च तस्मिन् सरसि वै स्नातो विगतकल्मषः। वज्रीकृतशरीरोऽभूच्छीलवत्या मनोहरः।।१०१
वज्रपुष्करिणीमेत्य यस्स्नाति सह भार्यया। स पुत्रवान् चिरायुस्तु स भवत्यत्रिशासनात्।।१०२
तस्याः प्रागन्तरे पार्श्वे भरद्वाजाश्रमो महान्। बहुपादपसंशोभी दृश्यते ऋषिसेवितः।।१०३
पुरा तत्र महाराजो भरतो नाम वीर्यवान् । साकेतवासी धर्मात्मा रघुवंशविवर्धनः ।।१०४
रावणापहृता भार्या ज्येष्टभ्रातुरितीर्षया । चतुरङ्गबलोपेतस्सहायकरणाय सः ।।१०५
शत्रुघ्नेन सह भ्रात्रा सर्वशस्त्रभृतां वरः । रथमारुह्य सैन्येन प्राप्तवान् स मुनेः पदम् ।।१०६
भरद्वाजाश्रमपदं प्राप्य रामानुजो बली । विसर्जयित्वा सैन्यानि तदाश्रमपदं ययौ ।।१०७
स निशम्य भरद्वाजं शिष्यवाक्येन राघवः । प्राप्तस्सुमन्त्रिणा राजा शत्रुघ्नेनानुमोदितः ।।१०८
अथ तौ मुनिशार्दूलो राघवौ पदसेविनौ । प्रेक्षयामास तेजस्वी प्रहृष्टेनान्तरात्मना ।।१०९
नृहरेस्तु प्रसादेन भरतस्य महात्मनः । स सैन्यस्य तथातिथ्यं भरद्वाजश्चकार ह ।।११०
पदे पदे वर्धमानैः फलमूलरसादिभिः ।तोषयामास सर्वास्तान् नृहरेरनुभावतः ।।१११
पूजान्ते मुनिशार्दूलो विदित्वा स तदागमम् । रामानुजं महात्मानमूचे मधुरया गिरा ।।११२

भरद्वाजः -

रामस्तवाग्रजो धर्मवत्सलो नयकोविदः । निहत्य रावणं संख्ये स्वभार्यां प्राप्नुवानि ह।।११३
क्षिप्रमेष्यति धर्मात्मा सभार्यस्ससुहद्गणः। गृह्याग्रजन्मनोऽनुज्ञां रक्ष राज्यं समेत्य वै ।।११४
अद्यागतोऽहं नृपते सहागस्त्येन धीमता। रामरावणयोर्युद्धं निरीक्ष्य सह दैवतैः ।।११५
प्रतिगृह्य वचस्तस्य यातुकामः पुरीं प्रति। इदं होवाच भरतस्सत्कृतिं श्लाघयन् वचः।।११६

भरतः -

स्वामिन्नक्षौहिणी सेना तोषिता भवताऽनघ । आश्चर्यमेतद्वद मे तपः कीदृशमार्जितम् ।।११७

भरद्वाजः -

अयं नृप महाशैलो दृश्यते धातुमण्डितः । अत्रास्ते भगवान्विष्णुस्सिंहरूपीश्रिया सह।।११८
अथ तस्योत्तरे पादे यो माया सेव्यते सदा। अत्र कल्हारसरसि नित्यं कल्हारभूषिते ।।११९
तपस्यतामृषीणां वै किं किं न भविता नृप । ब्रह्मनृसिंहशैलोऽयमद्य प्रभृति गण्यताम् ।।१२०
चिन्तामणिरिति स्वैरं तृप्ता येन चिराद्वयम् ।

अगस्त्यः -

भरद्वाजाभ्यनुज्ञातो भरतस्सह सेनया ।।१२१
हृष्टचेता सह भ्रात्रा साकेतं प्रययौ तदा । तदा प्रभृति शैलोऽयं चिन्तामणिरितीर्यते।।१२२
ये तपस्यन्ति शैलेऽस्मिन् तपस्विष्वीप्सितप्रदे। कुर्वते ये तपस्तत्र कल्हारोदनिषेविणः ।।१२३
चिन्तामणीशसान्निध्यान्नित्यतृप्ता भवन्ति हि । नृसिंहनगरी तस्य पुरो भागे महामते ।।१२४
दृश्यते विष्णुभक्तानामास्पदं भावितात्मनाम्। सुरथोनाम धर्मात्मा तिष्ठते पालयन्प्रजाः।।१२५
धनानामधिपो राजा तां पुरीमलकामिव । इतः परं तु भविता इन्द्रद्युम्नो नृपोत्तमः ।।१२६
सौरीमिव पुरीं तत्र रक्षिष्यति पुरीमिमाम् । तत्र भक्तोचित इति प्रथां कृत्वा सह श्रिया।।१२७
कामिदं पूरयन्नृणामास्ते नारायणस्स्वयम् । बसन्तकाले नृहरिर्ग्रीष्मे तत्रावतारयेत् ।।१२८
चिक्रीडतो श्रिया मासे मार्गशीर्षे तु फाल्गुणे।उत्सवानान्तु सप्तानां पदं भक्तोचितस्स्वयम्।१२९
अनुगृह्णाति भूतानि तदायातानि भूतले। सप्तर्षिभिः कृता पूर्वं इमे सप्त महोत्सवाः।।१३०
पञ्चानामपि बिम्बानामुत्तमोऽयमुदीर्यते । अतो भक्तोचिते बिम्बे नित्यं सन्निदधाति सः।।१३१
अत्र वैखानसानाम पूजकास्तु प्रकीर्तिताः। अभ्यर्हिताश्श्रीनृहरेर्वसन्त्यागमकोविदाः ।।१३२
तत्र दीर्घसरो नाम सततं दीर्घपङ्कजैः । तत्र दीर्घाश्च तरवः स्नाता दीर्घायुषो नराः।।१३३
गन्धर्वाणाञ्च मरुतां किन्नराणां शतं शतम्। बृन्दं बृन्दं च यक्षाणां चिक्रीडति सरस्तटे।।१३४

इमानि श्रीनृसिंहाद्रिपादाश्रमपदानि च । प्रदक्षिणीकृत्य नरो मुच्यते सर्वकिल्बिषात् ।।१३५

इदं गिरेरस्य महाप्रदक्षिणं प्रकुर्वते ये नृहरेरनुज्ञया ।

सुखी भवन्तो मनुजास्तथासुराश्चिरायुषो जाग्रति सद्भिरीडिताः ।।१३६

गुरोर्मुखाद्यश्शृणुते महात्मा तच्छायमेतच्चिरभक्तिशाली ।

ददाति तस्मै नृहरिः प्रसन्नो ह्यायुश्च विद्यां च यशश्च मुक्तिम् ।।१३७

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये द्वादशोऽध्यायः ।।

त्रयोदशोऽध्यायः

अगस्त्यः -

अतः परं च वक्ष्येऽहमान्तरं च प्रदक्षिणम् । यत् कृत्वा लभते सर्वसंपदो निरूपाधिकाः ।।१

ब्रह्मणा सृष्टिकर्तृत्वं कुबेरेण धनेशता । स्वर्गाधिपत्यमिन्द्रेण यत्कृत्वा प्रापितं पुरा ।।२

ब्रह्मतीर्थे पुरा स्नानं कर्तव्यं फलमिच्छता । वेदानध्यापयन्नास्ते यत्र शिष्याननेकशः ।।३

विश्वामित्रस्तु राजर्षिः ब्रह्मतेजोभिलाषवान् । तपांसि कृत्वा तत्रैव प्रादुरेष्यति सानुगः ।।४

कर्तव्यं भैरवोदे च स्नानं पुंसाभिलाषिणा । पुमर्थान् लभते तत्र चतुरश्चतुरोपि सः ।। ५

अनन्तरं हलावर्ते तपः कर्तव्यमेव हि । ततो गौतमतीर्थे वै स्नातव्यं फलकाङ्क्षिभिः ।।६

तस्योत्तरे पथे भूमौ महावनमिति श्रुतम् । ऋक्षाणामधिपो यत्र तपश्चरति जाम्बवान् ।।७

तत्र जाम्बवती नाम कन्या तस्याभवन्मुने । यया तु भगवान् विष्णुर्लङ्घितप्रथमाश्रमः ।।८

पुरा जाम्बवती नाम कृष्णं भर्तारमिच्छती । बोधिता वायुना तत्र तपः कृतवती महत् ।।९

काले तस्मिन्निरालम्बां निराहारां तपस्विनीम् ।वीक्ष्य विस्मयमापन्नो वराहः कोऽप्यचिन्तयत् ।।१०

वराहः -

अष्ट वर्षाणि कन्येयं दुश्चरं तनुते तपः । अशक्यमीशानमुखैस्सुरैरेव न संशयः ।।११

जलं पर्णं फलं वापि कन्दमूलं तथादरात् । अयाचितव्रतानां वै दातव्यं दर्शनक्षणात् ।।१२

इतो हि दृश्यते वल्ली पूर्णकन्दा ह्यनिन्दिता । एतामुत्कृत्य कन्यायै एतस्मै प्रददाम्यहम् ।।१३

अगस्त्यः -

इति सञ्चित्य पोत्रीन्द्रः धर्म्यां पन्थानमाश्रितः। पाणिभ्यां घोणया पद्भ्यामखनन्मेदिनीं शनैः।।१४

खात्वा भूमिं तदा कोलो घर्घरध्यानशोभितः। दीर्घकन्दां महावल्लीं मन्दं मन्दं चकर्ष सः ।१५

लतायां गृह्यमाणायां मध्ये विघ्नो महानभूत्। पार्श्वस्था च शिला तत्र महती निरूपाधिकी।।१६
त्रुटिताभून्महावल्ली मध्येकूटं तु पोत्रिणा। पोत्री च चिन्तयामास त्रुटितां तस्य वल्लरीम्।।१७
चिन्तयित्वा वराहस्तु घोणयोद्धृत्य तां शिलाम्।करेण कन्दमुत्पाट्य व्यनैषीद्बहिरङ्कणम्।।१८
अथ दृष्ट्वा तु तां मूले भिद्यमानं नवं पयः। तत्रत्यै ऋषिभिर्दान्तैः प्रथमानं सदा भवेत् ।।१९
वनकोलस्तदा दृष्ट्वा ददर्श बिलमादरात् । पयः पत्रपुटे गृह्य सकन्दरसमेदुरम् ।।२०
ततः स्निग्धां जाम्बवतीं निराहारां च कन्यकाम्। मुनिकन्यां जनैर्दत्ते वस्तुन्यपि निराशयाम्।।२१
अनालम्बामनाधारां तारामिव भुवं गताम् । केनापि हेतुनात्रत्यां विद्यामिव निरामयीम्।।२२
गन्धर्वानुज्ञया तीर्णां कन्यां वेदश्रुतीमिव। पार्वतीमिव भर्तारं काङ्क्षिणीं तपसि स्थिताम्।।२३
अनाविद्धामनाहारामष्टवर्षामनिन्दिताम् । समीक्ष्य तां ततस्तस्यै ददौ कन्दं च वारि च।।२४
अनादरा सखीदत्तजीर्णपर्णाशनादिषु । वन्येन पोत्रिणा दत्तमादायेदमुवाच ह ।।२५

जाम्बवती -

अहो वराहो भगवान् कथमीदृशकर्मणि । प्रकल्पिते किमेतद्धि शंस मे त्वमन्यधीः ।।२६

वराहः -

पुराऽभूद्दण्डको देशे वराहध्वजनामभाक् । राजा सर्वस्य लोकस्य रथकुञ्जरवाजिमान् ।।२७
तस्याहमग्रजः पुत्रो नाम्ना सिंहध्वजो युवा । जनकेनादृतो नित्यं सर्वकर्मसु सम्मतः ।।२८
यौवराज्याभिषिक्तोऽहं गुरुणा नयशालिना । सर्वप्रीतिकरो नित्यं वैरिवंशविदारकः ।।२९
कदाचिदुद्भटैरश्वैस्सन्नद्धैरपि कुञ्जरैः । यौवने समये गर्वी युवभिः परिवारितः ।।३०
उद्भटैश्च भटैरश्वैः कोलाखेटविशारदैः । सायुधस्तुरगारूढः सोष्णिषो वनमेयिवान् ।। ३१
मृगयासमये कोऽपि वराहः प्रत्यदृश्यत । स भयानुद्रुतः पार्श्वं मुनेस्तण्डोरुपाविशत् ।। ३२
मुनेश्शापादहं तत्र सद्यः पोत्रीत्वमाप्तवान् । विज्ञाय सेना मां तत्र पोत्रिरूपिणमञ्जसा ।। ३३
प्रशशंसेदमखिलं भर्तुः पार्श्वमुपेत्य वै । निशम्य तद्वचस्सैन्यैः ज्ञायमानो वनं गतः ।। ३४
तण्डोरागमनाकाङ्क्षी प्रातिष्ठथ विचक्षणः। अथ शिष्येण केनापि सहायान्तं महामुनिः।।३५

वराहध्वजः -

स्यन्दनादवरुह्यासौ नमस्कृत्येदमब्रवीत् । अज्ञानादवतीर्णोऽयं मत्पुत्रो भवदाश्रमम् ।।३६
स्वामिन् सहस्व ब्रह्मर्षे शापान्मोचय मत्सुतम् ।

तण्डुः -

न लङ्घनीयश्शापो मे राजन् ब्रह्मादिभिस्सुरैः ।।३७

कथमेष नृकीटस्तु लङ्घते इह मद्वचः । यतोऽसि त्वमिहायातो राजन् सर्वजनेश्वरः ।।३८
अतश्शृणु त्वं पुत्रस्य शापमोक्षणकारणम्। पयोष्ण्याश्चोत्तरे तीरे श्रीनृसिंहाचलो महान्।।३९
बोधायनादिमुनिभिस्सेव्यते सर्वदा नृप । तत्र नीतो यदि सुतो वराहत्वमुपेयिवान् ।।४०
जातिस्मरो भवेत्तत्र विचारः क्रियतां त्वया तत्र जाम्बवतः कन्या कृष्णं मनसि काङ्क्षिणी।४१
निराहारा जितक्रोधा तपश्चरति दुश्चरम् । तस्याश्शुश्रूषणपरो भविता भवदात्मजः ।।४२
कन्यकायाः प्रसादेन शापान्मुक्तो भविष्यति । महावराहे भगवत्यनिशं जगदीश्वरे ।।४३
लयमेष्यति पुत्रस्ते नात्र कार्या विचारणा ।

वराहः -

इत्युक्त्वा पितरं तत्र ऋषिरन्तर्गतो महान् ।।४४
घृणामपि कृतां पुत्रपूर्वस्नेहानुबन्धतः । गुरुणा संप्रणीतोऽहमत्र शैलेषु सञ्चरे ।।४५
ततस्ततश्चरित्वा त्वामद्राक्षं समयाद्बहोः । दैवाद्वल्लीयमुत्कृष्य दृष्टा प्रतिनवोदका।।४६
इदं स्वीकुरु भद्रं ते तथा वारि च मद्धृतम् ।

जाम्बवती -

इदं सरश्च भवता घोणया विहितं यतः ।।४७
त्रीणि नामानि करवै सरसोऽस्य महामते। वल्लीतीर्थं शिलातीर्थं वाराहमिति च क्रमात् ।।४८
प्रसन्नसलिलं स्वादु सर्वर्षिगणसेवितम् । अस्मिन् वाराहतीर्थे यस्स्नाति पाति निषेवते।।४९
महावराहकृपया सविष्णोः पदमेष्यति । तत्रान्तरे महापोत्री भगवान् विश्वरूपधृक् ।।५०
तस्मिन् पोत्रिण्यदृश्ये तु घर्घरध्वनिशङ्किते । सर्वब्रह्मर्षिदेवर्षिद्विजर्षिगणसेवितः ।।५१
महावराहो भूमेर्यः पतिर्वै प्रादुरास ह । अवाप्य तां तु भगवान् पोत्री चरति दुस्स्वरः ।।५२
प्राह प्रसन्नया वाचा स्तूयमानो मुनीश्वरैः ।

भगवान् -

कायेन मनसा वाचा करणीयं च जातुचित् ।।५३
जागर्ति यादृशं देवि तादृशं कुरुषे तपः । लोकानुद्धरसे किञ्च सप्त सप्तर्षिपूजिते ।।५४
शंस जाम्बवतः कन्ये भवत्याः प्रीणये मनः । अहमीप्सितदानेन सत्यं प्रतिशृणोमि ते ।। ५५

अगस्त्यः -

आविर्भूतं तदा दृष्ट्वा केशवं वनपोत्रिणम् । कन्यास्तौषीदमुं कोलं हर्षसंपुल्लमानसा ।।५६

जाम्बवती स्तुतिः -

महावराह भव ते दंष्ट्रिणे भगवन्निदम् ।
मनः प्रयच्छ त्वय्येव भक्तिषु व्यभिचारिणीम् ।।५७
त्वमेव ब्रह्म परममापो ज्योतिरनामयम् ।
अनिलश्च तथा व्योम भवान् भक्तैर्निगद्यते ।।५८
यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थितः ।।५९
उत्सन्नान् सकलान्वेदानुद्धर्तुं प्रार्थितो बुधैः।
अवतीर्णो भवेद्यस्तु तस्मै मत्स्यात्मने नमः।।६०
भाराऽसह धरित्रीति प्रेरितो दैवतैस्स्वयम् ।
अवतीर्णो भुवः पृष्ठे तस्मै कूर्मात्मने नमः ।।६१
समुद्रान्तरितां भूमिमुद्धर्तुं ब्रह्मणेरितः ।
मिमक्षुर्वारिधिं तस्मै वराहवपुषे नमः ।।६२
प्रह्लादप्रीतये दैत्यराजं हन्तुं य उद्यतः ।
आर्विभूतो मणिस्तम्भे तस्मै सिंहात्मने नमः ।।६३
महाबलेस्तु दैत्यस्य मानभङ्गाय यः पुमान् ।
याचते त्रिपदं लोके नमस्ते वामनात्मने ।।६४
यः प्रीतये पितुर्युद्धे कर्तुं क्षत्रविदारणम् ।
बिभर्ति परशुं हस्ते तस्मै रामात्मने नमः ।।६५
पितुर्वचनरक्षार्थं सभार्यस्सानुजो वनम् ।
संप्राप्तो यस्तु भगवान् तस्मै रामात्मने नमः ।।६६
प्रलम्बासुरभङ्गाय प्रार्थितो यस्स्वयं हलम् ।
बिभर्ति यो विष्णुरूपः तस्मै रामात्मने नमः।।६७
जन्मक्षणे चतुर्बाहुं शङ्खचक्रगदाधरम् ।
नन्दो ननन्दयन् दृष्ट्वा तस्मै कृष्णात्मने नमः।।६८
सर्वानपि महादैत्यान् हेषया भीषयन् बली ।
यः पुमानाविरभवत्तस्मै कल्क्यात्मने नमः।।६९

ब्रह्म त्वं चाप्यणुस्त्वं हि सत्यस्त्वं सविता विभुः।
त्वं सोमस्त्वं यमोरुद्रस्त्वं विष्णुस्त्वं प्रजापतिः।।७०
त्वं यज्ञस्त्वं वषट्कारस्त्वं ब्रह्म त्वं प्रजापतिः ।
नमः प्रसीद भगवन् महापोत्रिवपुष्मते ।।७१
घोराय दंष्ट्रिणे तुभ्यं वासुदेवाय विष्णवे ।

आगस्त्यः -

इति स्तुतो हृषीकेशो वराहवपुरास्थितः ।।७२
प्राह जाम्बवतीं कन्यां प्रसन्नोन्तरात्मना ।

श्रीभगवान् -

कन्ये ते काङ्क्षितं जाने फलिष्यति तपस्तव ।।७३
कृष्णं भर्तारमासाद्य भवती सुखमेष्यति । भद्रे वनमिदं रामे तवाभीष्टकृतो भवेत् ।।७४
भवेयुः फलिनो मर्त्याः वासाज्जाम्बवती पदे । शिलापुष्करिणीतीरे वसन्नहमनिन्दिते ।।७५
भक्तेभ्यो वाञ्छितं दद्यां तोषितस्स्नानवैभवात् । अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।।७६
अत्र स्नानं प्रकुर्वाणो जीवन्मुक्तो न संशयः। पितृन् वै देवता वापि प्रीणयन्ति नरोत्तमाः ।।७७
वराहतीर्थसलिलैर्ह्येतेन निरयैषिणः । तपांसि कुर्वतां तत्र यानि कानिचिदेव वा ।।७८
नराणां क्षीणपापानां मयि भक्तिः प्रजायते ।

अगस्त्यः -

इत्युक्त्वान्तर्दधे देवः पोत्रिरूपी जनार्दनः ।।७९
ऋषीणां मिषतामेव सनकादिस्स्तुतस्तदा । कन्यापि भगवन्नेत्रपात्रभूता निरञ्जना ।।८०
वरं लब्ध्वाऽश्रमपदं प्रायाज्जाम्बवतो मुनेः । तत्र यस्स्नाति मध्याह्ने प्रातःकालेऽथवा मुने।।८१
स महाकोलसान्निध्यात् सर्वान् कामानवाप्नुयात्। तत्र स्नानं सदा कार्यं सद्भिस्सर्वहितेरतैः।।८२
पाण्डवोदे ततस्स्नायात् यत्र पार्थस्तपस्यति । तस्य प्राग्दक्षिणे पार्श्वे हनूमत्तीर्थमुत्तमम् ।।८३
अध्यास्ते भगवान् यत्र शङ्खचक्राभिलाषवान् । प्रदक्षिणं प्रकुर्वीत तत्र स्नात्वा बुधोत्तमः ।
हनूमदनुमत्या वै तस्यापि क्षेममिच्छतः ।।८४

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये त्रयोदशोऽध्यायः ।।

चतुर्दशोऽध्यायः

अगस्त्यः -

तस्याविदूरे धर्मात्मा दक्षिणे गिरिसानुनि । कापिलः कुरुते तीव्रं तपः पञ्चाग्निमध्यगः ।।१
तस्य धर्मव्रता नाम भार्या प्रियमनुव्रता । प्रभेव भासामधिपं चन्द्रिकेव सुधाकरम् ।।२
लक्ष्मीरिव महाविष्णुं पार्वतीव महेश्वरम् । सरस्वतीव ब्रह्माणं भर्तारमुपजीवति ।।३
पिटकं गृह्य बाहुभ्यां खनित्रं च यशस्विनी । कश्यपस्य मुनेः पत्नी मूलमानेतुमभ्यगात् ।।४
पार्श्वेषु पर्वतेन्द्रस्य तथाग्रेषु तपस्विनी । वनमेत्य ततस्तत्र कन्दानां खननाय वै ।।५
शृङ्गे कस्मिंश्चिदद्रेस्तु कपित्थानां शतंशतम् ।दृष्ट्वा गृहीतुकामा तान् व्याघ्रं क्वापि ददर्श ह ।६
सापि गृह्य कपित्थानां फलानि सुबहून्यपि । निधाय पिटके साध्वी गमनायोपचक्रमे ।।७
महाव्याघ्रः क्षुधार्तस्तु तामुपेत्य यशस्विनीम् । महाक्रोधो वने तत्र वाक्यमेतदुवाच ह ।।८

व्याघ्रः -

कश्यपस्य मुनेस्तत्र धर्मपत्नि यशस्विनि । फलमेकं महास्वादु प्रदेयं क्षुधिताय मे ।।९
न चेद्ददासि धर्मिष्ठे सफलां त्वामनिन्दिते । क्षुधार्तहृदयोऽहं च भक्षिष्ये विजने वने ।।१०

धर्मव्रता -

काले फलानां ग्रहणे प्रतिज्ञातमिदं मया । अमूनि रसवन्त्यस्मै काश्यपाय ददाम्यहम् ।।११
अतो नैकं फलमपि प्रदेयमिति मे मतिः । अन्यतो गच्छ भद्रं ते भविता मृगसत्तम ।।१२
अथवा यत्त्वयोक्तं वै खादेयं सफलामिमाम् । तत्पश्चादहमभ्येत्य करवै भवतादयम् ।।१३
दत्वा फलानि मुनये काश्यपाय क्षुधायुजे । चरितार्थं व्रतं कृत्वा भवन्तं प्रीणये ततः ।।१४

व्याघ्रः -

गच्छ सुश्रोणि भद्रन्ते मा विलम्बं सहामि ते। जीवामि घटिकां पश्चात्प्राणांस्त्यक्ष्ये भवत्कृते।१५

धर्मव्रता -

पुण्डरीकसरस्तीरे तपस्यति महातपाः । इतोऽविदूरे धर्मात्मा काश्यपः प्रयतात्मवान् ।।१६

व्याघ्रः -

पुण्डरीकस्य सरसि क्वास्ते सानुनि शंस मे। यत्नात्ते वादकथया मां प्रीणयसि धर्मिणी ।।१७
निर्यातुकामाः प्राणा मे क्षुधार्तस्य तपस्विनी । पुण्डरीकस्मृतिर्वात्र किल तेषां प्रजायते ।।१८

अगस्त्यः -

तपस्विनी तमालोक्य विस्मयापन्नमानसम् । स्वयं च विस्मयव्यग्रमानसा व्याघ्रमब्रवीत् ।।१९
किमिदं शंस वृत्तान्तं स्वस्ति तेऽस्तु मृगोत्तम। यत्स्मृत्या हर्षसंफुल्लमानसो जायते भवान्।२०

व्याघ्रः -

नर्मदातटिनीतीरे पुरा द्विजर्षयस्तपः । चक्रिरे बहुभिश्शिष्यैः सह सद्भिरनिन्दिताः ।।२१
अथ तेषामयत्नेन पुराणं पापमागतम् । तर्कविद्या मूर्तिमती प्राप्य पापीयसां नृणाम्।।२२
सन्निधिं तपसां विघ्नं कर्तुं समुपचक्रमे । तत्र मे तातपादस्तु विष्णुभक्तो निरंकुशः ।।२३
नाम्ना धर्मव्रतो ब्रह्मा ऋषिर्दैवादुपागतः। नर्मदापयसि स्नात्वा सन्ध्यामन्वास्य मध्यमाम् ।।२४
सभार्यस्सह शिष्येण दक्षिणं पदमेयिवान्। तत्राश्रमे जननां वै ऋषीणां भावितात्मनाम् ।।२५
दृष्ट्वा धर्मव्रतो दैवात्तीरबालद्रुमानगात् । षट्त्रिंशत् तत्र वर्तन्ते तर्कविद्यामत क्रमात् ।।२६
अद्राक्षीद्व्याकुलधियो द्विजान् बालानतन्द्रितान्। वीक्ष्य धर्मभृतां श्रेष्ठस्तातपादस्तटद्रुमान्।।२७
पालाशहरणार्थं वै प्रायाच्छिष्येण भार्यया । तानासाद्य ततस्तत्र दुरुक्तिश्रवणे मनः ।।२८
चकार घटिकामात्रं पत्राहरणदुर्मनाः । मनश्चक्रे स तेषां वै विद्याया श्रवणे सुधीः ।।२९
पञ्चयज्ञाधिकरणे न चक्रे तापसव्रते । शिष्योऽपि गौरवीं रीतिमभजत् क्षणतस्तदा ।।३०
भार्यानिबोधितोऽप्यासीत् सर्वकर्मण्यलोलुपः । मासमात्रं स्थितस्तत्र वेदवेदान्तवर्जितः ।।३१
केवलं तर्कविद्यासु मनश्चक्रे ह्यनन्यधीः । मासमात्रोषितस्तत्र दुरुक्तिपथगोचरः ।।३२
अन्वहं तास्स्मरन्नेव दास्यामिव बभूव ह। कस्यचित्त्वथ कालस्य पश्चाच्छिष्येण धीमता ।।३३
अभ्ययाद् भार्यया सार्थं गुरोर्व्यासस्य सन्निधिम्। पराशरात्मजो दृष्ट्वा दुरुक्तिं वक्तुचेतसम्।।३४
शिष्यं धर्मव्रतं नाम सशिष्यमिदमाह सः। विहाय वैदिकींविद्यां दुर्विद्यामाश्रितोऽसि यत् ।।३५
सहशिष्यस्सभार्यस्त्वं पुण्डरीको भविष्यसि।तत्र वासोऽपि भविता ह्यपि जातेश्च संस्मृतिः।।३६
यत्रास्ते भगवान् शैले योगानन्दनृकेसरी । जीर्णपर्णाशिषु प्रायश्चरत्सु तप उत्तमम् ।।३७
अव्यग्रवैष्णवीं भक्तिं दृष्ट्वा तु प्रादुरेष्यति । केषुचित्त्वथ कालेषु नीतेषु नरकेसरी ।।३८
प्रसन्नो भवतो लोकान् संप्रदास्यति मास्तु भीः। इति संबोधितस्तेन व्यासेन स महर्षिणा।।३९
प्रणम्य लज्जावनतः प्रायादेनं नगोत्तमम् । सप्तर्षि हृदये कृत्वा सशिष्यस्सह भार्यया ।।४०
नृहरिध्यानमासीनः केवलं कुरुते तपः । जीर्णपर्णजलाहारः कन्दमूलफलादनः ।।४१
न भयं कुरुते नृणां दुष्टानाममृताशनः । कालेन महता तत्र तपःकरणशीलयोः ।।४२
पुत्रोऽहमभवं व्याघ्रः दम्पत्योर्भावितात्मनोः । पुण्डरीकवने व्याघ्रः पोषितोऽहं दिने दिने।।४३

जातिस्मरः फलान्येव भुजन् बाल्यं प्रणीतवान्। तपस्यतोस्तयोरत्र कालेन महता हरिः।।४४
प्रादुर्भूतस्तदा सर्वान् प्रापयत्पदमात्मनः । अहं वा गीयते शैले सर्वैरपि द्विजर्षभैः ।।४५
पुण्डरीकस्स धर्मात्मा पुण्यश्लोको जितेन्द्रियः। यस्मिन्नृसिंहः प्रत्यक्षं प्राप सर्वैरगोचरः।।४६
आत्मनामाङ्कितं तीर्थं पुण्डरीको व्यकल्पयत्। मज्जतामत्र पुंसां वै जातिस्मृतिरुदेष्यति।।४७

धर्मव्रतः -

साधु दैवादुपक्रान्तं कर्मवृत्तमिदं सता । इदानीं प्रीणये श्रोत्रं भवद्वाक्यामृतेन वै ।।४८
कथं जातिस्स्मरस्त्वं हि व्याघ्रभावं भजन्नपि । वद त्वमधुनेदं हि चिराय तु मराजिते ।।४९

व्याघ्रः -

आसीद्गन्धर्वनगरे राजा चित्ररथस्त्विति । चतुर्दशाभवन् पुत्रास्तस्य गन्धर्वस्वामिनः ।।५०
इल्वालवङ्कावङ्काश्च मणिकण्ठो मणिध्वनिः। चित्रभानुश्चित्रकेतुर्मणिभद्रो महारथः ।।५१
श्वेतकेतू रश्मिकेतू रत्नकेतुश्च धूसुरः । एतेषामग्रजो नाम्ना कलकण्ठो महाव्रतः ।।५२
सर्वानपि सभामध्ये स्थापयन् चित्रमाप्तवान् । पिता वैणिकमाहूय नारदं मुनिसत्तमम् ।।५३
विद्याभ्यासमयं तस्मै प्रददौ मधुरस्वरम्। तदाहं नारदमुखात्तन्त्रीकण्ठोत्थितान् स्वरान् ।।५४
निषादादीन्सप्त तन्तौ जातवांस्सुहृदां ततः। श्रुतिभेदाः कथङ्कारमासन् कीदृग्विधास्त्विमाः।।५५
जानन्नपि दुरुक्त्याहं तदा दूषितवान् श्रुतीः । तदा मां वीक्ष्य सक्रोधो मुनिर्वैणिकसत्तमः ।।
इदमाह सतां मध्ये गन्धर्वाणां च पश्यताम् ।।५६

नारदः -

साङ्गोपाङ्गमधीत्यापि स्वरभेदान्तथा श्रुतीः। दुरुक्त्या दूषयसि यत्तद्व्याघ्रो भव भूतले।।५८
हनूमच्छैलपादेषु चरिष्यति ममाज्ञया । पुण्डरीकस्य पुत्रत्वं प्राप्य जातिस्मरो भव ।।५९
कश्यपस्य मुनेर्भार्यां नितरां वेदयिष्यसि । शरीरादेव वैयाघ्रान्मुच्यसे त्वमनिन्दितः ।।६०
हिरण्मयवपुर्धीमान् हिरण्मयविमानगः । पुनरभ्येष्यति भवान् तापसीवचसो बलात् ।।६१

गन्धर्वः -

इति शापं विशापं च कृत्वा वैणिकपुङ्गवः । उद्वेगवान् विनिष्क्रम्य यथागतमविन्दत ।।६२
पश्याद्य विष्णुभक्ताया भवत्या दर्शनादहम् । रुपं जीर्णं च वैयाघ्रं त्यक्ष्ये दैवतकं श्रये ।।६३
पश्यन्त्यां कश्यपमुनेर्धर्मपत्न्यां तदा वने । पुण्डरीकं वपुर्हित्वा गान्धर्वं रूपमाददे ।।६४
स तदा लोकयन्तीन्तां विस्मयापन्नमानसाम् ।
तापसीं वीक्ष्य धर्मात्मा कलकण्ठस्तदाऽवदत्।।६५

कलकण्ठः -

शक्तेरिव मणिर्देवि मूषाया इव काञ्चनम्।मुक्तोऽहमद्य मां पश्य सा त्वं वात्सल्यवीक्षणा।।६६

विष्णुभक्तानुषङ्गेण वपुषोऽस्मात्प्रमोचितः।स्वस्ति वोऽस्तु गमिष्यामि यथागतमनिन्दिते।।६७

धर्मव्रतः -

कलकण्ठं ततो ध्यात्वा दृष्टेर्दूरपथं गतम् । आश्चर्यपथमापन्ना भर्तुराश्रममभ्यगात् ।।६८

सर्वं निवेद्य भर्त्रे वै ह्यविलम्बनकारणम् । पुण्डरीकसरस्तीरे निवासमकरोत् तदा ।।६९

श्रीनृसिंहपदाकाङ्क्षी कश्यपो नाम धर्मवित्। वैष्णवागमनं मन्ये शिष्यान् व्याख्यापयत्यसौ।।७०

यस्स्नाति नियतो विद्वान् पुण्डरीकसरो ले। जातिस्मरस्स वै लोके वैष्णवं प्राप्नुयान्नरः।।७१

वृश्चिकं याति मार्ताण्डे यस्स्नाति विजितेन्द्रियः। समुक्तकिल्बिषो जीवन्मुक्तो भवति वै नरः।७२

कङ्केलयश्च न्यग्रोधा मधूका उत्पला धवाः । वसन्तास्तरवस्तत्र पञ्चैते फलशालिनः ।।७३

तस्य दक्षिणपार्श्वस्थशृङ्गराजो विराजते । निषेव्यस्सततं सर्वैर्ब्रह्मर्षिभिरनुत्तमैः ।।७४

शैलस्य दक्षिणे पार्श्वे प्रतिभाति शिलावटः। शोभन्ते विविधा यत्र शाखाश्शतसहस्रशः।।७५

अवष्टभ्य तमव्यग्रा ऋषयस्सप्तशो मुने । लम्बमानास्तपस्यन्ति नृहरिर्ध्यानतत्पराः ।।७६

ऊर्ध्वीभवन्महाशाखाभुजालङ्कृतवल्कलाः। दृश्यते यस्तपस्वीव जटाभिः परिमण्डितः ।।७७

गिरेः प्रदक्षिणं कृत्वा स गन्तव्यो मनीषिणा। यत्रास्ते भगवान् पक्षी गरुत्मान् पन्नगाशनः।७८

तस्य पश्चिमसानुस्थो दृश्यते भगवान् मुनिः। तपश्चरति धर्मात्मा सपत्नीकस्सुदारुणम्।।७९

तस्य शिष्या महात्मानो नित्यं धर्मसुता मुने । शुश्रूषणपरास्तत्र सुनन्दाद्या वसन्ति हि।।८०

राजर्षयो द्विजन्मानो यूथशः पङ्क्तिपावनाः । सभार्याश्च तपस्यन्ति स्वस्वधर्मनिषेविणः ।।८१

अग्न्यगारोदिता धूमा अभ्रमार्गावलम्बिनः। दृश्यन्ते वातसच्छिन्नाः पयोमुचि निलीय वै।।८२

गिरिप्रदक्षिणकृतां नराणां भावितात्मनाम् । श्रमं हरन्ति तत्रत्या मारुता भव्यगन्धिनः ।।८३

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये चतुर्दशोऽध्यायः ।।

पञ्चदशोऽध्यायः

अगस्त्यः -

तस्योत्तरदिशि ज्ञानशालिनां भावितात्मनाम् । आश्रमेषु मुनिः कश्चिदास्ते श्रीमान्निशाकरः ।।१
तत्राश्रमपदे साध्वी कीर्तनीया मुनीश्वरैः। निशाकरो रोहिणीं च रोहिणी च निशाकरम् ।।२
अनुव्रता धर्मपत्नी तथा च मुनिपुङ्गवः।तस्य शिष्योऽस्ति मतिमान्नाम्ना कौत्स इति स्मृतः।३
गुरोश्च गुरुपत्न्याश्च सदा शुश्रूषणे रतः । पित्रोरिव तयोर्नित्यं प्रेष्यतां प्रययौ तथा ।।४
स कदाचित् पुरा विद्वानेणं दृष्टं वनान्तरे । निवेदयामास मुनिः कौत्सस्तु महदद्भुतम् ।।५

कौत्सः -

भवता प्रेरितस्स्वामिन् अहमेको वनं गतः । इहाविदूरे कन्दानां मूलानां खननाय च ।।६
स्नातुकामो महातीर्थे स्वामिन् पापविनाशने। गत्वा माध्याह्निकं कर्म निर्वर्त्य गतवांस्तथा।।७
मृगः कोऽपि मया दृष्टो नानावर्णविशोभितः । स्नातुकामो महातीर्थे दर्शनीयतनूरुहः ।।८
स्वामिन्नदृष्टपूर्वोऽसौ श्रुतपूर्वो न मे मृगः । मया मुहूर्तं दृष्टो वै जपव्याजेन तिष्ठता ।।९
स तु पीत्वोदकं तत्र निर्गन्तुं बहिरुत्थितः । इतस्ततोऽवलोकं च चकार हरिणोत्तमः ।।१०
तत्रान्तरे पूर्वशृङ्गदिशानिर्गतवानिह । मुखरीकृतदिग्भागप्रभावस्सिंहहुंकृतिः ।।११
हुंकृतानुपदो सिंहे विनिर्गत्य गुहान्तरात् । विलोलमाननयनं प्रास्पृशं मृगमञ्जसा ।।१२
स्पर्शनानुपदं स्वामिन्नदृष्टो मृगसत्तमः । मृगराजोऽपि तद्भूत्वा केवलं राक्षसं वपुः ।।१३
अनन्तरमहालोकः केशमात्रपरिष्कृतः । समूहीधूयरश्मीनां शतं शान्त इवाभवत् ।।१४
अथान्तरिक्षे सूर्याणां द्वादशानामिव क्षणम्। मण्डलानि विमानानां दृष्यानि सुबहून्यपि ।।१५
दृष्ट्वा प्रसन्नमनसो वैष्णवास्तत्र पङ्क्तिशः। हिरण्यश्मश्रवो हेमकेशाश्चक्रभुजाङ्गिताः।।१६
ऐन्द्रजालीव सा विद्या दर्शिता दैवतेन मे । क्षणमात्रं तदा सर्वं प्रत्यदृश्यत पूर्ववत् ।।१७
पथि मूलानि सङ्गृह्य व्याकुलेनान्तरात्मना । भगवंस्त्वत्पदे सर्वं विज्ञापितमिदं मया ।।१८

अगस्त्यः -

आकर्ण्य हर्षसंफुल्लमानसस्तु निशाकरः । तद्वैभवं पूर्ववृत्तमाख्यातुमुपचक्रमे ।।१९
पुरा पुण्यतमो नाम वैखानसकुलोत्तमः । नृहरेरर्चनपरश्शीलवान् प्रबभूव ह ।।२०
तस्य भाग्योदयात् कश्चिद्धरिदत्त इति श्रुतः । पुत्रोऽजनिष्ट नृहरेः प्रसादात् तदनुग्रहात्।।२१

अथ पुत्रं समालोक्य शीलवन्तं गुणान्वितम्। आगमप्राप्तये सोऽयं पिता दूर्वाससे ददौ।।२२
हरिदत्तोऽपि धर्मात्मा गुरोर्दूर्वाससो मनः। प्रहर्षयन् प्रतिपदं विद्यामभ्यासयत् तदा ।।२३
अदक्षिणमहे विद्या तेनाभ्यस्तेति दुर्मनाः । दूर्वासा हरिदत्ताय ब्राह्मणायेदमूचिवान् ।।२४

दुर्वासः -

त्वं प्राज्ञस्त्वं कुलीनश्च सत्यसन्धो जितेन्द्रियः। हरिभक्तस्सदापि त्वमागाविद्यामदक्षिणाम् ।२५
कञ्चित् कालमुषित्वात्र राक्षसं रूपमास्थितः। कामरूपी भवान् सर्वं काननं प्रचरिष्यति।।२६
याश्च पश्य महारण्ये जातयः प्रसवन्ति हि। तासु तद्रूपभाक्त्वं वै क्रीडावान्पापहा भव।।२७
ततः कालेन महता ममानुग्रहतो भवान् । निशाकराश्रमं प्राप्य स्वस्वरूपं व्रजेद्वने ।।२८
पापनाशमहातीर्थे सेवया मुक्तकल्मषम् । त्वां नृसिंहोऽनुग्रहात्तु स्वपदं प्रापयिष्यति ।।२९

निशाकरः -

इत्थं दूर्वाससश्शापात् हरिदत्तो महातपाः । शरीरं राक्षसं गृह्य वनमध्यं जगाम ह ।।३०
येषु जन्तुषु यद्रूपं तेषु रूपं तदाऽऽविशत् । रममाणो वनं दैवात् मामकं प्रापितो महत् ।।३१
दूर्वाससोऽनुग्रहेण सत्संसर्गवशादपि । पूर्वं नृहरिसान्निध्यात् तीर्थमेतन्निषेवितम् ।।३२
नरकेसरिणस्सङ्गाद्विमुक्तस्स च राक्षसः। दिव्यरूपं समास्थाय वैष्णवं लोकमेयिवान्।३३
त्वं हि भाग्यवतां श्रेष्ठश्शुश्रूषणपरस्सताम् । वेदैरदृष्टोऽपि हरिः यत्ते दृष्टिपथं गतः।।३४
वैष्णवाश्च महात्मानश्शङ्खचक्रधरास्स्वयम्। विमानेषु यतो दृष्टास्तस्माद्धन्यतमो भवान्।३५
सर्वपापविनिर्मुक्तस्स यास्यति परां गतिम्।

अगस्त्यः -

इत्युक्तो हृष्टचेतास्तु कौत्सश्शिष्यतमो गुरोः।।३६
पादाभिवन्दनरतः प्रमुमोद तदा मुनिः । तत्र पापविनाशे यस्स्नाति तीर्थनिषेविते ।।३७
सौषेणस्सङ्गवादर्वाक् सेवते तीर्थमुत्तमम् । भवेत् पापविनिर्मुक्तो नृसिंहानुग्रहेण सः ।।३८
तस्याविदूरे सौषेणं वनमुन्निद्रपालितम् । उन्निद्रतरुसुच्छायमुन्निद्रमृगसंकुलम् ।।३९
सुषेणवनमाप्ता ये विदूरात् सर्वजन्तवः । बिभ्यन्ति व्याधयस्सर्वे तत्र गन्तुं महामते ।।४०
सञ्जीवनकरी तत्र सन्धानकरणी तथा । विशल्यकरणी चापि वल्लयस्तु वसन्ति हि ।।४१
मन्दारपारिजातश्च पुन्नागो नागकेसरः। रसालाश्च पलाशाश्च कङ्कास्त्विन्दुरकास्तथा।।४२
अश्वत्थाःकेसराश्चापि कर्णिकाराश्च मल्लिकाः। चम्पकास्तिलकाश्चूतास्सिन्धुवाराश्च तिन्दुकाः।४३
जम्बूमधूककङ्कोलाश्चाम्रेयपनसास्तथा । कुन्दाश्च स्यन्दनास्सालाः पाटलाश्च वटास्तथा।।४४

भद्राश्चामलाका द्राक्षास्समाध्वीकाश्च वर्षिणः। तत्र दीर्घाटवी मध्ये कुल्या चोत्तरवाहिनी।।४५
तीरस्थद्रुमपुष्पान्तश्च्युतमाध्वीकपूरिता। तत्तीरे भगवान् योगी जाबाली ऋषिसत्तमः।।४६
तपस्यति दुराधर्षो योगं कृत्वा महातपाः। आलम्बिकायोगरतास्तिष्ठन्त्यमृतसेविनः।।४७
अनुग्रहन्ति सादृश्यं तरवस्ते निषेविणाम् । तत्पुष्पमालाभरणो भगवान् नृहरिस्तथा ।।४८
दीर्घानुषङ्गानस्मिन् वै कुरुतेऽनन्यदुर्लभान् । क्रियते नृहरेर्यत्र दीर्घापाङ्गपरम्पराम् ।।४९
तरूणां तद्वनं सर्वैर्दीर्घारामोऽभिधीयते । यत्र दीर्घतपस्तत्र जाबालिः कुरुते मुनिः ।।५०
तद्वनं मुनिभिस्सर्वैर्दीर्घारामस्तदुच्यते । कुल्यायाः पश्चिमे तीरे दीर्घारामान्तरे मुने ।।५१
सर्वदामृतकुण्डो हि दृश्यते पूरितामृतम् । तत्रावतीर्य ते धन्या गृह्य वारि पिबन्ति ये ।।५२
अभिमन्त्र्य नृसिंहाष्टवर्णैरागमगोचरैः । वैखानसा वालखिल्या ऋषयश्शंसितव्रताः ।।५३
पराशरादयस्तत्र पीत्वा दीर्घायुषोऽभवन् । दीर्घारामतरुच्छायामाश्रितानां महात्मनाम् ।।५४
हेमकोटिपदच्छाया भजने कापिलं वनम् । उन्नता विटपाश्चैव तरूणां फलशालिनाम् ।।५५
हरिध्यानवतां पुंसामुद्बाहव इवाभवन् । तस्योत्तरदिशि स्फीते शृङ्गे वेदान्तगोचरः ।।५६
दत्तात्रेयस्स भगवान् तिष्ठते तपसि स्थितः। शृङ्गस्य वामपार्श्वस्था दृश्यते वामदीर्घिका।।५७
यत्र दत्तो महातेजा उन्मज्जति निमज्जति । पुरा देवासुरे युद्धे दैत्येन्द्रान् जेतुचेतसाम् ।
सुराणां बुद्धिरभवत् वासवस्यावनाय वै ।।५८
अयं हि वर्तते वह्निर्वोढुं भारमतन्द्रितः । अस्मै दास्यामहे वामं वस्वीतीमेऽनुमेनिरे ।।५९
हे वह्नेऽस्मद्धनमिदं गोप्यतां भवता महत्। अथासुरान् विजित्यैतत् प्रतिगृह्यामहे वयम्।।६०
वह्निः -
बलवन्तोऽसुरा यत्र इष्टं सन्निदधत्यमी । कुशली नाहमेतद्धि वोढुमन्यत्र दाप्यताम् ।।६१
सुराः -
महानुभावो विश्वात्मा हव्यकव्यवहो बली । अनुगृह्णातु भगवान् वसूनां ग्रहणे मनः ।।६२
अगस्त्यः -
अमरैर्दीप्यमानं तदादाय सुमहामनाः । आवहत्सु चिरं कालं हवींषीव वसूत्करम्।।६३
तदा दृष्ट्वा दैत्यसेनाः वामं वसु हविर्भुजि। चिन्तयाना हव्यवहं परिवव्रुः परश्शतम् ।।६४
सन्नह्यानवलोक्याथ कांदिशीकस्तु हव्यभुक्। दिशो दश हि दुद्राव अत्यनाशीरविद्रुतः ।।६५
तत्रान्तरे विगलितं वसु वामं मरुद्धनम् । वह्निं प्रसाद्य तत्सैन्यमवलोक्य सुरा ययुः।।६६
ततो विजित्य वै दैत्यानुद्धतान् रणकोविदान्। अयाचन्त सुरा वह्निं दीयतां वसुमद्धनम्।।६७

पुनः पुनश्च पृष्ठोऽपि वह्निर्यत्नमुपास्थितः ।
किमिति व्याकुलमनास्सभयं प्राह तान् सुरान् ।।६८

वह्निः -

भवद्भिर्दत्तमेतद्धि धनं दुष्टा दनूद्भवाः । सन्नह्य मां तदालोक्य दैत्याश्च पुरसेवकाः ।।६९
चारैरपि प्रहर्तुं मां कूटमुद्गरपाणयः । पलायमाने सहसा प्रहर्तुमनसोऽसुरान् ।।७०
निरीक्ष्य दक्षिणस्यां वै दिशि निर्गलितं वसु ।
वसुभिश्शून्यमालोक्य निराशास्स्वां पुरीं गताः।।७१
अतो विलोक्यतासद्भिर्भवद्भिस्तत्त्ववेदिभिः ।
दक्षिणस्यां दिशि सुराः दृश्यते भुवि नानृतम् ।।७२

अगस्त्यः -

ततो देवाः सहेन्द्रेण मार्गमाणा वसूत्तमम् । वह्निना दर्शितपथा भुवः पृष्ठमुपाययुः ।।७३
यत्र तिष्ठति धर्मात्मा सर्वपापविशोधकः । तस्यां दिशि सुरास्सर्वे ययुस्सेन्द्रासहानलाः ।।७४
चिन्तामणिगिरेस्तस्य शृङ्गमुन्नतमुत्तमम् । अवलोक्य ततस्सर्वे सुराः प्राहुरिदं वचः ।।७५

सुराः -

अत्रास्ते भगवान् साक्षादितो नारायणांशकः। अस्मै विज्ञापितं चैतदस्मभ्यं ज्ञापयिष्यति।।७६
इति सञ्चिन्त्य मनसा दत्तात्रेयमनुत्तमम् । योगिनां प्रवरं सर्वे शरणं प्रययुस्सुराः ।।७७

अगस्त्यः -

प्रसीद भगवन् स्वामिन् भक्तमुक्तिप्रदायक । परिपालय नस्सर्वान् दत्तात्रेय नमोऽस्तु ते।।७८
समुद्रशायी भगवान् विष्णुस्सर्वामरैस्स्तुतः। अत्रिज त्वं प्रसन्नोऽसि दत्तात्रेय नमोऽस्तु ते।।७९
मरुद्वृधासरित्तीरे सन्नद्धामुदमावहन् । अर्थितो मुनिकन्याभिः दत्तात्रेय नमोऽस्तु ते ।।८०
नर्मदातीरवासी त्वं दृश्यादृश्यवपूरिह । विमोहयस विश्वात्मन् दत्तात्रेय नमोऽस्तु ते।।८१
अधित्य कायं सन्धास्य ततो यत्पुलकावृतम्। प्रहर्षयसि गन्धर्वान् दत्तात्रेय नमोऽस्तु ते।।८२
जमदग्निप्रिया येन द्रवीभूता सुराशिना । पुरा निष्पन्दमभवत् दत्तात्रेय नमोऽस्तु ते ।।८३
नानारूपं समास्थाय विना वर्णैस्समाधृतः । संप्रीणयसि धर्मात्मन् दत्तात्रेय नमोऽस्तु ते।।८४
भुक्तिं वै भुक्तिकामेषु मुक्तिं मुक्त्यभिकामिषु। प्रदास्यति भवानेव दत्तात्रेय नमोऽस्तु ते।।८५
केनापि कामेन भवान् तपांसि कुरुते क्वचित्। क्वचित्त्विहरते रागी दत्तात्रेय नमोऽस्तु ते।८६
इति स्तुतो महायोगी प्रीणयन्नखिलान् सुरान् । दत्तात्रेयस्स भगवानूचिवान् वचनं तदा।।८७

दत्तात्रेयः -

भो महेन्द्रादयो देवाः किमिदानीमुपस्थितम् ।
प्रशंसत भयं त्यक्त्वा क्रियते भवदीप्सितम् ।।८८

सुराः -

महाकुलधनं सूर्यरक्षितं वसु वामकम् । पुरास्माभिर्दैत्ययुद्धे दत्तं हव्यभुजाश्रमे ।।८९
अस्य दुर्ललिते भीत्या कुतोऽपि दलितं वसु। सर्वे वयं विचिन्वन्तस्सेन्द्रास्साग्निपुरोगमाः।।९०
प्रसीद वासं शरणं भवन्तमिह विष्ठितम् । तन्निवेदयिता त्वां वै विना कोऽपि न विद्यते।।९१
भवद्वसूनि संगृह्य बलवन्तो वयं सदा ।।९२

दत्तात्रेयः -

इतो रक्तशिलायां वै लक्ष्यते वसुवामकम् । युष्मन्मूलधनं वह्नेर्दूरात् संपतितं भुवि ।।९३
भूताधिपोऽरक्षदिमं निकुम्भ इति विश्रुतः । मदाज्ञया प्रेरितस्तु निस्तारयति वैरिणः ।।९४
तत्र गच्छत हा देवाः यूयं स्वस्ति भवद्वचः। निकुम्भस्स तु विज्ञाय सर्वं विज्ञापयिष्यति।।९५

अगस्त्यः -

ततो निशम्य तद्वाक्यं संप्रहृष्टा दिवौकसः । निकुम्भरक्षितं वामं वसु गृह्येदमब्रुवन् ।।९६

सुराः -

दत्तेन वसु वामं वै रक्षितं निम्नसीमनि । वसुप्रभृतिसंपूर्णं सलिलैः प्रभविष्यति ।।९७
इदं क्रीडासरो नाम दत्तात्रेयस्स यास्यति । इदं रत्नतटाकं च व्याहरन्ति पुराविदः ।।९८
वामानां च वसूनां वै रक्षणादेव कारणात् । इदं देवसरो नाम व्याहरन्ति मनीषिणः ।।९९
अत्र ये मनुजा देवाः गन्धर्वाश्चापि किन्नराः ।
स्नान्ति दत्तह्रदे तैस्तु प्राप्यन्ते सर्वसंपदः ।। १००

अगस्त्यः -

गृह्य वामं वसु सुराः नृहरिं वन्द्य तत्क्षणात् ।
दत्तं च श्लाघयन्तो वै स्वाराज्यं प्रतिपेदिरे ।। १०१
तत्र रक्ततटाके यस्स्नाति मर्त्यस्स्वबन्धुभिः ।
भोगाननन्तान् संप्राप्य प्रेत्य स्वर्गे महीयते ।। १०२
अस्य प्राचीनसद्रोण्यां कान्तारं व्याघ्रसेवितम् ।
नाना ऋषिगणाकीर्णं दृश्यते बहुपादपम् ।। १०३

विश्वामित्रस्य भविता तस्याश्रमपदं परम्।
यस्य ब्राह्म्यं महातेजो नृसिंहो दास्यति क्षणात्।।१०४
वसिष्ठस्याश्रमपदं तस्य दक्षिणतो मुने ।
तस्य सौरमहाराजा तमर्थयति सङ्गमात् ।।१०५
गीयते च पुराणेषु श्लोकोऽयं ब्रह्मणा पुरा ।
पुराणकर्ता भगवान् नप्ता·यस्य मुनीश्वरः।।१०६
स ब्रह्मयोगविद्वेद्या यस्य सुभ्रू अरुन्धती ।
पुरा रामस्य धर्मात्मा सानुजो वंशवर्धनः ।।१०७
सरयूरोधवसतिर्जानकीवाक्यचोदितः ।
वसिष्ठं जपतां श्रेष्ठमिदं वचनमब्रवीत् ।।१०८

रामः -

चिरस्थायि चरित्रं वै यथा भवति तद्भवान्। मुने संस्कृतया वाचा करोतु चरितं मम।।१०९
नरकेसरिशैलस्य पादपार्श्वे मनः कृथाः । यत्राञ्जनेयो नृहरेः प्रीतये कुरुते तपः ।।११०
गत्वा तत्र महाभाग नृसिंहानुज्ञया भवान् । मामकं चरितं कृत्वा वैष्णवं लोकमेष्यति ।।१११

अगस्त्यः -

इत्युक्तोऽरुन्धतिपतिरनुज्ञाप्य रघूद्वहम् ।
वसन्निह वसिष्ठस्य प्रीणयामास वैष्णवान् ।।११२
अनुग्रहेण नृहरेर्वैष्णवानां द्विजन्मनाम् ।
माहात्म्यं रघुनाथस्य कृतवान् भगवान् मुनिः ।।११३
अस्याश्रमपदं नानाऋषिसङ्घनिषेवितम् ।
वसिष्ठतीर्थं तत्रैव शोभते निर्मलोदकम् ।। ११४
वसिष्ठतीर्थे ये स्नान्ति ये वा तत्पदवासिनः ।
ते माहात्म्यविदो विष्णोस्सान्निध्यं प्राप्नुयुर्नराः।।११५
अद्यायं पठते भक्त्या य इदं शृणुते नरः ।
समर्त्यस्सगणो लोकान्वैष्णवान्प्राप्नुयात् सुधीः।।११६

इति ब्रह्मकैवर्त्ये उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये पञ्चदशोऽध्यायः ।।

षोडशोऽध्यायः

अगस्त्यः-

ब्रह्मरुद्रेन्द्रमरुतामपि गृह्य प्रदक्षिणम् । अन्तरं च तथा गृह्य दृश्यते तदनुग्रहात् ।।१
तथा प्रदक्षिणद्वन्द्वं कुरु त्वं विजितेन्द्रियः । स्नानं च भवता कार्यं हनुमत्कमलाकरे ।।२
तमुपास्य हनूमन्तं प्रार्थितं लभ्यते त्वया । तोषणेन पितृणां च नृहरेः पदमेष्यति ।।३
इतोऽवरुन्ध शैलेन्द्रात्पश्चिमां दिशमास्थितः। गच्छ शीघ्रं महात्मंस्त्वं सुधा संप्राप्यते त्वया।।४
यथा हनूमान् तेजस्वी प्रसन्नो भविता तथा। क्रियतां यत्नसंपत्तिस्सर्वं सेत्स्यति चिन्तितम्।।५
किमत्र बहुनोक्तेन श्रोतव्यो भगवान् त्वया। स्तुतिप्रसन्नो भगवान् दद्यान्नृणामभीप्सितम्।।६
अजानन् स्वबलं नित्यं स्तुत्या जानन्महामते। अलक्षीकुरुते सर्वान् सूर्यो वा यदि चन्द्रमाः।७
पुरा यं मन्दरं शैलमध्युवास समीरणः । अञ्जनास्पर्शनेनामुमजीजनदनुत्तमम् ।।८
प्रादुर्भावक्षणेनायं क्षुधितो बलगर्वितः । अथ तं भास्करं दृष्ट्वा प्रायाद्दाडिमशङ्कया ।।९
उड्डीयमाने व्योमस्था देवास्सेन्द्राः प्रदुद्रुवुः। आःकिमेतदिति व्यग्रा यक्षा भूतानि मेनिरे।।१०
अभियान्तं ततो दृष्ट्वा हनूमन्तमहःपतिः । समीरणस्य माहात्म्याद्वेगवन्तमकीर्तयत् ।।११

भास्करः -

हनूमन् बाल्यसमये वेगो ह्यनुपमस्तुतः । पूर्वक्षणे समुत्पन्नो द्वितीयक्षणविह्वलः ।।१२
ईदृग्विधो जवस्स्वस्य गुरोरप्यधिका गुणाः । तस्मात्तव प्रसन्नोऽहं सद्विद्या वैदिकी तव।।१३
चतुर्भुजत्वमपि ते ब्रह्मचर्येण सेत्स्यति । यो ब्रह्मणा स्तौति दत्तवरमज्ञमनिन्दितम् ।।१४
तस्य स्वबलविज्ञानीं घटयिष्यति चिन्तितम् ।

अगस्त्यः -

एवमुक्त्वा दिनाध्यक्षः करस्थकमलादिभिः ।।१५
विकृष्य कमलं तस्मै रसपूर्णं प्रदत्तवान् । हनूमान् प्रणम्य शिरसा प्रगृह्य मधुवारिजम् ।।१६
हर्षफुल्लदनाक्लेशः प्रययौ पितुराश्रमम् । तादृग्विधं विक्रमं च कृत्वा विक्रमचेतसा ।।१७
वायुना पाल्यमानस्तु प्रावर्धत दिने दिने । कदाचित् क्रीडमानस्तु बालभावेन चैन्दवम्।।१८
कलङ्कहरिणं ज्ञात्वा कृतवान् ग्रहणे मतिम्। ततो जवेन भास्वन्तं नभोमध्ये सुधाकरम्।।१९
ग्रहीतुकामो भगवान् पुप्लुवे चन्द्रमण्डलम्। गृहीतुमनसं दृष्ट्वा चिह्नमज्ञानतो मृगम् ।।२०

शशिरां प्रेरयामास हिमानीं हिमदीधितिः । सा तेन प्रेरिता वायुनन्दनं जवशालिनम् ।।२१
शिशिरार्तस्समायाति किमित्युक्त्वा तमाप वै। तत्र वृत्तिं ततो दृश्य स्वभूवात्सल्यतो मुने।।२२
समीरणोऽपि भगवान् प्रायात्तान्दिशमाकुलम्। मूर्तिमन्तमथो दृष्ट्वा समीरस्तां प्रविश्य वै।।२३
पदात् पदं प्रचलितुमक्षमां व्याकरोत् तदा। मारुतिस्तु ततो वेगात् हिमानीं दृश्य चाक्षमः।।२४
प्रायाच्चन्द्रमसो बिम्बं निरुपाधिजवस्तथा । चन्द्रमास्तु मरुत्पुत्रं मृगीण्यामाकृतिं तदा ।।२५
जवमास्थाय विक्रान्तं दृश्य सस्मार वासवम्। विधोस्संस्मृतिमात्रेण वासवः प्रत्यदृश्यत।।२६
वज्रधन्वा गजाद्यक्षमधिरुह्य वियत्स्थितः । एष विष्णुशरीरस्स इति सञ्चिन्त्य मारुतिः।।२७
करेण ताडयामास गजराजं बलोद्धतः । ताडितस्तेन नागेन्द्रः पलायनपरोऽभवत् ।।२८
प्रधावतो गजन्द्रस्य स्कन्धारूढो दिवस्पतिः । उन्मुखीभूय चिक्षेप वज्रं पवनजं प्रति ।।२९
तेन वज्रेण किञ्चिद्वै निहतो हनुभागतः । मारुतिर्हनुमान्नाम वहन् चन्द्रमधावत ।।३०
चन्द्रस्तु देवतात्मासौ तमालोक्य निराकुलम् । अभीकं तं हनूमन्तमिदमूचुर्महामते ।।३१

चन्द्रः -

मम लक्षणमेतद्धि दुर्ग्रहं ह्यागमत् त्वया । तथापि भवतो यानं सफलं कर्तुमाद्रिये ।। ३२
इमां स्वीकुरु भद्रं ते सुधां सुरवरोचिताम् । यथा यद्याचितं तद्धि दीयते नात्र संशयः ।।३३
जवातिरेको भवतो मनो मे प्रीणयन्नयम् । प्रदापयति ते वायुसूनो त्वद्याचितं सदा ।।३४

हनूमान् -

विधो त्वयि त्वया दत्ता सुधा नक्षत्रनायक। निक्षिप्यते यथा काङ्क्ष्यमेतदादीप्यतां त्वया।।३५

अगस्त्यः -

इति चन्द्रमसि क्षिप्य दीप्यमानां सुधां नवाम् । हनूमान् वेगसंपन्नो जगाम भवनं तथा ।।३६
तद्गत्वा हनुमत्पार्श्वे स्मर्तव्यं वृत्तमीदृशम् । ततो हनूमान् सर्वं ते तद्दास्यति न संशयः।।३७

पूषा -

इतीदं बोधितस्तेन तत्रागस्त्येन धीमता । वामदेवो हृष्टमनाः पश्चिमां दिशमभ्ययात्।।३८
अगस्त्य वचनं चित्ते कृत्वा तत्वावबोधकः । वामदेवो हनुमतश्शैलपादमुपारुहत् ।।३९
तत्रापश्यन्महाव्याघ्रान्सिंहान्नागान्बहून्मृगान् । पञ्चवक्त्रान्सप्तवक्त्रान्दशवक्त्राननेकशः ।।४०
सरीसृपान्धावमानान्शतशीर्षांश्च कांश्चन। प्रलम्बमानान्कुहरे जृम्भमानांश्च पङ्क्तिशः ।।४२
क्वचित्पर्वतसंकाशान् क्वचिद्घनसमान् गजान् ।
क्वचिदैरावतप्रख्यान् गजराजान् ददर्श ह ।।४३

चतुर्दन्तानपि गजान् पञ्चदन्तान्मृगाधिपान् ।
क्वचिच्च किन्नरा हृष्टाः क्वचित्किंपुरुषाङ्गनाः ।।४४
क्वचिद्गन्धर्वपतयः क्वचिद्दैत्याः क्वचित्सुराः ।
क्रीडन्ति वानरान्गृह्य विटावेश्याजनान् क्वचित् ।।४५
एतान् सर्वान् समालोक्य वामदेवः प्रसन्नधीः। चरितार्थमिवात्मानं मन्वानो वाक्यमब्रवीत्।।४६
हे वयस्या न वो भीतिर्मनसां वीक्ष्य कुञ्जरान् ।
इमे हि हनुमत्सृष्टा न बाधन्ते सदा जनान् ।।४७
अत्र सन्निहतश्शैलपादे हनुमतो महान्। भगवांस्तत्पिता यस्माद्वाति जाम्बवदद्य धृक् ।।४८
इह देवास्सगन्धर्वा वायुनन्दनसेविनः। स्नात्वा हनूमतस्तीर्थे विनिर्गच्छन्ति सङ्घशः ।।४९
विश्वावसुमुखा देवाः प्रत्यहं हनुमत्पदम्। आश्रित्य कुर्वते स्नानं तत्तीरे मुक्तिकाङ्क्षया ।।५०
अत्र सन्निहितो माघस्सर्वपापविदारकः । अत्र स्थित्वा तपः कुर्मो मासमेकं प्रयत्नतः ।।५१
पश्चाद्विधास्यति क्षिप्रं हनुमानस्मदीप्सितम्। इत्युक्त्वा तानृषिसुतानगस्त्याभिमतेन वै ।।५२
वर्त्मना गिरिराजस्य प्रदक्षिणमथाकरोत् । पूर्वचिन्तनमव्यग्रो गर्भिणीवत्पदात् पदम् ।।५३
पूर्वोक्तविधिना स्नातो व्यनैषीत् प्रत्यहं तु यः। उत्तरस्मिन् हनुमतः पार्श्वे पर्णमयीं कुटीम्।।५४
कृत्वा तपांसि कुरुते सह सद्ब्रह्मवादिभिः। एवं काले नीयमाने प्रादुरासीत् तपोवने ।।५५
भानुवारसमायुक्ता दृश्यते माघपौर्णिमा । तस्मिन् दिने वामदेवः प्रातरुत्थाय निर्मलः ।।५६
गत्वा हनुमतस्तीर्थं मलं प्रक्षाल्य वारिणा। त्रिराचम्य शुचिर्भूत्वा प्राङ्मुखो विनयान्वितः।।५७
पारिजाततरोर्मूलेवासिनं वनवासिनम् । पश्चिमाभिमुखं बालं हनूमन्तं भजंस्तदा ।।५८
नाभिदघ्ने जले स्थित्वा वैदिकं मन्त्रमुच्चरन्। स्नात्वा धृतपरीधानः पक्षमन्वास्य पूरकम्।।५९
सरस्तीरे समासीनं हनूमन्तमतन्द्रितः । त्रिंशत्कृत्वस्समाप्लुत्य स्तोत्रयामास केवलम्।।६०

वामदेवः -

त्वं वै वरेण्यो हनुमन् वनौकसां त्वं कीर्तनीयस्सततं महीभुवा ।
त्वं श्लाघनीयो रघुवंशकेतुना त्वं नन्दमीयोऽसि दिवौकसां गणैः ।। ६१
अशोकवन्यां त्वमशोकदाता त्वमक्षहन्ता त्वमनिन्द्यविक्रमः ।
त्वं गोष्पदीभूतमहार्णवोऽसि त्वमन्तवेद्यस्स्तुतवेगलाञ्छन ।। ६२
रक्षःपुरद्वारकृतावतारलङ्काभिदं कातरितोऽङ्गुलिक्रमात् ।

निरर्गलं सौरिपुरी प्रवेशिता तस्मै नमो मारुतये महात्मने ।। ६३
संपातिवाक्येन वनौकसांस्तवैर्निरस्य विघ्नान् पथि भव्यशालिना ।
विलङ्घितो येन महापयोनिधिर्नमो नमस्ते महते हनूमते ।। ६४
वालाग्रनिष्ठ्यूत महानलेन यो लङ्कां निराकारमहन्निरङ्कुशम् ।
महीभुवं प्रीणयति स्म जानकीं नमो नमस्ते महते हनूमते ।। ६५
हिरण्यनाभः पथि ताडितोऽपि सन् यं रामदूतं समनन्दयत् पुरा ।
फलैश्च पुष्पैरपि साधयन् गिरा नमो नमस्ते महते हनूमते ।। ६६
मुक्ताट्टहासान्विरचय्य मन्त्रिजान् कुमारमक्षं च मृधे प्रसह्य वै ।
विनिष्पिपेष प्रसभं च तद्वनं नमो नमस्ते महते हनूमते ।। ६७
जनिक्षणादेव शशिप्रभाकरौ जवातिरेकाद्बलवान्निरस्य तौ ।
स्तुतस्तुताभ्यामथतन्महिङ्गतो नमो नमस्ते महते हनूमते ।। ६८
विदेहकन्या चिकुरे परीप्सितं मणिं समाधाय विलङ्घ्य चार्णवम् ।
प्रदापयामास रघूद्वहाय यो नमो नमस्ते महते हनूमते ।। ६९
कृत्वाऽभिषेकं तरुणाम्बुधारया दृढां कपालीमपि राघवेश्वरः ।
यस्मै ददातीतरमृग्यमन्वहं नमो नमस्ते महते हनूमते ।। ७०
वचोऽनुरोधेन पुरा महामृधे वर्षीयसो जाम्बवतो महौषधीः ।
प्रगृह्य योऽजीवयदूर्मिलासखं नमो नमस्ते महते हनूमते ।। ७१
त्वं रामदूतोऽसि दशास्यदर्पहा त्वं वेदवेद्योऽसि महर्षिपूजितः ।
त्वं रुद्ररूपोऽसि भवान् हि वैष्णवः पुराविदस्त्वां विविधा गृणान्ति वै ।।७२
त्वं पुत्रकामेषु सुपुत्रदाता त्वं वीर्यकामेषु सुवीर्यदाता ।
त्वं भक्तिकामेषु हि भक्तिदाता किं किं न दाताऽसि नृणां हनूमन् ।। ७३
स्तुतिप्रियस्त्वं पवनप्रियस्त्वं भक्तप्रियस्त्वं नृहरिप्रियस्त्वम् ।
रामप्रियस्त्वं सवितृप्रियस्त्वं प्रसीद मह्यं हनुमन्नमस्ते ।। ७४
नमस्ते नमस्तेऽस्तु नाथाय तुभ्यं नमस्ते नमस्तेऽक्षप्राणहन्त्रे ।
नमस्ते नमस्तेऽसुरगर्भहन्त्रे नमस्ते समस्ताभिलाषप्रदात्रे ।। ७५

पूषा -

इति स्तुतो महायोगी वानरेन्द्रः प्रहर्षितः । ऊचे संस्कृतया वाचा वामदेवं कृताञ्जलिम् ।।७६

श्रीहनुमान् -

वामदेव त्वया यद्वा वाञ्छितं वद साधये। विवादो नात्र कर्तव्यो नृहरौ शास्तरि स्थिते।।७७

वामदेवः -

महातपा नाम पिता मम मारुतनन्दन । वेदानध्यापयामास सानुक्रोशेन मादृशान् ।।७८

तत्रायं शैशवात् स्वामी पिता संप्रार्थितो मया । अधीताश्श्रुतयस्तात दीयते गुरुदक्षिणा ।।७९

तदा मां बालिशं वाक्यमूचिवान् स महातपाः । वारयामास बहुशस्सहशिष्यमनादृतः।।८०

अथो निर्बन्धतो राजन् वासराणां महातपाः। सुधा मे दीयतां वस्तु पितुश्श्राद्धाय गुर्विणे।।८१

इत्युक्तोऽहममीभिस्तु सह भ्रात्रैः पितुर्गुरोः । अगस्त्यस्याश्रमपदं प्राप्तवान् पवनात्मज ।।८२

नमस्कृतो मयागस्त्यस्सर्वं बुद्ध्वा मदीप्सितम् । इह याहीति मामाह हनूमंस्तव सन्निधौ ।।८३

स हि स्तुतस्सर्वकामान् प्रदास्यति न संशयः । प्रार्थितादधिकं दातुं क्षमते हनुमानिति ।।८४

इत्युक्तो मुनिना सोऽहमगस्त्याधिष्ठवर्त्मना । संप्राप्तो दैवयोगेन हनूमन् भवदन्तिकम् ।।८५

श्रीहनुमन् -

सुधा निक्षेपरूपेण स्थापिता चन्द्रमण्डली । सा हीदानीं भवद्वस्तु दीप्यते सुमनोहरम् ।।८६

पूषा -

तत्रान्तरे स भगवान् चन्द्रमा हनुमत्पदम् । नमस्कृत्यास नृहरेरवतीर्णो नगोत्तमम् ।।८७

अवगाह्य महातीर्थे पावनेः पावने तथा । भगवांश्चन्द्रमाः पार्श्वे हनूमन्तमुपासदत् ।।८८

अथोत्थाय हनूमांस्तु बहुमानेन चक्षुषा । पश्यन्नपश्यायकरमिदमूचे सुधाकरम् ।।८९

श्रीहनुमान् -

नक्षत्रेश महाभाग त्वयि गुप्ता मया पुरा । या सुधा मुनिपोताय दीयतां तदिदं त्वया ।।९०

जन्मप्रभृति वत्सोऽयं हरिभक्तो जितेन्द्रियः। वामदेवो महायोगी विशेषं हनुमत्प्रियः ।।९१

हनुमत्प्रीणनाच्चैव पितॄणां प्रीणनेन च । गुरुप्रीणनयाप्यस्मिन् प्रसन्नो नरकेसरी ।।९२

चन्द्रमाः -

दुर्लभा हि सुधा लोके यदस्मिन् दीयते त्वया। हनूमंस्तद्दयादेव देवो मर्त्यो न केवलम्।।९३

अमुना रचितस्स्तोत्रं त्वत्कृते पवनात्मज। विलिख्य पठते यस्तु श्रुणुते वा सतां मतः ।।९४

विशिष्य पौर्णमास्यां वै भानुवारे पठेन्नरः । त्वत्कृपालम्बनद्वारा विष्णुभक्तिः प्रजायते ।।९५

सुदुर्लभं नृणां जन्म नरकेसरिणः पथे । तत्रापि दुर्लभा विष्णौ भक्तिरव्यभिचारिणी ।।९६

भवत्कृपातिरेकेण नरो वा देवतापि वा । नृहरौ भक्तिमभ्येत्य जीवन्मुक्तो न संशयः ।।९७

पूषा -

इति संकीर्त्य च ददौ सुधां तापसयोगिने । हनूमतोऽनुमत्यासौ नृहरेः पदमभ्यगात् ।।९८

ततो हनूमान् मुनये दापयन् चन्द्रमस्सुधाम् । निश्रेयसं ते भावीति व्याहृत्यान्तरधात्तदा ।।९९

वामदेवः -

सुधां प्रगृह्य धर्मात्मा हनुमद्वाक्ययोदितः । हस्तामलकवन्मेने नृहरेरपरोक्षताम् ।।१००

वाञ्छितादधिकं दद्याद्धनुमानिति यद्वचः । कुम्भयोनीरितं तथ्यं सर्वथा नात्र संशयः ।।१०१

इति विस्मयमापन्नो वामदेवस्सहानुगः । नृहरिं च हनूमन्तं ध्यायन्नाश्रममभ्यगात् ।।१०२

ततो गत्वाश्रमपदं प्रश्रयावनतो मुनिः । अभिवाद्य गुरुं पश्चाद्दर्शयामास तां सुधाम् ।।१०३

ततो वाहतवर्णी तां सुधां गृह्य महातपाः । मूर्ध्न्युपाघ्राय तनयं पस्पर्श स मुहुर्मुहुः ।।१०४

तामेव गाथामनिशं श्राव्यां हनुमतः प्रियाम्। शृण्वन् दुरुस्तथा पुत्रं प्रीणयन् स जहर्ष ह।।१०४

राजर्षे तादृशस्यैव महिम्नः पदमास्थितः। वामदेवो नरहरेः प्रसादान्मुक्तिभाक् क्षणात् ।।१०५

किं पुनः पुनरुक्तेन नरसिंहपदे वसन् । वैष्णवीं भक्तिमासाद्य जीवन्मुक्तो भवेन्नरः ।।१०६

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये षोडशोऽध्यायः ।।

सप्तदशोऽध्यायः

श्रीवसिष्ठः -

इतीरितस्तु भगवान् विश्वामित्रो महामुनिः । हर्षसंकुलया वाचा प्रस्तोतुमुपचक्रमे ।। १

सहस्रशीर्षाय सहस्रबाहवे सहस्रपादाय सहस्ररोचिषे ।
महानुभावाय महास्त्रचारिणे नमः परस्मै पतये महात्मनाम् ।।२
अगाधसत्वाय तमोऽपहारिणे महात्मने सत्यमहावियत्स्पृशे ।
अनामयायामितधीमयाय ते नमो नमः कारणकारणाय ।।३
अजाय लोकत्रयपावनाय भूतात्मने शिक्षितसंहताय ।
सूर्याय सर्गप्रलयालयाय नमो महाकारुणिकोत्तमाय ।।४
नमः प्रशास्त्रे जगतां त्रयाणां नमः प्रशास्त्रे जहि विद्विषे मे ।
तमोनिहन्त्रे हृदयंगमाय नमः प्रवक्त्रे निगमादिवाचम् ।।५

विवस्वते ज्ञानिहृदन्तरात्मने जगत्प्रतीताय जगद्धितैषिणे ।
स्वयंभुवे दीप्तसहस्रचक्षुषे सुतोत्तमायामिततेजसे नमः ।।६
नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिसूमूर्तिधारिणे विरिञ्चिनारायणशङ्करात्मने ।।७
ज्योतिर्गणानां पतये नमस्ते दिनाधिनाथाय दिवाकराय ।
नमः प्रभाणामधिपाय शास्वते नमः परस्मै महते बलाय ।।८
हिरण्यरूपाय हिरण्मयाय हिरण्यकेशाय हिरण्यबाहवे ।
हिरण्यधूम्ने च हिरण्ययोनये हिरण्यनाभाय नमो हिरण्वते ।।९
विश्वात्मने पूर्वमहीध्ररूपिणे नमः परायावनिभृद्विहारिणे ।
छायाप्रमाथिप्रमदाकुटुम्बिने नमो नमस्ते त्रिजगत्कुटुम्बिने ।।१०
त्वं यत्र रूपी प्रतिभानवानसि त्वं सत्प्रणेता भगवानसि प्रभुः ।
त्वं तत्फलानामशनायकल्पितस्त्वं हव्यकव्यप्रसवस्त्वमीश्वरः ।।११
योऽसौ तपन्नुदयमेति नभोऽन्तराले बह्निभ्य एव किरणान् प्रतिगृह्य शान्तान् ।
भूयोऽपि तत्र विसृजस्यधिकं त्वमेव सायन्तनेषु समयेषु तथा गृणन्ति ।।१२

वसिष्ठः -

इति स्तुतिनमस्याभ्यां तोषितो भास्करो विभुः। विश्वामित्रं तथा राजन्निदं वचनमब्रवीत्।।१३

पूषा -

स्तवेनानेन राजर्षे तोषितोऽहं त्वयाभितः । यद्यद्वाञ्छसि धर्मात्मन् तत्तत्ते दीयते मया ।।१४

विश्वामित्रः -

भगवन् त्वत्प्रसादेन सर्वं मे साधु लक्षितम् । ब्राह्मण्यं च प्रदत्तं चेदुत्तीर्णोऽहं त्वदाज्ञया ।।१५
श्रीनृसिंहतनौ भक्तिर्मम भूयादचञ्चला । वसिष्ठवचसा यस्मात् ब्राह्मण्यं प्रादुरेष्यति ।।१६
दुर्लभा वैष्णवी भक्तिर्यया मुक्तो भवेन्नरः । सामर्थ्यं दीयतां भानो प्रसन्नो यदि सर्वदा ।।१७

पूषा -

अयं हि घटिकाशैलश्शृङ्गकोटिविराजितः । प्रधानान्यत्र सानूनि चतुर्दश महान्ति वै ।।१८
शैलोत्तरे शृङ्गवरे ब्रह्माध्यापयति श्रुतीः । शिष्येभ्यस्तु विशिष्टेभ्यो ब्रह्मतीर्थतटे सदा ।।१९
तस्याविदूरे महतामृषीणां पुण्यकर्मणाम् । तत्राश्रमस्ते भविता राजर्षे भवदाख्यया ।।२०
सरश्च तत्र सततं निर्मलोदकमुत्तमम् । तावकं दीप्यतस्तस्मात् श्रीर्जज्ञे विदुषां पते ।।२१

तस्योत्तरदिशि स्फीतं महासर इति श्रुतम् । यस्य पादे नरहरिर्लक्ष्मीमुदवहद्धरिः ।।२२
अभ्रंकषमहावृक्षास्तत्र सन्ति फलोपगाः । पुष्पोपगाश्च तरवस्समृद्धविटपैस्सदा ।।२३
मृगाश्च शतशस्तत्र द्वन्द्वं द्वन्द्वं रमन्ति वै । प्रसन्नाः पक्षिणस्तत्र तथा क्रीडन्ति रागिनः ।।२४

विश्वामित्रः -

भास्वन् कथं जनिर्वास्मिन् सुधार्णवभुवश्श्रियः। अभवद्भगवान् वायं पाणिग्रहणतत्परः।।२५

पूषा -

पुरा लक्ष्मी महामाया स्वोत्पत्तिं पुनरिच्छती । सहस्रपत्रकमलाज्जज्ञे त्रिजगदीश्वरी ।।२६
सा कन्यारूपमास्थाय श्रीनृसिंहपुरे वरे । अवतीर्य सरस्तीरे वासं चक्रे सखीजनैः ।।२७
पुरस्य नैरृते पार्श्वे घटिकाद्रेस्तथोत्तरे । ब्रह्मोदस्याविदूरे सा स्वनाम्ना सरसीं व्यधात् ।।२८
तत्र श्री रमते बाला डोलामारुह्य काञ्चनीम्। स्तूयमाना महद्भिश्च नित्यमप्सरसां गणैः।२९
स्तुता गन्धर्वकन्याभिर्मुनिकन्याभिरीडिता । मुमुक्षुभिस्सदैश्वर्यकामिभिस्स्तूयते सदा ।।३०
गजाभ्यां हेमकुम्भाभ्यां स्थापिता कर्णिकापदे। निषेदुषी कटाक्षेण जनयन्ती शुभं नृणाम्।।३१
तत्रान्तरे महाविष्णुर्मदनास्त्रविमोहितः । दैवतैः प्रार्थ्यमानस्तु श्रियमुद्वोढुमैच्छत ।।३२
पक्षिराजं समारुह्य महेन्द्रवचसा हरिः । विचिन्वानो महालक्ष्मीं जम्बूद्वीपमविन्दत ।।३३
विन्ध्यं च मन्दरं चाद्रिं तत्र शेषाचलं तथा । आर्यावर्तं महाविष्णुराकाशस्थो ददर्श ह ।।३४
अनन्तरं च घटिकाशैलराजं समुन्नतम् । वामदेवादिमुनिभिः पूजितं पुण्ययोगिभिः ।।३५
अगस्त्येन शुकेनापि ब्रह्मणा पाण्डवैस्तथा। दुर्वाससा सप्तर्षिभिः पूजितञ्च महर्षिभिः ।३६
तस्योत्तरदिशि स्फीतमुद्यानमुदकारजम् । नानापक्षिभिराकीर्णं पश्यतां लक्ष्मिवर्धनम् ।।३७
तत्रोद्याने महाचैत्ररथप्रख्ये विहारिणीम् । लक्ष्मीं दृष्ट्वा प्रहृष्टात्मा बभूव सह दैवतैः ।।३८
भूयोऽन्तिकमुपाश्रित्य शङ्खचक्रधरो हरिः । गरुडस्थो लीलयैव जग्राह करवारिजम् ।।३९
पाणिस्थं पङ्कजं गृह्यापश्यमानं तथा हरिम्। दृष्ट्वादृष्ट्वा नतमुखीं प्रभावाद्वारिजोद्भवाम्।४०
पाणिं गृह्य ततो विष्णुः परिष्वज्य च वार्धिजाम्। अङ्के निधाय सस्मेरमिदमूचे सुरान् प्रति।४१

विष्णुः -

अनया खलु सुश्रोण्या सर्वेषां भवतामपि। दिवि वा भुवि वा नृणां समृद्धास्संपदो गृहे ।।४२
एतदर्थं पुरास्माभिर्मथितो दुग्धवारिधिः । इत्थं खलु वरारोहां नारीणामुत्तमां सुराः ।।४३
क्षणमात्रमपि त्यक्तुं लक्ष्मीमेनां मनोहराम् । न जीवेयमहं पाथोबहिष्टो मत्स्यराडिव ।।४४
पुरा गौरीं श्रियं वाणीं दृष्ट्वाहं रुद्रवेधसौ । सर्वैश्चिन्तितमेतद्धि यासां वरयते नरः ।।४५

ततो मां वरयामास लक्ष्मीरीशानमीश्वरी । सरस्वती च ब्रह्माणं यथातथमुपागताः ।।४६
तदा प्रभृति बालेयं मनो हरति मामकम् । सैषा प्रसन्ना वरदा नृणां च मरुतामपि ।।४७
महेन्द्र ! भवता कार्यं स्तवनं कमलां प्रति। इयं खलु महाभागा भुक्तिमुक्तिफलप्रदा ।।४८

महेन्द्र स्तुतिः -

त्वं श्रीः ह्रीः प्रिया विष्णोस्त्वमीशानि महेश्वरी।
सरस्वती त्वमेकेव दृश्यसे नर्तकीव हि।।४९
त्वदाश्रितानां प्रभवन्ति संपदः प्रसन्नभावेन परैर्दुरासदा ।
पुराणवाचोविषया त्वमेकिका संगीयसे वेदवचोभिरादरात् ।। ५०
त्वं विश्वगोप्त्री जगतां जनित्री तथा निहन्त्री त्रिगुणाश्रया त्वम् ।
विष्णोरुरस्सीमनिषेदुषी त्वं ददासि पुत्रांश्च तथा फलानि ।। ५१
कल्पादयो भूमिरुहाश्च चन्द्रमास्सुधा तथा कामगवी महाप्सराः ।
चिन्तामणिश्च मणिरेव समुज्ज्वलश्री सर्वाण्यमूनि तव सोदरभावभाञ्जि।।५२
विष्णोरमुष्यत्रिजगत्प्रणेतुर्वक्षस्थले कौस्तुभरत्नभूषया ।
सहाधिवासं भवतीव च स्म करोति काला भुवनेषु पद्मे ।। ५३
अनादिभावं गमितापि दुग्धपयोनिधौ जन्म तथा पयोजे ।
इतः परं जन्म कुतोऽपि देवि भावीति किं सादिगणेषु गण्या ।। ५४
यामेति वाग्भनवतीत च चन्द्रलेखा मूलेति शान्तिरिति पुष्टिरिति प्रमेति ।
इष्टिस्तथा मणिरिति प्रमदेति विष्णोस्स्वाहास्वधेतिविबुधाभवतीं भणन्ति।।५५
ह्रीं क्लीमिति स्वकमलोपरि संस्थवर्णावाभ्यां पुटीकृतमुपेत्य विभाति पद्मे ।
श्रीं श्रीमिति प्रतिपदं जपतां त्वदाख्यां किन्नाम भाविनजगत्त्रितये बुधानाम्।।५६
दिग्दन्ति पुष्करगृहीतनवोदकुम्भधारातिनिर्यदुदकप्लवमानदेहाम् ।
दिव्याम्बराभरणमाल्यसुगन्धधूपदीपोपहारबलिभिः कमले भजे त्वाम् ।।५७
विश्वामयीति वचसामधिदेवतेति गौरीति भूमिरिति दीधितिरित्यजस्रम् ।
विद्याकरेति कमलेति शचीति च त्वां व्याकुर्वते निगमवाक्प्रवरास्सवित्रि ।।५८

इति स्तुता तदा देवी लक्ष्मीरुन्निद्रलक्षणा।अदादभीप्सितं सर्वं तस्मै विबुधस्वामिने।।५९

विष्णुः -

यस्त्वनेन स्तवेनैव स्तोष्यत्यानम्रमूर्तिमान् । तस्य गेहे महालक्ष्मीस्तिष्ठते नात्र संशयः।।६०

इदं सरोवरं देव लक्ष्मीसर इतीर्यते। अत्र यस्स्नाति मनुजो वाञ्छितानि स वै लभेत्।।६१
भृगुवारे श्रिया सङ्गो मम जातो महासुराः। विशिष्य भृगुवारे तु स्नातव्यं नियमादितः ।।६२
अत्र सन्निहितो लक्ष्म्या वसन्ते समये त्वहम्। तदा ममोत्सवो लक्ष्म्या मम च प्रभविष्यति।६३
सुराः किं बहुनोक्तेन नित्यं सन्निहितस्त्वहम् । नरकेसरिणस्स्वैरं बिम्बे विहतिमाद्रिये ।।६४

पूषा -

स्तूयमानो महाविष्णुर्महालक्ष्म्या सहामरैः । सनकादिस्तुतो देवस्तत्रैवान्तरधीयत ।।६५
भृगुवारे तु यस्स्नाति लक्ष्मीसरसि नित्यदा। सर्वान्कामान् समभ्येत्य विष्णुलोके महीयते।।६६
वासो वापि फलं वापि ताम्बूलं वा गुडं पयः। हरिद्रा वा सुवासिन्यै दातव्यं तत्र शक्तितः।।६७
कल्पोक्तेन प्रकारेण लक्ष्मीसरसि यः पुमान् । सुवासिनीं प्रीणयते यथाशक्ति भृगोर्दिने।।६८
लक्ष्मीसरसि यस्स्नात्वा भृगुवारे ह्यतन्द्रितः। लक्ष्मीनृसिंहपूजां च कुरुते वै स सिद्धभाक्।।६९
तस्मात् सर्वप्रयत्नेन नियमादादरात् तथा । नृसिंहपूजा कर्तव्या पुंसा साजुज्यमिच्छता ।।७०

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये सप्तदशोऽध्यायः ।।

अष्टादशोऽध्यायः

श्रीवसिष्ठः -

इति निर्दिश्य तपसे विश्वामित्रस्य धीमतः । द्वादशात्मा स भगवान् यथागतमुपेयिवान् ।।१
विश्वामित्रस्तु धर्मात्मा राजर्षिस्समुपेष्य सः । ब्राह्मण्यकामो घटिकाशैलराजमुपासदत् ।।२
पदे पदे चिन्तयानो वाक्यानि द्वादशात्मनः । प्रहृष्टचेता राजर्षिर्व्यतनोत् तत्प्रदक्षिणम् ।।३
प्रदक्षिणीकृत्य गिरिं त्रिस्तथा नृपसत्तमः । सर्वान् ऋषीन्नमस्कृत्य ब्रह्माणमपि भैरवम् ।।४
रविनोक्तेन विधिना लक्ष्मीसरसि मज्जनम् । कृत्वा सुवासिनीपूजां भृगुवारे निराकुलः ।।५
तस्य दक्षिणपार्श्वस्थस्तपस्तेपे ह्यनुत्तमम् । दुर्दर्शं च दुराधर्षं सर्वैरपि महात्मभिः ।।६
विश्मामित्रो महाभागः कुरुते तादृशं तपः । ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षर्तौ सलिलं गतः।।७
शिशिरेषु तदा चक्रे तपः परमदारुणम् । अलक्षीकृत्य विघ्नांश्च देवराजकृतांस्तदा ।।८
फलमूलजलालम्बो मुमोचाशामतन्द्रितः । शाखोपशाखाश्शतशो वंशवल्यस्तथाविधाः ।।९
तथ्यं कलेबरं तस्य व्यावव्रुः परतो भृशम् । पुरा फलाशसमये विष्णुमित्राय देवराट् ।।१०

प्रदर्शयामास पञ्च बदरान् विघ्नकारिणः। एषां फलानि भुक्त्वा वै नरो राजवशं गतः ।।११
भ्रमते कामिनीपार्श्वे तान् पञ्चादर्शयन् बुधः। तानाश्रमपदापन्नानलीनान् फलशालिनः ।।१२
महेन्द्रप्रेरितान् काम्ये स धर्मात्मा निराशयः। शशाप वीरुधः पञ्चनिष्पत्रा निष्फला इति।।१३
तदाप्रभृति दृश्यन्ते वीरुधो विटपात्मकाः। ब्राह्मण्यकामं विज्ञाय तमृषिं द्युम्नतेजसम् ।।१४
मामीयुरमृतार्थं वै श्रीनृसिंहनिबोधिताः । अभ्येत्य मम सन्दिग्धगिरिं सर्वे सुधाशनाः ।।१५

देवाः -

तस्थिवांसमिमं देशं मामूचुस्निग्धया गिरा । अस्तु भद्रं भगवतो मित्रावरुणजन्मनः ।।१६
भवतस्तत्रभवतो वसिष्ठो जपतां वरः । अयं महात्मा तपसां प्रभावेन बलं द्विषः ।।१७
महामराणां नृहरेरनुकंपामवाप सः । विश्वामित्रस्य पार्श्वे तु गतमस्माभिरादरात् ।।१८
ब्रह्मर्षित्वं च भवते ददुरित्युक्तवर्तिने । वसिष्ठवचसा मह्यं ब्रह्मर्षित्वं प्रयच्छत ।।१९
इतीरयति धर्मात्मा विश्वामित्रो महातपाः । विश्वामित्रस्य चरितं श्रुत्वा योगभृतां वरः ।।२०
श्रीनृसिंहस्स भगवान् विस्मयं परमेयिवान्। ततोऽस्मांश्च सहेन्द्रेण चोदयामास तेऽन्तिकम्।२१
भवद्वाक्येन लभतां ब्रह्मर्षित्वं मुनीश्वरः ।

वसिष्ठः -

इत्युक्तोऽहं महीपाल हर्षनिर्भरमानसः ।।२२
नृहरेश्शासनं गृह्य देवानामनुगोऽभवम् । अद्राक्षमाश्रमपदं विश्वामित्रस्य योगिनः ।।२३
अद्राक्षं च ततस्तत्र तरुवृद्धिमनेकशः । तत्र कांचन गुल्मांश्च लताश्च विविधा द्रुमाः ।।२४
भूत्वा बहुफलापुष्पैर्युज्ज्वलन्त्यश्च वीरुधः। क्रीडन्ति जन्तवस्तत्र द्वन्द्वशोऽपि तथापि सः।।२५
कथंकारी तपस्तीव्रं क्रीडावानित्यचिन्तयन्।ततो लक्ष्मीसरस्यां वै कृत्वाऽहं कर्म चाह्निकम्।२६
पश्चात्तस्याश्रमपदं सह देवैस्तथागमम् । मालाकारो नृसिंहस्य मया दृष्टो वनान्तरे ।।२७
वनमालापि पतिता तन्मूर्ध्नि नभसश्च्युता । तदुत्तरक्षणे चापि शङ्खचक्रधरो युवा ।।२८
हेमवर्णविमानस्थो लक्ष्यते स्म नभः पथा । तदद्भुतं समालोक्य हर्षविस्मयमानसः ।।२९
ततोऽहं देवतानां वै राजानमिदमब्रुवन् । कुतः कथं समुत्पन्ना माला मूर्ध्नि निपातिता ।।३०
अमुष्य वैष्णवं रूपं कस्मादेतत् प्रशंस मे ।

इन्द्रः -

आसीत् सत्यव्रतो नाम हनूमन्नगरे पुरा ।।३१
सुशीलगुणसंपन्नो वैष्णवो द्विजसत्तमः । गिरेः प्रदक्षिणं नित्यं कृत्वा कर्मान्तरे मतिम् ।।३२

तनोति ज्ञानवृद्धोऽसौ वृद्धसेवी जितेन्द्रियः। निरीक्ष्य विष्णुभक्तांश्च देवताश्च द्विजन्मनः ।।३३
दण्डवत् प्रणमेन्नित्यमादृतोऽभून्मनीषिभिः । स कदाचिन्नरहरिं वन्दितुं पुरुषर्षभम् ।।३४
घटिकाचलराजानमारुरोह शनैश्शनैः । तस्याहं व्यजने धुत्वा व्यनैषीच्छ्रमशीकरम्।।३५
तथा वैष्णवकैङ्कर्यात् प्राप्तवान् पदमुन्नतम्।कलवङ्को नाम वणिक् पुरा वंशवने स्थितः।।३६
वरतन्तोः प्रसादेन मुनेर्जज्ञे सुतद्वयम्। तस्यायमग्रजः पुत्रो नाम्ना पिङ्गलको मुने ।।३७
वरतन्तुमुनेस्तस्य नित्यं शुश्रूषणे रतः । विष्णुभक्तो वैष्णवेभ्यो यथाशक्ति प्रयच्छति ।।३८
एवं पञ्चाशदब्दास्तु जातास्तस्य महामुने । तथापि पुत्रसंपत्तिरासीन्नैव सुखप्रदा ।।३९
तस्य चिन्ता समभवत् पिङ्गलस्य महाश्रुतेः। स पुत्राभावतो लोकैर्दूष्यमानश्च मानवैः।।४०
तस्य चिन्तयमानस्य दुस्समाधिमधान सः । सन्तानार्थं महामन्त्रं वरतन्तुरुपादिशत् ।।४१
स गोपालमनुं तस्मै उपदिश्य महामुनिः । वैष्णवं तमुपासीनमिति होवाच पिङ्गलम् ।।४२

वरतन्तुः -

चतुर्वर्णममुं मन्त्रराजं सन्तानसिद्धये । प्रातःकाले च मध्याह्ने त्रिकाले च शतं शतम् ।।४३
जपंस्तु हि स गोपालस्सान्निध्यं कुरुते हृदि। सन्निधाय च गोपालः प्रयच्छति सुतान् बहून्।।४४
इतः पश्चिमदिग्भागे घटिकाद्रिरिति श्रुतः । यत्रास्ते भगवान् भूतभावनो नरकेसरी।।४५
प्रयाहि तत्परिसरं सर्वर्षिगणसेवितम् । स एव भगवान् दाता भुक्तिमुक्ती महात्मनाम् ।।४६
वैष्णवाश्च द्विजन्मानस्सन्ति तत्र महामते । तेषां शुश्रूषणे बुद्धिरुदेष्यति न संशयः ।।४७
त्वं विष्णुभक्तस्सततं प्रियवादी जितेन्द्रियः । ब्रह्मोदादिमहातीर्थस्नानं कुरु समाहितः ।।४८
गिरिप्रदक्षिणं चैव कर्तव्यं भुक्तिमिच्छता । तत्रत्येषु च तीर्थेषु स्नातव्यं मुक्तिमिच्छता ।।४९
भुक्तिमुक्तिफले भव्ये एतानि च सतां नृणाम्। प्रयच्छति हृषीकेशो घटिकाद्रौ वसन्पुमान्।।५०
पुरा पुण्यपुराध्यक्षो राजा शत्रुञ्जयाभिधः। अपत्यार्थी गुरोः पार्श्वं काश्यपस्य जगाम ह।।५१
स गत्वा काश्यपमुनेः पादौ गृह्य स याचितः। भार्यया मन्त्रिणा साकमिदमूचे पुरोधसम्।।५२

शत्रुञ्जयः -

कश्यप त्वयि धर्मात्मन्नत्र स्थितिमुपेयुषि । अनपत्यतया व्यग्राः कुतो वयमिदं वद ।।५३
अनपत्यस्य मे ब्रह्मन् क्व राज्यं क्व च मन्त्रिणः।
क्व सेवा क्व च मे भोगः क्व चातुर्वर्ण्यरक्षणम्।।५४

काश्यपः -

शत्रुञ्जय महाभाग विष्णुभक्तिं दृढं कुरु । क्रियतां पुत्रकामेष्टिर्घटिकाद्रिपतौ त्वया ।।५५

नृहरिस्स तु विज्ञाय पुत्रमित्रादिसंपदः । प्रदास्यति महाराजन्नात्र कार्या विचारणा ।।५६
वैष्णवास्तत्र शतशो ब्राह्मणा वेदपारगाः । सन्ति तेषां नियोगेन प्राप्यन्ते पुत्रसंपदः ।।५७

शत्रुञ्जयः -

प्रतिगृह्य मुनेर्वाचं तेनानुज्ञापितस्तथा । पुत्रकामेष्टिमकरोन्नृहरेः पदमेयिवान् ।।५८
अचिरेणैव कालेन वैष्णवानां समागमात् । अनुग्रहान्नरहरेः प्राप्तवान् पुत्रसंपदम् ।।५९
अतस्त्वया नरहरेः पादे मालाकृतः पदम्। आस्थाय भार्यया शक्त्या ब्राह्मणेभ्यः प्रदीयताम्।।६०
तुलस्या मालिका कार्या नृसिंहाय महात्मने। अन्येषां चैव पुष्पाणां माला कार्या प्रयत्नतः।।६१
वैष्णवेषु सदा कुर्वन् भक्तिमव्यग्रया धिया। तत्तत्तीर्थेषु च स्नात्वा यथाशक्ति प्रदीयताम्।।६२
वैष्णवेभ्यः प्रदानेन पुत्रान् प्राप्य सुखी भव। मालाकरणतो भक्त्या प्रयास्यसि च वैष्णवम्।।६३
तत्र सत्यव्रतो नाम हनुमत्पुरि तिष्ठति । तस्य शुश्रूषणद्वारा सर्वं तव भविष्यति ।।६४
अस्मिन् विनयसंपन्ने वैष्णवे द्विजसत्तमे । सदा विहरते देवश्श्रीमान् नरहरिः पुमान् ।।६५
कदाचित् पिङ्गलो नाम वैणिको मुनिपुङ्गवः । उपवीणाहतः पार्श्वमभ्येष्यति हरेरथ ।।६६
उपवीण्या चिरं कालं गातुकामस्स वै मुनिः। नरसिंहः प्रसन्नात्मा दापयिष्यति मालिकाम्।।६७
स तया मालया वीणामलङ्कृत्वा वियत्पथे। गमिष्यति प्रहृष्टात्मा वल्गु गायन् पदे पदे।।६८
वनमाला वायुनुन्ना तव मूर्ध्नि पतिष्यति । तदलंकृतमूर्धा त्वं वैष्णवं लोकमेष्यति ।।६९

इन्द्रः -

अङ्गीकुर्वन् वचस्तस्य वरतन्तोर्महामुनेः । अभ्यगादमुमुद्दिश्य घटिकाद्रिमनुत्तमम् ।।७०
यदुक्तं गुरुणा वाक्यं हृदि कृत्वा स पिङ्गलः । सत्यव्रतानुग्रहेण प्राप्तवान् पुत्रसंपदः ।।७१
प्राप्य पौत्रान् स तेजस्वी वैष्णवानामनुग्रहात् । पदमीदृशमापन्नो नृहरेश्च प्रसादतः ।।७२

वसिष्ठः -

अहो वैष्णवमाहात्म्यं अहो नृहरिसेवनम् । यदेष सभ्यसङ्गेन वैष्णवं लोकमेयिवान् ।।७३

ब्रह्मा -

बहुमान्य ततो देवं ऋषिर्धर्मार्थकोविदः । विश्वामित्राश्रमपदं सह शिष्यैरुपागमत् ।।७४
विश्वामित्रस्तु तच्छ्रुत्वा महेन्द्रेण सहामरैः । वसिष्ठागमनं तत्र शुभं मेने तपस्थितः।।७५

विश्वामित्रः -

तपसा मम माहात्म्यं किं भूमौ वयमुन्नतम् । यदेष्यति वसिष्ठो मे नः पदं हरिमेयिवान् ।।७६
अद्य मे सफलं जन्म अद्य मे सफलं तपः । अद्य मे सफलं ज्ञानं नृहरेः पदसेवनात् ।।७७

ब्रह्मा -

ततोऽन्तरे महेन्द्रेण मैत्रावरुणिरुत्तमः । कौशिकस्याश्रमपदं प्रेत्य वज्रिणमूचिवान् ।।७८

वसिष्ठः -

इदं तपस्याश्रमपदं तस्येमे तरवो मुनेः । तस्य शिष्या इमे वज्रिन् मदामगनकाङ्क्षिणः ।।७९

एतस्मिन्नन्तरे विश्वामित्रशिश्येण संगतः । वज्रिणं मां च नृपते पूजयामास सादरम् ।।८०

पत्रैः पुष्पैः फलैर्मूलैस्मन्त्रैः कृत्वार्हणं मुनिः । विशिष्य पूजयन् मां तु नययुक्तमुदाहरत् ।।८१

विश्वामित्रः -

यथाशक्ति मया दत्तं वसिष्ठः प्रतिगृह्यताम् । न मे कामदुघा धेनुर्यया सर्वं भविष्यति ।।८२

तदा संचित्य मनसा तदा चाकर्ण्य शब्दितम्। मामुद्वीक्ष्य सुराध्यक्षो वचः प्रोवाच वासवः।।८३

अङ्गीकृत्य फलं दत्तं विश्वामित्रेण धीमता । नृहरेः प्रीतये चास्मै ब्रह्मर्षित्वं प्रयच्छ वै।।८४

श्रद्दानो वचस्तस्य वज्रिणो नृहरेः प्रियम् । कौशिकं नियताहारं मुनिमेनमभाषत ।।८५

वसिष्ठः -

सन्तुष्टोऽहं मुनिश्रेष्ठ ब्रह्मर्षित्वं प्रयाहि वै । महर्षीणां च नृहरेरिन्द्रस्यानुग्रहादपि ।।८६

वराहकल्पे सप्तर्षिप्रवरो भव सर्वदा । वैवस्वतान्तरे सर्वे वयं त्वत्प्रीतिकाङ्क्षिणः ।।८७

उपश्लोक्य च माहात्म्यं विश्वामित्रो महामुनिः। प्रमोद निर्भरमनास्ससस्वजे मां तथा नृप ।।८८

ब्रह्मर्षित्वं ततो दत्वा तस्मै गाधितनूभुवे । आमन्त्र्य च सुराधीशं प्राप्तवानहमाश्रमम् ।।८९

ततो गाधिसुतो राजा ब्रह्मर्षीणामनुत्तमः । सालोक्यं नृहरेरिच्छन् तपस्यति महामुनिः ।।९०

गौतमस्य च दौहित्रः पृथुलोमेति विश्रुतः । अत्राश्रमपदे राजन् तपस्तेपे सुदारुणम् ।।९१

विष्णुभक्तो जितामर्षस्त्रिसन्ध्ये नृहरेस्स्तवम्। विकुर्वाणोऽमिताहारो गायत्रीमन्वहन् जपम्।।९२

पर्वतारोहणपथे तृणं चेत्तुं तथैच्छत । करे लवित्रमादाय भार्यया सह तापसः ।।९३

तृणविच्छेदने काले श्रमवन्तं पदे पदे । पृथुलोमानमुद्वीक्ष्य प्रशशंसुर्महर्षयः ।।९४

पृथुलोमा -

भो भो महर्षयस्सर्वे सभार्यस्य ममाच्युतः । हरिः प्रसन्नो भवति कर्तव्योऽनुग्रहो महान् ।।९५

अमोघो वेदिको मन्त्रः अमोघा ब्राह्मणाशिषः । हरिभक्तिरमोघेति व्याहरन्ति विपश्चितः ।।९६

ऋषयः -

अद्य प्रसन्नो भगवान् नृहरिर्भवितानघ । सालोक्यमपि धर्मात्मन् प्रयच्छत्यपि राजिते ।।९७

वसिष्ठः -

तत्रान्तरे नरहरिः प्रादुर्भूत्वा सुरारिहा । सभार्यं पृथुलोमानमनयद्वैष्णवं पदम् ।।९८
मार्गं विशोधयति यो घटिकाद्रेरतन्द्रितः । स ब्रह्मर्षिप्रसादेन सर्वान् कामानवाप्नुयात् ।।९९
यश्शृणोति कथामेतामशक्तो मार्गशोधने । तस्यापि सफलं ज्ञानं तपश्च सफलं भवेत् ।।१००

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये अष्टदशोऽध्यायः ।।

एकोनविंशोऽध्यायः

पराशरः -

इत्युक्तो राजशार्दूलो वसिष्ठेन महात्मना । मुहूर्तं ध्यायन् प्रोवाच हर्षगद्गदया गिरा ।।१

इन्द्रद्युम्नः -

वसिष्ठ तापसश्रेष्ठ शृण्वतो मम सांप्रतम् । कर्णौ पूरितवान् तात वैष्णवानां कथामृतैः ।।२
परावरज्ञो भगवान् नृहरौ भक्तिमान् भवान् । यदस्य दर्शया पुण्यकथया प्रीणयत्यमुम् ।।३
वाणी सञ्चारिणी ब्रह्मनुच्चनीचेऽपि यत्पदे । तावकी किमु नान्येषामित्येषा वैदिकी श्रुतिः।।४
केनोपायेन लघुना लघुना सर्वकर्मणाम् । फलमाविर्भवेत्तन्नो वद ब्रह्मर्षि सत्तम ।।५

वसिष्ठः -

नृसिंहकवचं पुण्यं तच्छृणुत्वं महीपते ।
एनं संप्रोक्तमनसं दृष्ट्वा धावन्त्यपग्रहाः ।।६
जपन्नृसिंहस्य मनुं पश्चात् तत्कवचं पठन् ।
लभते पुरुषो लोके पुरुषार्थचतुष्टयम् ।।७
मन्त्रस्यास्य महाभाग ऋषिराश्लायनस्स्मृतः ।
छन्दोऽनुष्टुप् तथा देवो भगवान्नृहरिर्हरिः ।।८
सकलाभीष्टसिध्यर्थे विनियोग उदाहृतः ।
आदौ प्रणवमुच्चार्य लक्ष्मीबीजं ततः परम् ।।९
नृसिंहेति पदं पश्चात् चतुर्थ्यन्तं समुच्चरेत्।
नमस्कृत्य ततो धीमान् मन्त्रराजं समुच्चरेत् ।।१०

तेनैव हृदिगुप्तेन भुक्तिमुक्ती प्रविन्दति ।
प्रजापतिसहस्त्रं तु प्रजपेन्मन्त्रमुत्तमम् ।।११
ध्यायेदुक्तेन विधिना जानुन्यस्तकरद्वयम् ।
योगासने समासीनं शङ्खचक्रमहायुधम् ।।१२
सुरर्षिभिर्युतं देवैस्सेव्यमुत्पलकोमलम् ।
प्रशमं निरतारूढयोगोद्धृतपयोरुहम् ।।१३
नम तद्घटिकाशैलाध्यक्षं तं पुरुषोत्तमम् ।
नृहरीति कृताभिख्यं सत्परित्राणसंभवम् ।।१४
प्रभाते तत्स्तवन्नित्यं कर्तव्यं फलमिच्छता ।
जपान्ते कवचं तस्य नृसिंहस्य महामनोः ।।१५
पठेत् त्रिसन्ध्यं नियतो नृहरि प्रीतये नृप ।
ओं नृसिंहोऽग्रतः पातु श्रीनृसिंहस्तु पृष्ठतः ।। १६
अच्युतो वामतः पातु पातु दक्षिणतो हरिः।
हिरण्यदारको वक्त्रं कण्ठं रौद्राकृतिः पुमान्।।१७
प्रह्लादाह्लादकारी मे बाहू रक्षतु सर्वदा ।
हृदयं केसरी रक्षेद्दंष्ट्रावान् मम चोदरम् ।।१८
कटिं करालवदनो जघनं जगदीश्वरः ।
वृषणं वृषपर्वा मे पातु मेढ्रं महाभुजः ।।१९
अष्टादशभुजो रक्षेदूरू मे जानुनी विभुः ।
जङ्घे मे पातु दैत्येन्द्र वसमालाविभूषणः ।।२०
घटिकाचलवासो मे सदा रक्षतु गुल्फयोः ।
पादौ स्तम्भोद्भवः पातु पदपृष्ठे महीधरः ।।२१
पादाङ्गुलीस्तु मे रक्षेत्कोलाहलकरः पुमान् ।
रोमकूपाणि सिंहेन्द्रस्त्वचं मे योगशीलवान्।२२
रक्तमज्जवसामांसान्यस्थीन्मे भैरवस्वनः ।
अङ्गानि दीर्घश्रवणो मकुटं मे किरीटवान् ।।२३
ज्वालामुखस्तथा ज्वालास्सर्वात्मा पादसन्धिषु ।

शङ्खचक्रधरश्शुक्लं छायां छायापतिः प्रभुः।२४
अहङ्काराद्यनेकानि हुंकारध्यानभीषणः ।
प्राणापानौ तथा व्यानमुदानं च समानकम्।।२५
यशः कीर्तिं च लक्ष्मीं च रक्षेद्भक्तोचितो हरिः।
हेमकोटिविमानस्थो गोत्रं मे पातु शाश्वतम् ।२६
भार्यां मे रक्षतु सदा वामदेवादिमुक्तिदः ।
सप्तर्षिवन्द्यः पुत्रान् मे पशून् मे हनुमत्प्रियः।।२७
मार्गं रुद्रप्रियो रक्षेत् सर्वतस्तुतिमेयिवान् ।
इदं हि कवचं पुण्यं सुराणामपि दुर्लभम् ।।२८
यः पठेत्प्रयतात्मा वै त्रिसन्ध्यं नृहरेः पुरः ।
निश्चला वैष्णवीभक्तिस्तस्मिन्नव्यभिचारिणी।।२९
अपग्रहाः प्रधावन्ति कवचे हृदिसंस्थिते ।
डाकिन्याद्याः पिशाचाश्च शाकिन्याद्यास्तथा रिपुः।।३०
नश्यन्ति व्याधयस्सर्वे भूतादिस्फोटकादयः।
अभिचारीणि सर्वाणि मन्त्रयन्त्राणि वै तथा ।।३१
कवचेनामुना यस्तु संपरिष्कुरुते मनः ।
सिध्यन्त्युच्चाटनादीनि तस्य विष्णोः प्रसादतः।।३२
मनोन्मथीर्भवेद्राजन् प्रभवेद्ब्रह्मवर्चसम् ।
यः त्रिसन्ध्यं पठेन्नित्यं श्रद्धया हरिसन्निधौ ।।३३
यं यं चिन्तयते कामं तं तमाप्नोत्ययत्नतः ।
पुरा विष्णूपदिष्टेन कवचेनामुना नृप ।।३४
ब्राह्मण्यं गाधितनयः प्रविन्दत मुनीश्वरः ।

ब्रह्मोवाच -

तथाकर्ण्य स राजेन्द्रो त्रिराचम्य शुचिर्भवान् ।।३५
शिलापुष्करिणीतीरे उपदेशं गतो मुनेः । उपदिष्टस्ततो राजा प्रत्युत्पन्नमनीषया ।।३६
अभिपूज्य गुरुं तत्र धृतपद्मासनस्तदा । कवचं मनुमुद्गृह्य सर्वेषामग्रणीरभूत् ।।३७
वज्रेण कवचेनैव स चिरेण धनुर्धरः । ततस्तत्रत्यतीर्थेषु वसिष्ठेन प्रचोदितः ।।३८

स्नात्वा शैलाधिरोहे मां इदं वचनमब्रवीत् ।

इन्द्रद्युम्नः -

किमिदं प्रोन्नतं शृङ्गं सर्वदेवर्षिवन्दितम् ।।३९

कस्याश्रमपदं ब्रह्मन् वद मे वदतां वर ।

वसिष्ठः -

अधित्यकेयं राजर्षिन्निदं शृङ्गं च पुत्र वै ।।४०

वामदेवादयो मुक्तास्तपस्यन्ति तपोधनाः । शिलापृष्ठे नरहरिस्स्वनाम्ना कृतवान् सरः।।४१

आविर्भूतोऽत्र भगवानृषीणां मुक्तये पुरा । श्रीनृसिंहस्सरस्तीरे व्यपनेतुं स्वकिल्बिषम् ।।४२

उमया चोदितो रुद्रः प्राप्तवान् प्रमथाधिपः । नृसिंहकरुणायोगात् ब्रह्महत्यां प्रपोह्य सः।।४३

पुनः कैलासमगमत् सोमस्सोमार्धशेखरः । वामदेवाश्रमो नाम राजन्नत विराजते ।।४४

नृसिंहतीर्थमेतस्य मध्ये तिष्ठति निर्मलम् । अत्र देवास्सगन्धर्वास्सेन्द्राश्च परमर्षयः ।।४५

नृसिंहप्रीतये सर्वे सततं तर्पयन्ति वै। राजानश्च तथा वैश्या द्विजन्मानश्च वैष्णवाः।।४६

प्रातस्स्नात्वा च मध्याह्ने देवर्षिं तर्पयन्ति च। इङ्गुदीसप्तपर्णाश्च तमालाश्च कपित्थकाः।।४७

सन्तानाद्याश्च तरवः पञ्च सन्निहिता नृप। तत्र कल्पतरोर्मूले नृहरिः पद्मया सह ।।४८

शङ्खचक्रवराभीतिमुद्रितस्तिष्ठते सदा। गयाक्षेत्राधिकं क्षेत्रं नृसिंहस्य महामते ।।४९

तुलाविन्यसने पूर्वं गया किञ्चिदुदंचिता । तदा वीक्ष्य सुरास्सर्वे ब्रह्माद्याश्च महर्षयः ।।५०

नृसिंहक्षेत्रमेतद्धि निस्तुलं बहु मेनिरे । जन्मक्षणात् पुरा वीक्ष्य दत्तो नाम द्विजर्षभः।।५१

विष्णुभक्तिमवष्टभ्य नितरां धर्मचिन्तनः । यादवाद्रौ तपस्तेपे कल्याणसरसस्तटे ।।५२

उपास्ते विष्णुभक्तांश्च विष्णुभक्तो ह्यतन्द्रितः। पितरं स्वं तदा श्रुत्वा मृतं यवनकर्मणा ।।५३

चिन्तयानं तमुद्वीक्ष्य व्याजहार मुनिस्तथा ।

पुरुकुत्स उवाच -

किमर्थं चिन्तितं विद्वन्निराकुलधिया त्वया।।५४

अश्राव्यमस्ति किञ्चित्तत्तत् प्रशंस ममान्तिके।

विष्णुदत्तोवाच -

गृहीतशतधर्माख्यः पिता मे वत्सवंशजः ।।५५

जनयित्वा स मां धन्वी यवनानां पुरीमगात्। तत्र गत्वा स तेषां वै वृत्तिं नित्यं समाचरत्।।५६

तत्रत्या रमते भार्या मधुसेवी सदा मुने । कदाचिदपि मे मातुः कदाचिदपि मे मुखम् ।।५७

कदाचिदपि बन्धूनामनालोकितवान् मुने । तथापि देव यं सर्वे सर्वदा प्रियकारिणः ।।५८
मातृदेवो भवेत्येतत् पितृदेवो भवेति च। आचार्य देव इत्येतद्वाक्यन्न हि मया श्रुतम् ।।५९
कुत्सितो वा दरिद्रो वा पतितो वा बहिष्कृतः। हीनसेवो यदि पिता सेव्यः पुत्रेण धीमता ।।६०
इति स्मृतो वचो नैव विस्मृतं गुरुचोदितम् । पितृतृप्तिं प्रवक्तृभ्यो न मुञ्चामि पदं मुने ।।६१
स हि मे तातपादस्तु अद्य कालवशं गतः । किं कुर्म इति चिन्ता मे प्रादुरासीन्महामुने ।।६२

पुरुकुत्सः -

गयां गच्छ महाभाग तथाऽस्थीनि निगृह्य वै। गदाधरः प्रसन्नश्चेत् पिता ते मुच्यते कलेः।।६३
तत्र विद्वन् गयायां वै श्राद्धं कुरु समाहितः। गदाधरस्तु प्रियतामिति वाचमुदाहरन् ।।६४

वसिष्ठः -

तथेति वचनं गृह्य पुरुकुत्सस्य वै मुनेः । सभार्यया विष्णुदत्तो गयां गन्तुं तथैच्छत ।।६५
तत्रान्तरे सुप्रसन्ना वाणी वाणीयसी नृप । काप्यासीदन्तरिक्षस्था विष्णुदत्तशुभावहा ।।६६
यदि ते पितरं घोरनरकादुद्धरिष्यति । इतो गच्छ महाभाग घटिकाचलमुत्तमम् ।।६७
यत्रास्ते नृहरिस्सर्वान् प्रणयन्नृषिसत्तमान् । तस्योत्तरोपत्यकायां श्रीनृसिंहसरस्तटे ।।६८
इङ्गुदीनामथ वनं वर्धितं तन्महीपते । आविर्भवन्तं नृहरिं स्वमुक्त्यर्थमरिन्दमम् ।।६९
इदमूचे हरिं तत्र वामदेवो महामुनिः ।

वामदेवः-

स्वामिन्निङ्गुदिपार्श्वे यमुद्दिश्य च यः पुमान् ।।७०
कुरुते गुरुविश्वासी तस्य तत्तद्भवेद्धरेः । अस्मिन् नृसिंहक्षेत्रे यः कुरुते पितृतर्पणम् ।।७१
गयाक्षेत्रादभ्यधिकं तस्याविर्भवतात् फलम् ।

श्रीभगवानुवाच -

आरभ्य हेमकोटिं मे परितो योजनापदम् ।।७२
मत्क्षेत्रं भविता ब्रह्मन् भुक्तिमुक्तिफलप्रदम् । यस्त्वत्र कुरुते श्राद्धं पितॄनुद्दिश्य वा मुने ।।७३
फलं तस्य महाभाग गयातो द्विगुणं भवेत् । इदमत्र सरो ब्रह्मन् ममाङ्गुष्ठपरिच्युतम् ।।७४
भागीरथी जलमिति अवैहि तपतां वर । इह यस्तनुते दानं ब्राह्मणेभ्यो यथा बलम् ।।७५
स ममानुग्रहाज्जीवन्मुक्तो भवति तापस ।

वसिष्ठः -

तदाऽशरीरवाक्यं वै श्रुत्वा हर्षाकुलेन्द्रियः ।।७६

वाक्यमेतद्धि नृहरेर्भवेदिति तदूचिवान् । विष्णुदत्तस्सपत्नीको वचनं गृह्य नाभसम् ।।७७
इहावतीर्य वै श्राद्धं कारयामास भक्तिमान् । एतस्मिन्निङ्गुदीमूले क्षेत्रे नरहरेरहम् ।।७८
पितॄणां करवै श्राद्धं नृसिंहः प्रियतामयम् । इति मन्त्रं द्विरुच्चार्य श्रद्धया पितृतर्पणम् ।।७९
प्रकुर्वन्ति तदा विप्र प्रसन्नाः पितृदेवताः ।

पितरः -

श्राद्धेनानेन ते विप्र तृप्तास्मस्सर्वदा वयम् ।।८०
किमीप्सितं तवेदानीं तन्नो वद महामते ।

विष्णुदत्तः -

भवन्तो मे प्रसन्नाश्चेत् तृप्ता वा हृदयंगमाः ।।८१
पितरं नरकाम्भोधेः द्रुतमुद्धर तं च मे ।

पितरः -

यदा त्वया पितृश्राद्धं कर्तव्यमिति चिन्तया ।।८२
प्राप्तमेतत् पदं तावत् प्राप्तो विष्णुपदं पिता। यस्त्वयं देशमुद्दिश्य कुरुतेऽन्यत्र पैतृकम् ।।८३
तस्य वै पितरस्तृप्ताः प्रयच्छन्ति मनीषितम् । दीर्घायुर्भव भद्रं ते बहुपुत्रा भवन्तु ते ।।८४
भक्तिश्च वैष्णवी नित्या प्रादुरेष्यति ब्राह्मण ।

वसिष्ठः -

इत्युक्त्वा पितरस्तत्र वरं दत्वा च वाञ्छितम् ।।८५
पितृलोकं गतास्सर्वे मिषति ब्राह्मणे नृप । गतेषु तेषु धर्मात्मा विप्रो हृष्टमनास्तदा ।।८६
पिण्डापाकसशेषं वै भुक्तवान् भार्यया सह । पितृप्रसादान्नृहरेः प्रसादेन च भूपते ।।८७
सुतद्वयं प्रलेभेऽथ स्वानुरूपं द्विजस्तथा। अचिरेणैव कालेन भुङ्क्त्वा भोगाननुत्तमान् ।।८८
अथ प्रसादान्नृहरेरुन्नतं पदमेयिवान् । तस्य वंशभवो योगी तपसा विप्रशेखरः ।।८९
पित्रानुद्धर्तुकामोऽयं भगीरथ इवोदितः । अस्मिन् वराहसरसि तपस्तपति दारुणम् ।।९०
प्रसादकाङ्क्षी नृहरेर्दीर्घकालमतन्द्रितः । पुञ्जिकस्तादयो राजन् बभूवुः प्रपितामहाः।।९१
पुरास्य दुर्विदग्धास्ते कर्मणा प्रविनिन्दिताः । आचार्यद्रोहिणो नित्यं देवतायां तथा गुरौ ।।९२
सत्सु कर्मसु विश्लेषं दुर्विदग्धाः प्रकुर्वते । गर्वितास्सज्जनैर्निन्द्यास्सन्ध्याकर्मनिरादराः ।।९३
सादरा पिशुने मन्त्रे तथान्यस्त्रीपरिग्रहे । दुर्विनीतिं ततस्तेषां श्रुत्वा ब्रह्मर्षयस्तथा ।।९४
प्रकोपस्फुरितोष्ठास्तु तेषु चक्रुर्बहिष्क्रियाम् । प्रक्षीणतेजसोऽभूवन्नद्य ते ब्रह्मबन्धवः ।।९५

न तेषां वचनग्राही भर्तापि न तथाभवत् । क्रमेण ते बहिष्कारभारपीडामसासहाः ।।९६
उत्सृज्य च शरीरन्ते पिशाचाः प्रबभूविरे। न क्रोष्टा तेन वा कङ्का श्वापदा वा न वा शशाः।९७
लेढुमङ्गानि तेषां वै न काका न मरीचयः। कीटवन्ति शरीराणि बहुकालात् प्रतीक्ष्य वै।।९८
पूतिगन्धासहाः केचिन्मुनयोऽन्यत्र संस्थिताः। अङ्गानि तेषां दृष्ट्वा वै कुदुर्गन्धानि केचन।९९
भस्मीभवन्त्विति तदा शेपुर्गृह्य जलं करे । गतिमन्वेषयन् तेषां सतामनुमतां तथा ।।१००
प्रबोधितस्तु मनुना विन्ध्ये तेपे तपः परम् । पदे पदे नमस्कुर्वन् देवलो नाम वैष्णवान् ।।१०१
तानुद्धर्तुमशक्तो वै तपसा कालमेयिवान् । तस्यायं प्रथमः पुत्रो विश्रुतो विप्रशेखरः ।।१०२
विष्णुभक्तिविशुद्धात्मा सर्वेषां प्रियकारकः । अगस्त्यभ्रातृवचनादेत्य वल्लीसरस्तटे ।।१०३
पितृनुद्धर्तुचेतास्तु तपश्चरति दारुणम् । विष्णुभक्तो जितक्रोधो जितारातिर्जितेन्द्रियः ।।१०४
सानुक्रोशो विष्णुभक्तान् दण्डवत्प्रणमंस्तदा । महाप्रदक्षिणं शैलराजस्य तनुते नृप ।।१०५
तथान्तरं च धर्मात्मा काले कालेऽप्यतन्द्रितः। दिने दिने शैलराजारोहणव्यावृतात्मनाम्।।१०६
महात्मनां श्रमहरो व्यजनादिनिषेवनात् । मार्गस्य शोधनविधौ व्याकुलो नृपसत्तम ।।१०७
स्थित्वात्र भार्यया युक्तो प्रददौ च फलादिकम्। सप्तर्षींश्च प्रतिदिनं यथाशक्ति प्रतोषयन् ।१०८
महात्मानो विष्णुभक्तान् हनूमत्पुरनिष्ठितान्। दिनं दिनं नमस्कुर्वन् वर्धते तत्कृताशिषा ।।१०९
त्रिसन्ध्यं प्रजपन्नित्यं नृहरौ ध्यानतत्परः। भार्यया सह विश्रब्धं स्तुवन्नर्चन् पितुः प्रियः।।११०

हेमकोटिविमानस्थं जानुन्यस्तप्रकोष्टकम् ।
शङ्खचक्रधरं पीतवासोद्भासिकटीतटम् ।।।१११
योगासने समासीनं किरीटिनमनामयम् ।
दूर्वानीलोत्पलवनश्यामलं कोमलाकृतिम् ।।११२
प्रसन्नवदनं लक्ष्मीभासितोरस्कमुज्वलम् ।
नतमर्त्यप्रसन्नार्तिहरिणं वनमालिनम् ।।११३
श्रीवत्सकौस्तुभधरं चन्द्रसूर्यविलोचनम् ।
सिंहस्कन्धं सिंहमुखं प्रह्लादप्रियकारिणम् ।।११४
दानवेन्द्रविभेत्तारं कर्तारं जगतामपि ।
गोप्तारं च तदा विष्णुं प्रणतारमनिन्दितम् ।।११५
दंष्ट्रिणं तं केसरिणं नरकेसरिणं विभुम् ।
सप्तर्षिवन्दितं भीमं गदाधरमधीश्वरम् ।।११६

व्यक्ताननं महोरस्कं ज्वालामालाविभूषणम् ।
षट्कोणमध्यनिलयमुन्नतश्रुतिमुद्धरम् ।।११७
उदग्रनासमुच्चण्डकालमुत्तममस्तकम् ।
वामदेवादिब्रह्मर्षिसेवितं शिवसेवितम् ।।११८
सर्वकामप्रदं व्यक्तमव्यक्तं पुरुषोत्तमम् ।
सिहंगामिनमीशानं निधिमच्युतमव्ययम् ।।११९
पिङ्गलाक्षं पृथुग्रीवं विमलं स्तम्भसंभवम् ।
मुक्तिदं भुक्तिदं शान्तं दान्तमानन्दकन्दलम् ।।१२०
मन्दारमालाभरणमष्टबाहुं महोदरम् ।
सनकादिनुतं देवं राजपूजितमीश्वरम् ।।१२१
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसमद्युतिम् ।
शृङ्गकोटिमहाशैलवासिनं हृदिवासिनम् ।।१२२
हनुमद्वन्दितं लोकशङ्करं शङ्करप्रियम् ।
भक्तार्चितं यथाभक्तिदायिनं शुभदायिनम् ।।१२३
सटालङ्कृतमव्यग्रमुग्रशासनमुद्धतम् ।
विस्तीर्णवदनं दीनरक्षकं सुररक्षकम् ।।१२४
जपाकुसुमवर्णाभं हेमयज्ञोपवीतिनम् ।
धृतहेमकटीसूत्रं हेमाङ्गं हेमकुण्डलम् ।।१२५
हेमपुष्पमाहामालापरिष्कृतभुजान्तरम् ।
दैत्यराजवसामालाभरणं शरणं नृणाम् ।।१२६
उत्तमानुत्तमं देवराजमाजानुबाहुकम् ।
पोषणं जगतां भूतपावनं पत्रिवाहनम् ।।१२७
वेदान्तवेद्यमव्यग्रं वैखानससुपूजितम् ।
वालखिल्यादियोगीन्द्रसंस्तुतं परमार्थदम् ।।१२८
महाक्षं च हिरण्याक्षशिक्षकं भक्तरक्षकम् ।
अपराजितमक्षोभ्यमनन्तं परमं परम् ।।१२९
अनेकरूपमादित्यमण्डलस्थमकृत्रिमम् ।

हिरण्मयं हिरण्याक्षं हिरण्यश्मश्रुकं प्रभुम् ।।१३०
नायकं सुरमालाया घटिकालयनायकम् ।
नमस्कुर्वन् सदा विप्रशेखरो विष्णुभक्तिमान् ।।१३१
एकविंशोत्तरशतं नाम्ना नरहरेरिदम् ।
चतुर्थ्यन्तेन सहितं समर्चयति भूपते ।।१३२

पुत्रं दुर्ललितं दृष्ट्वा प्रह्लादं ह्लादनं सता । पुरा हिरण्यकशिपूरूचे सन्देशकारिणः ।।१३३

हिरण्यकशिपुरुवाच -

हे दूता यूयमव्यग्राः प्रह्लादं दुष्टचारिणम् । अनुक्तकारिणं वार्धौ क्षिपध्वं हर्षमानिनम् ।।१३४

वसिष्ठः -

प्रतिगृह्य वचस्तस्य स्वामिकार्यधुरन्धराः । प्रचिक्षिपुस्तदा वार्धौ प्रह्लादं निरवग्रहम् ।।१३५
प्रह्लादस्तत्र वै मग्नो हरिभक्तिपरायणः । सर्वं भगवतो माया इति मेने महामतिः ।।१३६
तदा हरिस्तमभ्येत्य प्रसन्नेनान्तरात्मना । नामान्यमूनि भक्ताय तस्मै तान्युपदिष्टवान् ।।१३७
उपदिष्टस्तु प्रह्लादो नाम्नामुच्चारणात्ततः। उन्मज्जन् वार्धिरागत्य जग्राह चरणौ पितुः।।१३७

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये एकोनविंशोऽध्यायः।।

विंशोऽध्यायः

श्रीवसिष्ठः -

इदं पवित्रं परमं पापघ्नं वेदसंमितम् । पठेन्नरहरेर्नाम्नामेकविंशोत्तरं शतम् ।।१
महत्पापौघसंप्राप्तौ नामान्येतानि कीर्तयेत् । नरस्तु तस्मादुत्तीर्णो भवेद्देवोऽपि देवराट् ।।२
पुरन्दरो नाम देवो देवराजः प्रसन्नधीः । अहल्यासक्तिदोषेण शापान्निर्वृषणोऽभवत् ।।३
अथ लज्जानतमुखो नैच्छतामरसङ्गमम् । इन्द्रो मानसकासारपद्मषण्डमुपागतः ।।४
चिराय तत्र भगवानिन्द्रस्संस्फीतिमेयिवान् । गोपयन्निखिलान्यङ्गान्यर्णोजदशमालया ।।५
सहस्रदलसञ्छन्नतनुरिन्द्रस्तु मूर्तिमान् । शृङ्गार इव तेजस्वी दृश्यते जलजन्तुभिः ।।६
अथ हंसमुखाद्वेधा विज्ञायेन्द्रपराभवम् । स्तूयमानस्त्रयीभिस्तु प्रादुरासीत् सरस्तटे ।।७
विचिन्वानस्सुरेशानं जगत्कर्ता ततस्ततः। कुत्रचित् कर्णिकायां वै तस्थिवांसं ददर्श ह।।८

ब्रह्मा -

शतक्रतो महाभाग वृथा मज्जसि वारिधौ । नृहरेः खलु नामानि वर्तन्ते तानि संस्मर ।।९

इन्द्रः -

भगवन् हृदये ब्रह्मन् प्रत्यभिज्ञा कृता त्वया । स्मृतिक्षणादेव महाड्वृषणं समजायत ।।१०

वसिष्ठः -

इन्द्रस्तु सहसोत्थाय स्तुत्वा स्वायंभुवं महः । स्तूयमानोऽमरैर्सर्वैस्स्वां पुरीमन्वपद्यत ।।११

ब्रह्मा -

इन्द्रद्युम्नस्तु संतुष्टो गृह्यनामानि तन्मुखात्। विमुक्तपाप्मा प्रोवाच वसिष्ठं प्राञ्जलिस्तथा।।१२
अत्युन्नतमिदं शृङ्गं हेमकोटिपदानुगम् । मनः प्रसीदयति मे प्ररूढमिव पर्वतम् ।।१३

वसिष्ठः -

बहोः कालात्तपस्तप्त्वा परं पदमिव ध्रुवः। प्रह्लादसुचिरं शृङ्गं प्राप्तवान् नृहरेस्स्तवात्।।१४
अत्र स्थित्वा महायोगी प्रह्लादो धर्मवत्सलः। तपस्यति गतक्लेशो अन्तरङ्गे स्मरन् हरिम्।।१५
शृङ्गस्य दक्षिणे पार्श्वे चक्रतीर्थमिति श्रुतम्। पश्चिमे तु महातीर्थं शङ्खाभिधमनिन्दितम्।।१६
मत्स्यकारण्डवाकीर्णं अम्भोरुहशताकुलम् । घटिकाशैलराजस्य नेत्रद्वयमिदं नृप ।।१७
शङ्खं च चक्रतीर्थं च सदा सर्वर्षिसेवितम् । सदा सलिलसंपूर्णं सन्मनोवद्विनिर्मलम् ।।१८
ययोस्तीरद्रुमाणां वै छाया भास्कररोधिनी । अत्र पूर्वं महालक्ष्मीमुपास्य हरिशङ्करौ ।।१९
चन्द्रादित्यौ तथा ब्रह्म प्राप्तवन्तौ वरान् पृथक् । हरेर्ज्ञानप्रदातृत्वं शङ्करे श्रीप्रदादृता ।।२०
चन्द्रे कला प्रदातृत्वं रवेरारोग्यदातृता । प्रवकृता प्रजानाथे श्रिया सर्वाणि जज्ञिरे ।।२१
कुबेरो नारदमुखात् सर्वमालोक्य वैभवम्। धनद त्वं महाभागस्स्वामिन्निच्छन् हि भागतः।।२२
बहुकालं तपस्तेपे फलमूलाशनो नृप । नृसिंहभक्तानन्वीक्ष्य चान्वीक्ष्य प्रणमंस्तथा।।२३
तत्रत्यऋषिहर्षायामृतवल्लीरनेकशः । आरोपयद्वैश्रवणो लक्ष्मीसूक्तं जजाप ह ।।२४
तत्रान्तरे महालक्ष्मीर्वल्लीमूले तदा हिते । हर्षायाविरभूत् राजन् कमलं गृह्य पाणिना ।।२५
आविर्भवन्तीं तां दृष्ट्वा पुरुषार्थप्रदायिनीम् । उवाच परमप्रीतः प्रणमन् गुह्यकेश्वरः ।।२६

कुबेरः -

अम्ब त्वत्सन्निधानेन कृतार्थोऽहं तथा परः ।
चरितार्थं च विज्ञानं तथा संदर्शनं सता ।।२७
अद्य ते पादपद्मस्य दर्शनाज्जगदीश्वरि ।

चरितार्थमिवात्मानं मन्ये कन्ये पयोनिधेः ।।२८
श्रीलक्ष्मीरिन्दिरा पद्मा लोकमाता जनेश्वरी ।
पद्मालया पद्महस्ता नित्या पद्मप्रिया सती ।।२९
योगिनी सा योगनिद्रा कमला मालिका रमा ।
हरिप्रिया सिन्धुकन्या पद्मजन्माथ भार्गवी ।।३०
सर्वकामप्रदा नृणां मङ्गला चेन्दिरा स्वधा ।
स्वाहा पुष्टिस्तथा तुष्टिस्सर्वकामदुघा प्रिया ।।३१
सतैर्नामपदैरम्बा नित्यं संपूज्यतां नृभिः ।
किं किं न प्रार्थिता कुर्याद्भवती हरिवल्लभे ।।३२

लक्ष्मीरुवाच -

स्वस्ति तेऽस्तु प्रसन्नात्मा वरदा समुपास्थिता । स्तवेनानेन संतुष्टा सर्वदा यक्षपुङ्गव ।।३३

कुबेरः -

धनानामाधिपत्यं च तद्दातृत्वं च सांप्रतम् । देहि मेऽत्र जगद्धात्रि करुणां च निधेहि मे ।।३४

वसिष्ठः -

उत्सार्य पाणिना देवी शिलामुपरिवेष्टिताम्। तत्रत्यांश्च निधीन्प्रोक्ष्य शङ्खपद्मादिकान्नव।।३५
अत्रत्यनिधये लक्ष्म्याश्शङ्खपद्मादयो नव। अभीष्टितानि गृह्णीष्व विचारं मा कृथा इह।।३६
पञ्चषट् च निधीन् गृह्यप्रहृष्टहृदयस्तथा। अभिवाद्य जगद्धात्रीं प्राप्तवान् धनदः पुरीम्।।३७
तत्रत्यऋषयो देवीं प्रशशंसुर्यथामति। तथामृतलतामूले समुत्पन्नामनिन्दिताम् ।।३८
दुग्धाब्धिजान्तु तां दृष्ट्वाऽमृतवल्लीश्वरीति व । नामधेयं तथा चक्रुः ऋषयो ब्रह्मवादिनः।।३९
यतश्शङ्खादयस्तत्र समुत्पन्नास्सरोऽन्तरे। ततश्चक्रुर्महातीर्थं शङ्खाभिधमकृत्रिमम् ।।४०

वसिष्ठः -

सर्वर्षिभिस्तूयमाना तदा प्रभृति भार्गवी । शङ्खपुष्करिणी तीरे सर्वदा तिष्ठते रमा ।।४१
यद्यत्कामयते लक्ष्मी सन्निधानादभिस्तुवन् । तत्तदाप्नोति निखिलं महालक्ष्मीप्रसादतः ।।४२
तस्याग्नेय्यां दिशि नृप तयोः पार्श्वे सुशृङ्गयोः। चक्रतीर्थमिति ख्यातः द्योतते सलिलाशयः।।४३
विभ्राजमानाश्शतशस्तीरे तस्य तपस्विनः । तपश्चरन्ति नियताहारास्तत्र तपस्विनः।।४४
शिलावटस्य मूले तु न्यग्रोधस्य च केचन। अश्वत्थानाञ्च बिल्वानां तथाम्राणाञ्च केचन।।४५
जम्बूमूले शिलापृष्ठे तथार्जुनतरौ नृप । तपस्तीव्रं प्रकुर्वन्ति ऋषयस्संशितव्रताः ।।४६

पुरा तत्र महीपाल ऋषिरौद्दालिकीश्श्रुतः । पशुक्कामस्तपस्तीव्रं तेपे नृहरिसन्निधौ।।४७
स कदाचिद्धनूमन्तं नृसिंहस्य प्रतोषणात् । चक्रं लब्ध्वा स निर्यान्तमूचे सूनृतया गिरा।।४८

औद्दालिकः -

मारुतस्यौरसः पुत्र प्रसीद त्वमरिन्दम ।
न वै त्वद्व्यतिरिक्तोऽस्ति स्तोता नृहरिमीश्वरम्।।४९
अतिपाटलवक्त्राब्जं धृतहेमाद्रिविग्रहम् ।
आञ्जनेयं शङ्खचक्रपाणिं चेतसि धीमहि ।।५०
पारिजातप्रियो योगी हनुमान् नृहरिप्रियः ।
प्लवगेन्द्रः पिङ्गलाक्षश्शीघ्रगामी दृढव्रतः ।।५१
शङ्खचक्रवराभीतिपाणिरानन्ददायकः ।
स्थायी विक्रमसंपन्नो रामदूतो महायशाः ।।५२
सौमित्रिजीवनकरो लङ्काविक्षोभकारकः ।
उदधिक्रमणस्सीताशोकनाशकरो हरिः ।।५३
बली राक्षससंहर्ता दशकण्ठमदापहा ।
बुद्धिमान् नैर्ऋतवधूकण्ठसूत्रविधारकः ।।५४
सुग्रीवसचिवो भीमो भीमसेनसहोदरः ।
सावित्रीविद्यासंसेवी चरितार्थो महोदरः ।।५५
वासवाभीष्टदो भव्यो हेमशैलनिवासवान् ।
किंशुकाभोऽव्यग्रतनू ऋजुरोमा महामतिः ।।५६
महाक्रमो वनचरस्स्थिरबुद्धिरभीशुमान् ।
सिंहिकागर्भनिर्भेत्ता भेत्ता लङ्कानिवासिनाम् ।।५७
अक्षघ्नशत्रुनिघ्नश्च रक्षोऽमात्यभयावहः ।
वीरहा मृदुहस्तश्च पद्मपाणिर्जटाधरः ।।५८
सर्वप्रियस्सर्वकामप्रदः प्रांशुमुखः शुचिः ।
विशुद्धात्मा विज्वरश्च सटावान् पाटलाधरः ।।५९
भरतप्रेमजनको चीरवासा महाक्षधृक् ।
महास्त्रबन्धनसहो ब्रह्मचारी व्रतेश्वरः ।।६०

महौषधोपहर्ता च वृक्षपर्वा वृषोदरः ।
सूर्योपलालितस्स्वामी पारिजातावतंसकः ।।६१
सर्वप्राणधरोऽनन्तस्सर्वभूतातिगो मनुः ।
रौद्राकृतिर्भीमकर्मा भीमाक्षो भीमदर्शनः ।।६२
सुदर्शनकरोऽव्यक्तो व्यात्तास्यो दुन्दुभिस्वनः ।
सुवेलचारी मैनाकहर्षदो हर्षणप्रियः ।।६३
सुलभस्सुव्रतो योगी योगिसेव्यो भयापहा ।
वालाग्निमथितानेकलङ्कावासिगृहोच्चयः ।।६४
वर्धनो वर्धमानश्च रोचिष्णू रोमशो महान् ।
महादंष्ट्रो महाशूरस्सद्गतिस्सत्परायणः ।।६५
सौम्यदर्शी सौम्यवेषो हेमयज्ञोपवीतिमान् ।
मौञ्जीकृष्णाजिनधरो मन्त्रज्ञो मन्त्रसारथिः ।।६६
जितारातिष्षड्रूर्मिश्च सर्वप्रियहितेरतः ।
एतैर्नामपदैर्दिव्यैर्यस्तौति तव सन्निधौ ।।६७
हनूमंस्तस्य किं नाम नो भवेत् भक्तिशालिनः ।
प्रणवञ्च पुरस्कृत्य चतुर्थ्यन्तैर्नमोन्तकैः ।।६८
एतैर्नामभिरव्यग्रैरुच्यते हनुमान् भवान् ।
व्रणरोगादिदारिद्र्यं पापक्षुदपमृत्यवः ।।६९
विनश्यन्ति हनूमंस्ते नाम्नां संकीर्तने क्षणे ।
भगवन् हनुमन्नित्यं राजवश्यं तथा सताम् ।।७०
लक्ष्मीवश्यं च स्त्रीवश्यं आरोग्यं दैर्घ्यमायुषः ।
प्राधान्यं सकलानां च ज्ञाति प्राधान्यमेव च ।
वीर्यं तेजश्च भक्तानां प्रयच्छसि महामते ।।७१

श्रीवसिष्ठः -

इति संतोषितस्तेन हनूमानपराजितः । प्राह प्रसन्नया वाचा किमभ्यर्थयते वरान् ।।७२

हनूमान् -

प्रसन्नोऽहं तवाभ्यर्णे संस्तुतो नामभिर्मुने । वद सुव्यक्तया वाचा ऋषिमौद्दालिकीं तथा ।।७३

एतैर्नामपदैर्दिव्यैरर्चयन्ति निराकुलाः । स्तुवन्ति वा सकृत्तेषां कामदोऽहं सदा मुने ।।७४
एतेन मम वै नाम्नामष्टोत्तरशतेन च । कौण्डिन्यो मां समभ्यर्च्य प्राप्तवान् पुत्रसंपदः ।।७५
अकातर्यञ्च मनसो निर्मर्यादां तथाधिपः । अक्षोभ्यमिन्द्रियाणाञ्च दीयतेऽस्मै सदा मुने ।।७६
आयुरारोग्यमैश्वर्यं तस्मै दत्तान्यमूनि वै । तदाभिलषितं सद्यो ददि्म स्तोत्रेण तोषितः ।।७७

श्रीवसिष्ठः

ततः प्रहृष्टो भगवान् ऋषिरौदालिकस्तदा । हनूमन्तं समभ्यर्च्य वाक्यमुत्तरमब्रवीत् ।।७८

औद्दालिकः -

स्वामिन्नचञ्चला भक्तिरस्ति मे त्वयि सर्वदा । प्रसादं कुरु सर्वत्र प्रसन्नेनान्तरात्मना ।।७९
एतस्मिन्नेव तीर्थे वै कौण्डिन्याद्या द्विजर्षयः। तपः कुर्वन्ति निरतं हनुमत्प्रियकाङ्क्षिणः ।।८०
सर्वेषां चैव देवानामृषीणाञ्च महात्मनाम् । प्रीतये चक्रसङ्गेन पवित्री कुरु दीर्घिकाम् ।।८१
एष नः प्रथमः कामः पवनानन्दवर्धन । चक्रतीर्थमिति ह्यस्य नामख्यातं भविष्यति ।।८२

वसिष्ठः -

अथाञ्जनेयो धर्मात्मा ब्रह्मर्षिप्रीतये नृप । चक्रं संयोज्य सलिले स्वपदं पुनरेयिवान् ।।८३
गते तु तस्मिन् सरसि चक्रपाणौ हरीश्वरे। चक्राख्यया च जयते त्रिषु लोकेषु विश्रुतः।।८४
चक्रपुष्करिणीस्नायी नरो मुच्येत किल्बिषात्।श्रोता वाध्यायमेतद्धि जपन्वा नात्र संशयः।।८५

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये विंशोऽध्यायः ।।

एकविंशोऽध्यायः

ब्रह्मा -

अरुन्धतीसहायेन गुरुणा चोदिताः कथाः। इन्द्रद्युम्नस्तथा शृण्वन् हृष्टो नाविन्दत श्रमम्।।१
घटिकामात्रतस्तस्य घटिकाचलरोहणम् । अभवन्मुनयस्तत्र पुण्यतीर्थकथाश्रवात् ।।२
गुरुणोक्तेन विधिना शङ्खतीर्थे महर्षयः । चक्रतीर्थे च स स्नात्वा तर्पयामास देवताः ।।३
पादप्रक्षालनादूर्ध्वं त्रिराचम्य शुचिस्तदा । आरुरोह वसिष्ठेन दक्षिणं शृङ्गसत्तमम् ।।४
आरोहां विविधं तीर्थं विविधा अगवल्लरीः । पश्यन् काञ्चन वै लेखामपश्यन्नृपतिस्तथा।।५
आमूलं शिखरं रम्यं स्फुरन्तीं दृष्टिगोचराम् । अवलोक्य तदा लेखां वसिष्ठमिदमब्रवीत्।।६

इन्द्रद्युम्नः -

हेमकोटिसरोजस्य नालामिव मनोहराम् । लेखां पश्यास्य शृङ्गस्य वनमालामिव प्रियाम्।।७

श्रीवसिष्ठः -

पुरा मानसकासारवासी कोऽपि मृणालवान् । हंसराजस्तु तुण्डेन नालां जग्राह चैकिकाम् ।।८
निगृह्य नालमेकं वै गरुडं पन्नगो यथा । वियत्पथं जगाहेऽथ रथपत्री स्वयंभुवः ।।९
श्वेतद्वीपे महाविष्णोर्नाभीकमलवासिनम् । उद्योदमात्मनो नाथं जगाम स मृणालवान् ।।१०
मध्ये व्योमपथे तुण्डाद्गलिता सा मृणालिका । पतिता घटिकाशैलशृङ्गपृष्ठे लता यदा ।।११
दुरनिष्पतनाद्धेतोः नृसिंहस्य च वैभवात् । दृढलग्ना भवन्नाला धृतहेमद्रुमैश्शुभा ।।१२
अथ हंसस्समुत्साद्य गृहीतुं न शशाक ह । नरसिंहमहात्मानमस्तौषीत् केवलं तदा ।।१३

हंसः -

देव देव जगन्नाथ कृपालो भक्तवत्सल ।
प्रसादं कुरु मे क्षिप्रं घटिकाचलनायक ।।१४
हेमकोटिपदाध्यक्ष हृदयानन्दकेशव ।
भगवन् भवरोगघ्न नमस्ते नृहरे हरे ।।१५
नामरूपात्मना विश्वं विभज्य परिपाल्यते ।
सृज्यते नीयते येन नमस्ते नृहरे हरे ।।१६

यस्याज्ञामवलम्ब्यैष वायुपुत्रश्चतुर्भुजः ।
शङ्खचक्रधरो ह्यास्ते नमस्ते नृहरे हरे ।।१७
प्रह्लादभक्तिवरद वामदेवादिमुक्तिद ।
सप्तर्षिप्रिय सर्वेश नमस्ते नृहरे हरे ।।१८
संसारवैरी दैत्यारिर्दंष्ट्री भीमपराक्रमः ।
आपातालनभोवासी नमस्ते नृहरे हरे ।।१९
सिद्ध्यन्ति सिद्धयो यस्मात्सर्वरूपात् सहस्त्रशः।
वेदाश्च भूतयस्सर्वाः नमस्ते नृहरे हरे।२०
विश्वस्येशानमपि यं मतीनां पुरुषर्षभः ।
संगिरन्ते घृणापूर्णा नमस्ते नृहरे हरे ।।२१

श्रीवसिष्ठः -

इति स्तुवति धर्मात्मन्नात्मयोनिं यथा तथा । स प्राह भगवानाह योगवान् नरकेसरी ।।२२

श्रीभगवानुवाच -

प्रसन्नस्ते पुरस्सोऽहं पत्रिराज महामते । वरं वरय भद्रं ते विना नालग्रहादरम् ।।२३
अन्यच्च नागशृङ्गस्थो मम पश्य मृणालवान्। दैत्यराजवसामालाकण्ठमाविष्करोति ह।।३४

हंसः -

स्वामिन्नियमनायासः कृता यदि मया सदा । अतः परं भयन्नाम भवते भवतात् कथम् ।।२५
त्वन्नाभिकमलस्थेन वरेण्यं पद्मयोनिना । धृतं भगवता साक्षात् भाग्यं मे किमतः परम्।।२६

भगवान् -

साधु हंस तव ब्रह्मा नित्यं प्रीतिकरो भवेत्। सर्वेषामपि वाहानां मुख्यस्त्वं प्रभविष्यसि ।।२७

वसिष्ठः -

इति प्रियंवदे देवे तिरोधानमुपेयुषि । हंसः परमहृष्टात्मा श्वेतद्वीपमविन्दत ।।२८
तदा प्रभृति नालोऽयं युगभेदेन भूपते । वर्णभेदं गतो भाति भूषा शिखरिणो यथा ।।२९
अयं नृप महाशैलो हेमनालाविभूषितः । दैत्यसिंहवसाभूषो नृसिंह इव लक्ष्यते ।।३०
ग्रथिमानं च नालस्य यस्तु पश्यति सानुनि। सुतसन्ततिदैर्घ्यञ्च आयुर्दैर्घ्यञ्च विन्दति ।।३१
कुरुते श्रद्धया विद्वान् यो हंसबलिमत्र वै । हंसमुद्दिश्य विधिवत् संतुष्टः पुरुषो भवेत् ।।३२
हंसश्शुचिषदित्येतत् त्रिरुच्चार्य महामनुम् । बलिं वितनुते यस्तु धूतमाप्मा स संभवेत् ।।३३

इन्द्रद्युम्नः -

श्लाघयंश्च गुरोर्वाक्यं हेमनालावलोककः । उक्तेन विधिना चक्रे बलिं सन्तुष्टमानसः ।।३४
हंसतीर्थावगाहेन पूतात्मा नृपपुङ्गवः । ततो दक्षिणपार्श्वस्थं हेमकोटिं ददर्श ह ।।३५
सिंहस्कन्धैश्च संवाह्यां प्रत्यङ्कणमृदि त्वराम्। अनेकर्षिषिसंसेव्यां परमां प्रणवात्मिकाम्।।३६
परां कोटिं गाहमानां शृङ्गकोटिविराजिताम् । भूतप्रेतपिशाचादिब्रह्मराक्षसरक्षसाम् ।।३७
दुरापां दुष्टसंघैश्च दुर्धर्षां दुरवग्रहाम् । दिक्पालगणसंवीतां ब्रह्मशङ्करवन्दिताम् ।।३८
वेदवाह्यां च सूर्यस्य शकटां मणिकूबराम् । वैखानसार्चितां नित्यां अप्सरोगणसेविताम् ।।३९
नृसिंहमणिपेटीं तां हेमकोटिमुदीक्ष्य वै । इन्द्रद्युम्नो महाभागो मुमुदे सपरिच्छदः ।।४०
ततः प्राङ्मुखमासीनं हेमकोटिपदं गतम् । योगारूढं नरहरिं दृष्ट्वा नत्वा मुहुर्मुहुः ।
रोमाञ्चिताशेषवपुः स्तोत्रयामास भूपतिः ।।४१

यद्द्वाराधिप चाटुका न सरणिः प्रार्थ्या विरिञ्चादिभि-
श्चिन्वन्ति श्रुतयोऽप्यलब्धविषयाश्चिद्रूपमद्यापि यम् ।
स त्वं लोचनगोचरो भवसि यत् तत्काकतालीयक-
न्यायोदाहरणैकका नरहरे लक्ष्मीपते ते वयम् ।।४२
लक्ष्मीमहीकरसरोजसुधावमर्दलीलावहौ नरहरे घटिकाद्रिनाथ ।
उल्लासिनौ चरणपल्लवतल्लजौ ते संलालितौ समवलोक्य भवाम धन्याः।४३
योऽनन्तरूपोऽखिलविश्वमेतत् बिभर्ति सत्वं नृहरे रमेश ।
त्वमक्षरं तं सवितुर्वरेण्यं यतः प्रसूतिः प्रसृता पुराणी ।।४४
शास्ता जनानां च तथा नियन्ता तथा विसृष्टा भगवन् महात्मा ।
त्रिमूर्तिरूपोऽसि गुणत्रयीकः त्वमेक एवात्र परं नृसिंह ।।४५
अस्मादृशो भूमितले नृकेसरिन् पदं परं त्वामवमत्य दुर्मतिः ।
वृतो जगत्स्यन्दनसिन्धुजन्मभिस्सुधर्मताधामगतो नृपाधमाः ।।४६
विभ्रान्तचित्ता भवदेकमायया वरासनस्था वयमित्यशङ्कया ।
निगर्वभाजो निवसन्त्यहंकृतः स्वल्पक्षयासङ्गतयो नराः पदे ।।४७
त्वयि स्थिते दातरि मानवाद्यहं वरेण्यतात्वेन हरौ सदा हरौ ।
दातृभ्रमादन्यमुपासते जनाः प्रमूढचित्ताः प्रमदानुसङ्गिनः ।।४८
भक्तिं च मुक्तिं भवदङ्घ्रिसेविनां ददासि विष्णो नृहरे त्वमेव हि ।

नतेतराणामविवेकशालिनां वृथा शुकानामिव निष्फलद्रुमः ।।४९
स्वतन्त्रभावेन सनातनो भवान् विमुक्तये सर्वनृणां प्रकल्प्यते ।
उतामृतेति श्रुतिराह तत्र वै प्रमाणमव्याजघृणा च हि प्रभो ।।५०
महानुभावो भगवान् नृसिंहलोकत्रयेऽप्यप्रतिमप्रभाव ।
प्रह्लादसे पादसरोजभाजो प्रह्लादनाह्लादकरस्त्वमेव ।।५१
परात्परं वस्तु पुमान् पुराणस्त्वं कारणं कारणकारणं गुरुः ।
सतां गतिस्त्वं नरसिंहपच्छो व्याकुर्वते नान्य इति श्रुतिश्च ।।५२
अनिन्द्यमेकं परमं महान्तमादित्यवर्णं तमसः परस्तात् ।
त्वामेव विद्वानमृतत्वमेति दुरापमन्यामरसंगिलोकैः ।। ५३
सत्यञ्च दिव्यामितधारितं हरे ब्रह्माणमेवार्यमणं तथाविधम् ।
दूर्वादळश्यामलपीतवाससं तथा नृसिंह प्रियशङ्कराचितम् ।। ५४
किरीटिनं हेमविमानमध्यगं जानुद्वयन्यस्तकराम्बुजद्वयम् ।
गृहीतशङ्खारिभुजंसुदंष्ट्रिणं नृसिंहरूपं भगवन्तमाश्रये ।। ५५
श्रीवत्सचिह्नं जयशालिनन्दकं श्रियानुषक्तं गळशोभिकौस्तुभम् ।
कौमोदकीलक्षणमाश्रये सदा गळादधो मर्त्यवपुर्धरं हरिम् ।। ५६
त्वद्योगनिद्रा जगतां प्रबोधिनी शिवा सती शुंभविशुम्भरोधिनी ।
सरस्वती श्रीरीति नामभिस्सदा प्रकीर्त्यते श्रीनृहरे त्वदाज्ञया ।। ५७
त्वं वै हिरण्याक्षमुखामरद्रुहां हन्ता गळादूर्ध्वमृगेन्द्ररूपः ।
रौद्राकृतिस्ते भगवन् सतानां सौम्या किमीदृग्विधया प्रवेशिता ।। ५८
नमस्ते परस्मै नमो विश्वकर्त्रे नमो विश्वगोप्त्रे नमो विश्वनेत्रे ।
नमो भक्तिदात्रे नमो दुष्टशास्त्रे नमो वेदवेत्रे नमो वेदप्रोक्ते ।।५९
नमस्ते नृसिंहाय विश्वप्रियाय नमस्ते हेमकोटिविमानानुगाय ।
नमो नीलवेद्याचलश्यामलाय नमस्ते नमस्ते नमस्ते नमस्ते ।। ६०

ब्रह्मोवाच -

इति स्तुतो जगदभिरामविग्रहः श्रियान्वितो नरहरिरादियोगिनम् ।
सुधामयीं गिरमवदत्सुखोदयां तथा नदन् स्मितवदनाम्बुजो हरिः ।। ६१

श्रीभगवानुवाच -

भक्तिं परां कोटिमयादयं मे वसिष्ठ तस्माद्ब्राह्म्यमुपैतु राजा ।
इन्द्रद्युम्नो विष्णुभक्तो जगत्यां प्रायश्श्रोता सत्यवादी जितारिः ।। ६२
जन्मारभ्य व्याकरोद्विष्णुविद्यां नित्यैषा वै यातिगाथा जगन्ति ।
पूतात्मानो योगिनो भक्तिमन्तः पुण्यश्लोकाः कुम्भयोन्यादयोऽन्ये ।। ६३
सन्त्यैतेषामग्रयायी ऋषीणामिन्द्रद्युम्नो यातु ब्राह्म्यं महीपः । ६४

श्रीवसिष्ठः -

स्वामिननन्यसुलभां नरसिंहभक्तिमस्मै वितीर्य परिपालयसि प्रजानाम् ।
तैनैव संप्रति ददासि परञ्च तेजो ब्राह्म्यं च राजनि सुखादनवाप्यमेतत् ।। ६५
प्रसीद भक्तेषु परावरज्ञ त्रिलोकसाक्षी ननु भक्तरक्षिन् ।
कृपाम्बुवर्षेण निषिञ्च दीनान् भक्तोचितश्रीनृहरे यतस्त्वम् ।। ६६

ब्रह्मोवाच -

अथ नरहरिवीक्षया स राजा निरुपममेत्यददग्रजन्मतेजः ।
मिषति निजपुरोहिते वसिष्ठे परममविन्दत वैष्णवं च लोकम् ।। ६७
ब्रह्मर्षिभावं गमितो महात्मा राजाथ सालोक्यमवाप्य हृष्टः ।
सनन्दनादिस्तुतमर्चयन्वै प्रीणाति च श्रीनरसिंहरूपम् ।। ६८

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये एकविंशोऽध्यायः ।।

द्वाविंशोऽध्यायः

इत्थं चतुर्मुखाद्देवाद्बोधिताः प्राक्तनीः कथाः । श्राव्याश्चाकर्ण्य ऋषयो मुमुदुर्हृष्टचेतसः ।।१
विशिष्य घटिकाद्रेस्तु माहात्म्यश्रवणोत्सुकाः । पुनश्च ऋषयस्सर्वे ब्रह्माणमिदमूचिरे ।।२

ऋषयः -

घटिकाचलमाहात्म्यकथनैर्भवतोऽनघ । अपर्याप्तास्य माल्यानि आश्रयन्तां बहूनि वै ।।३
अहो करोति माहात्म्यं घटिकाद्रेर्महामते । जयावहमिदं ब्रह्मन् श्राव्यं लक्ष्मीकरं नृणाम् ।।४
पठतां श्रृण्वतां ब्रह्मन् माहात्म्यं लिखितामपि। अर्चतां पुस्तकं नृणां श्रीनृसिंहः प्रसीदति।।५
किं पितृणामुद्धरणं कृतवान्विप्रशेखरः । केन वा तपसा तस्य श्रीनृसिंहः प्रसादकृत् ।।६

ब्रह्मोवाच -

स्वयंभुवे कृते पादे त्रितये मुनिसत्तमाः । निजर्क्षे शुक्लपूर्णायां भार्गवे मासि माधवे ।।७
उत्तमायां तु सन्ध्यायां प्रातस्तन्यामहस्पृशि । प्रह्लादप्रीतये योगभावेन भगवान् हरिः ।।८
प्रकृत्या घटिकामेकां कुर्वतां तप उत्तमम् । वामदेवमुखर्षीणां मुक्तये च नृकेसरी ।।९
यतो हेमशिलापृष्टे हरिराविर्बभूव ह । घटिकातोषितस्तस्माद्घटिकाचलनामभाक् ।।१०
तत्र जज्ञे महाभागो विखना इति विश्रुतः । सदा संप्रीणयन् सर्वान् विष्णुभक्तिपरायणान् ।।११
खनसं घ्नन्तिरित्युक्त्वा नामैषां तु न विद्यते । ततो वैखानसा नाम ब्रह्मर्षय उदीरिताः ।।१२
वैखानसास्स्मृतास्तेऽपि वृत्तविद्योपजीविनः । स्वसूत्रोक्तेन विधिना हरिमाराधयन्ति वै ।।१३
भगवानपि विश्वात्मा नृहरिः प्रीणयन् सदा। वैखानसेभ्यस्स्त्वां पूजामनुगृह्णाति शाश्वतः।।१४

इति ब्रह्मकैवर्त्ते उत्तरखण्डे भृगुपराशरसंवादे घटिकाचलमाहात्म्ये द्वाविंशोऽध्यायः।।

फलश्रुतिः

यः पठतीदं चरितं श्रुणुयाद्वा भक्तितो लिखेत्तस्य
घटिकाद्रिनाथकृपया घटिकामाद्राद्भवन्ति दुर्घटाः कामाः ।।

।। शुभमस्तु ।।

கடிகாசலமாஹாத்ம்யம்

முன்னுரை

வியாசபகவான் அருளிய 18 புராணங்களில் ஒன்றான **பிரம்ம கைவர்த்தபுராணத்தின் உத்தரகாண்டத்தில்** கடிகாசல க்ஷேத்ரமகிமை கூறப்பட்டுள்ளது. பராசரமுனிவர் பிருகு முனிவருக்குக் கடிகாசல க்ஷேத்ரப் பெருமையை எடுத்துக் கூறும் பகுதி வடமொழியில் 22 அத்தியாயமாக உள்ளது. இதில் ஸ்ரீயோகநரசிம்மப்பெருமான் மற்றும் ஸ்ரீயோகஆஞ்சனேயரின் பெருமை, க்ஷேத்ரமகிமை, தீர்த்தப்பெருமை ஆகியவை அழகாகக் கூறப்பட்டுள்ளன.

பதினான்கு சிகரங்களையுடைய கடிகாசலமானது, கிருதயுகத்தில் பொன்மலையாகவும், கலியுகத்தில் கல்மலையாகவும் விளங்கும் பெருமையுடையது. கடிகாசலத்தின் மேற்குப் பக்கமலையில் ஏகசிலாபர்வதத்தின் உச்சியில் பொன்மயமான ஹேமகோடிவிமானத்தில் ஹிரண்யாக்ஷ சிக்ஷகராய் பிரஹல்லாத ரக்ஷகராய் ஸ்ரீமந்நாராயணன், பக்தர்களுக்கு அருள்பாலிக்கிறார்.

வஸிஷ்ட[2]: கஶ்யபஶ்சாத்ரி ஜாமத[3]க்ந்யஶ்ச கௌ[3]தம:
ப[4]ரத்வாஜோபி த[4]ர்மாத்மா தபஸ்யதி ஷிலோச்சயே
ய: ஸவித்ரைவநுஜ்ஞப்த: ப்ராஹ்ம்யமிச்ச[2]ந் மஹாதபா:
விஶ்வாமித்ரஸ்து ஹநுமத்[3] ஶைலராஜமுபேஷ்யதி

வசிஷ்டர், கச்யபர், அத்ரி, ஜமதக்னி, கௌதமர், பரத்வாஜர், முதலியவர்கள் கடிகைமலையில் தவம் செய்கின்றனர். சூரியனுடைய உபதேசத்தால் **விசுவாமித்திரர்** பிரம்மதேஜஸ்ஸை விரும்பி தவம் புரிய அனுமத் பர்வதத்தை அடையப்போகிறார். (ஏழுமுனிவர்களும் கடிகைமலையில் ஸ்ரீயோகநரசிம்மன் அருள் பெற்றவர்கள்.)

ஸ்ரீஅம்ருதபலவல்லி ஸமேத ஸ்ரீயோகநரசிம்மப்பெருமான், ஏழு ரிஷிகளுக்கும் கடிகைப் பொழுதில் மோக்ஷம் தந்தருளிய காரணத்தால் அம்மலை கடிகாசலம் எனப்படும்.

ஸ்ரீயோகநரசிம்மப்பெருமான் பக்தர்களுக்கு அருளியது

அஹம் ஹனுமத: ஶைலம் ப்ரஹ்லாதேன ப்ரசோதி3த: ।
தத்ர ப4க்தபராதீ4ன: ஹேமகோடிவிமானக3: ॥
ப்ராதுர்பூ4தஸ்து தத்ராஹம் ப்ரத3தா3மி சுபம் ந்ருணாம் ।
பி3ம்போ3 மே ஸர்வதா3 தத்ர ஹேமகோட்யாம் விராஜதே ॥
ஶாந்நித்4யம் கர்துகாமோ அஹம் ஹேமகோடி பதே3 ஸ்திர: ।
ப்ரீணயிஷ்யாமி ஸததம் ப்3ரம்மர்ஷீன் பா4விதாத்மன: ॥

நான் பிரஹ்லாதன் வேண்ட சாந்தவடிமுடைய யோக நரசிங்கனாய் ஸகலரிஷிசேவிதனாய், யோகபாவத்தைப் பூண்டு பக்தபராதீனனாகி, அனுமத்சைலத்தில் ஹேமகோடி விமானத்தில் கண்காண வந்து தோன்றி பக்தர்களுக்கு சுபத்தைக் கொடுத்துக் கொண்டிருக்கிறேன். ஹேமகோடி விமானத்தில் எவ்வாறு என்னுடைய பிம்பம் பொருந்தி விளங்குகிதோ, அவ்வாறு நானும் அங்கு ஸாந்நித்யம் பொருந்தியிருக்கிறேன். ஆத்மஞானம் பெற்ற முனிவர்களை எப்போதும் மகிழ்ச்சி அடையச் செய்கிறேன்.

ஸ்ரீஅம்ருதபலவல்லித்தாயார், ஸ்ரீயோகநரசிம்மர், ஸ்ரீயோகாஞ்சனேயர் எழுந்தருளியிருக்கும் திருக்கடிகை மலையை, **மஹாப்ரதக்ஷிணம், ஆந்தரப்ரதக்ஷிணம்** என்கிற இருவகையான பிரதக்ஷிணம் செய்வதால் அளவற்ற நன்மைகள் உண்டாகும்.

பிரம்மதீர்த்தத்தில் நீராடி அக்னி தீர்த்தம், சோமகுண்டம், பத்மசரோவரம், வால்மீகதீர்த்தம், வஜ்ரதீர்த்தம், முதலியவற்றிலும் நீராடி மலையை வலம் வருதல் **மஹாப்ரதக்ஷிணம்** ஆகும்.

பிரம்மதீர்த்தத்தில் நீராடி, பைரவதீர்த்தம், ஹலாவர்த்ததீர்த்தம், வராஹதீர்த்தம், புண்டரீகதீர்த்தம், கருடதீர்த்தம், பாபவிநாசனதீர்த்தம், அம்ருதகுண்டதீர்த்தம், வாமனதீர்த்தம், ரத்னதீர்த்தம், வசிஷ்டதீர்த்தம், என்னும் தீர்த்தங்களிலும் லக்ஷ்மீ தீர்த்தத்திலும் நீராடி கடிகைமலையை ப்ரதக்ஷிணம் செய்தல் **ஆந்தரப்ரதக்ஷிணம்** (உள்ப்ரதக்ஷிணம்) எனப்படும்.

கடிகாசலமாஹாத்ம்யம்
(கதைச்சுருக்கம்)

பிரம்மன் கூறிய திருவேங்கடமலையின் பெருமையைக் கேட்டு மிக்க மகிழ்ச்சி அடைந்த ஸனகர் முதலிய ப்ரம்மரிஷிகள் நான்முகனைத் தொழுது வணங்கி பிரமனே! நீர் திருவேங்கடமலையின் பெருமையைக் கூறிவரும்போது கடிகாசலம் பற்றியும், இந்த்ரத்யும்னனைப் பற்றியும் குறிப்பிட்டீர். கடிகாசலம் என்பது எங்கு உள்ளது? அதன் பெருமை யாது? இந்த்ரத்யும்னன் என்பவன் யார்? அவன் எவ்வாறு பிரம்மத்தன்மை பெற்றான்? எங்கு யாரைக் குறித்து உபாசனை செய்து பிரம்மத்தன்மை அடைந்தான்? இவற்றைப் பற்றி எங்களுக்கு விளக்கமாகக் கூறவேண்டும் என்று வேண்டினர். பிரமனும், கடிகாசலத்தின் பெருமை பற்றியும், இந்த்ரத்யும்னன் வரலாற்றையும் ஸனகர் முதலிய ப்ரம்மரிஷிகளுக்கு எடுத்துரைக்கலானார்.

கலியுகத்தின் தொடக்கத்தில் பேய், பிசாசு முதலியவற்றால் மக்கள் மிகவும் துன்பம் அடைந்தனர். அவர்களிடம் இரக்கப்பட்ட பிரமன் கடிகாசலத்தில் ப்ரம்மதீர்த்தக் கரையிலிருந்து ஸ்ரீஅம்ருதபலவல்லி ஸமேத ஸ்ரீயோகநரசிம்மரைக் குறித்துத் தவம் புரிந்தார். பகவானும் பிரசன்னமாகிப் பிரமன் வேண்டுவது யாதெனக் கேட்டார். "பரந்தாமனே! ப்ரம்மபட்டம் விரும்பித் தவம் செய்யும் ஹனுமனைத் தடுத்து, பேய், பிசாசு பயமின்றி நோய்நொடியின்றி இன்பமாக மக்கள் வாழ அருளவேண்டும். இதுவே என் பிரார்த்தனை" என்று ப்ரம்மன் கூறினார். ஸ்ரீயோகநரசிங்கப்பெருமான் பிரமனுக்குப் படைப்புத்தொழிலை யாதொரு இடையூறுமின்றிச் செய்யுமாறு பணித்து, வாயு குமாரனான ஹனுமனுக்குத் தமது சங்கு, சக்கரங்களை அருளி, தன் எதிரே சிறிய மலையில் நித்யவாசம் செய்து, தன்னை நாடி வரும் பக்தர்களின் விருப்பங்களை நிறைவேற்றுமாறும் கட்டளையிட்டார்.

அதுமுதல் கடிகாசலத்திற்கு வரும் பக்தர்கள் பேய், பிசாசு துன்பம் நீங்கி வேண்டியதெல்லாம் ஸ்ரீயோகஹனுமன்பால் அருள்பெற்றுச் சுகமாக வாழ்கின்றனர். ஸ்ரீயோகநரசிம்மப்பெருமானைத் துதிப்பவர், ஸ்ரீயோகஹனுமனை ஆராதிப்பவர் மற்றும் கடிகாசலத்தில் சேவை செய்பவர் அனைவரும் எல்லாச் செல்வங்களும் பெற்று இன்பமாக வாழ்வர்.

இந்த்ரத்யும்னன் வரலாறு

திரேதாயுகத்தில் வடமதுரையைத் தலைநகராகக் கொண்டு பாரத தேசத்தை இந்த்ரத்யும்னன் என்ற அரசன் ஆண்டு வந்தான். இந்த்ரத்யும்னன் வைஷ்ணவஸ்ரீயுடன், பரந்தாமனின் சங்கசக்ராதி அடையாளங்களுடன் பிறந்தான். பரமவைஷ்ணவனான இந்த்ரத்யும்னன் நீதி நெறி தவறாமல் செங்கோல் செலுத்தி ஆட்சி செய்து வந்தான். அவன் மகாலக்ஷ்மியைப் போன்ற அழகுடைய பண்பு வாய்த்த ஒரு மங்கையை மணந்தான். அவனைப் போன்றே அவன் மனைவியும் பரமவிஷ்ணு பக்தையாகத் திகழ்ந்தாள். உரிய காலத்தில் அவர்களுக்கு ஒருமகன் பிறந்தான். இவ்வாறு வைஷ்ணவபக்தியுடன் வாழும் மன்னன் எப்போதும் ஹரிநாமத்தையே ஓதுபவனாய் மற்றும் பிறதெய்வங்களை நினையாதவனாய் வாழ்ந்துவந்தான்.

ஒரு நாள் இந்த்ரத்யும்னன், தன்குல ஒழுக்கப்படித் தன் பரிவாரங்கள் பின்வர வாயுஜங்கம் என்ற குதிரை மீதேறிக் காட்டிற்கு வேட்டையாடப் புறப்பட்டான். ஓரழகிய மானைக் கண்டு அதனை வேட்டையாட விரும்பி அதனைப் பின்தொடர முடியாது போயிற்று. அம்மானும் அவன் கையிலகப்படாமல் தன் மான்கூட்டத்தில் சென்று சேர்ந்து கொண்டது. வில்லும் அம்புமும் ஏந்தி அரசன் நிற்பதைக் கண்டு அஞ்சிய அம்மானினம் மேய்ந்த புல்லும் கடைவாய் வழிசோர மருண்டு மிரட்சியுடன் நின்றது.

திடீரென ஒருமான் மனிதக் குரலில் அரசனை நோக்கி 'ஸ்ரீஜெகந்நாதனிடத்தில் நீ மெய்யான பக்தி செய்யவில்லை. வைஷ்ணவன் என்பான் எவ்வுயிர்க்கும் எத்தீங்கும் செய்யாதவன் அல்லவா! எங்களைக் கொல்லவேண்டாம். எங்களால் யாருக்கும் எத்தீங்கும் வராது' என்று கூறியது. வைஷ்ணவன் என்ற பெயரில், தான் செய்யமுற்பட்டதை எண்ணி வருந்தி, அப்போதே ரஜோகுணத்தை விட்டு எல்லோருக்கும் நன்மை பயக்கும் சத்வகுணத்தை மேற்கொண்டு, வில்லையும், அம்பையும் துறந்தான்.

இந்த்ரத்யும்னன் தலைநகருக்குத் திரும்பி மகனிடம் ஆட்சிப் பொறுப்பை ஒப்படைத்துவிட்டுத் தன் மனைவியுடன் ஸ்ரீஜகந்நாதக்ஷேத்ரத்திற்குச் சென்றான். பின்பு ஹரித்வாரம் சென்று

ஸ்ரீஹரியை இடைவிடாது சிந்திப்பவனாய், எப்போதும் ஹரிநாமோச்சாரணம் செய்பவனாய் வேறொன்றையும் சிந்தனை செய்யாது கடுந்தவம் புரிந்துவந்தான்.

ஓரிரவில் இந்த்ரத்யும்னன், தன் கனவில் ஹரி என்று கூற எண்ணியவன் ஹர என்ற நாமோச்சாரணம் செய்து விட்டான். நொடிப்பொழுதில் கயிலைமலையில் சிவகிங்கரர்கள் சூழ சிவபிரான் முன்னே தான் நிற்பதைக் கண்டு வியப்படைந்தான்.

சிவபிரானும் சிவநாமஸ்மரணத்தால் தன்னிடம் வந்ததாகக் கூறி இந்த்ரத்யும்னனை அன்புடன் வரவேற்றார். ஹரி நாமோச்சாரணமே செய்யும் விஷ்ணுபக்தனான யான் கயிலைக்கு எவ்வாறு வரமுடியும் எனச் சிவபெருமானிடம் இந்த்ரத்யும்னன் கேட்டான்.

சிவபிரானும் 'நாராயணன் வேறு; தான்வேறு அல்ல' என்று கூறி 'வேண்டும் வரத்தைக் கேள்' என்று கூறினார். இந்த்ரத்யும்னனும், 'இறைவனே! மனைவி மக்கள் ராஜ்யம் போன்ற எல்லா இன்பங்களையும் அனுபவித்து விட்டேன். என் மனம் எப்போதும் ஸ்ரீமந்நாராயணனின் மோட்ச இன்பத்தை அடைய விரும்புகிறது. தாங்கள் எனக்கு மோக்ஷப் பேறு அளிக்கவேண்டும்' என்று வேண்டினான்.

'ஸ்ரீமந்நாராயணன் ஒருவனே மோக்ஷம் அளிக்கவல்லவன், பிரம்மதேஜஸ் பெற்றவர் மோக்ஷானந்தம் பெறலாம்' என்று சிவன் கூறினார். பிரம்மதேஜஸ் பெற்று மோக்ஷானந்தம் பெறத் தனக்கு வழி காட்டுமாறு சிவபெருமானிடம் அரசன் வேண்டினான்.

'இந்த்ரத்யும்னனே! சப்த ரிஷிகளும், இந்திரன் முதலிய தேவர்களும் ஸ்ரீகிருஷ்ணத்வைபாயனர் போன்ற ரிஷிகளும், எண்ணற்ற தவசிகளும் புண்ணியவான்களும் எப்போதும் துதிக்கும் ஸ்ரீமந்நாராயணன் பிரஹ்லாதனுக்கு அருள் புரிந்து எல்லோருக்கும் மகிழ்ச்சி தருபவனாய் 'ஸ்ரீநரசிம்மபுரம்' என்ற இடத்தில் **மஹாலட்சுமி**யுடன் கடிகைமலையில் ஸ்ரீயோகநரசிம்மமூர்த்தியாய் வீற்றிருக்கிறார். பௌராணிகர் 'கடிகைமலைப் பகுதியைக் கடிகாசலம் என்றழைக்கின்றனர். அதன் அடித்தாழ்வரையில் ரிஷிகள், முனிவர்கள் தவம் செய்கின்றனர். புனித தீர்த்தங்கள் நிறைந்த கடிகாசலத்தில்

என்மனமும் ஆர்வத்துடன் ஈடுபட்டுள்ளது. பிரம்மதேஜசும் மோக்ஷபதவியும் அடைய விரும்பினால் கடிகாசலத்தில் தவம் செய்வாயாக' எனப் பரமசிவன் பணித்தார்.

இந்த்ரத்யும்னன் வாலகில்யர் சந்திப்பு :

கனவிலிருந்து விழித்தெழுந்த இந்த்ரத்யும்னன் நிகழ்ந்ததை எண்ணி வியப்படைந்தான். தன் மனைவியிடம் நடந்ததைக் கூறி, சிறிதும் தாமதியாது அவளுடன் கடிகாசலம் நோக்கிப் புறப்பட்டான்.

இந்த்ரத்யும்னன் இமயமலைப் பகுதியிலிருந்து தெற்கு நோக்கிச் செல்லும் போது தெற்குத்திசையிலிருந்து மகிழ்ச்சியுடன் வான் வழியாக செல்லும் வாலகில்யர் என்னும் முனிவர்களைக் கண்டு வணங்கினான். அவர்களின் ஆனந்தத்திற்கான காரணம் அறிய விரும்பினான். வாலகில்ய முனிவர்களும் கடிகாசலத்தில் ஸ்ரீயோகநரசிங்கனைத் தொழுது வருவதாகக் கூறவும், இந்த்ரத்யும்னன் கடிகாசலம் செல்லும் வழிபற்றிக் கேட்டான்.

வாலகில்யமுனிவர்கள், ''இமாலயத்திற்குத் தெற்கே ௯௦௦ யோஜனை தூரத்தில் வேகவதி பயோஷ்ணி (பாலாறு) என்றெல்லாம் அழைக்கப்படும் புனிதமான ஆற்றின் தென்மேற்குத் திசையில் கடிகாசலம் விளங்குகிறது. அம்மலையுச்சியில் பொன்மயமான ஹேமகோடிவிமானத்தில் ஸ்ரீயோகநரசிங்கன் சப்தரிஷிகளுக்கும் பிரஹ்லாதனுக்கும் அருள்புரிந்து வீற்றிருக்கிறார். முமுக்ஷுக்களும், பெரியோர்களும் அவன் புகழ் பாடுகின்றனர். ஹனுமத்தீர்த்தத்தில் நீராடி மாலைப் பொழுதில் ஸ்ரீயோகந்ருசிம்ஹனை வணங்கி வழிபட்ட ஆனந்தத்தால் நாங்கள் இமயம் திரும்புகிறோம். கங்கையாற்றைக் கடந்து, ஸ்ரீசைலமலை, வேங்கடாசலம், சுவர்ணமுகி போன்றவற்றைக் கடந்து கடிகாசலம் சென்றடையலாம்'' என்று கூறி வடதிசை நோக்கிச் சென்றனர்.

இந்த்ரத்யும்னன் தன் மனைவியுடன் வாலகில்ய முனிவர்களின் ஆசியுடன் கங்கையாற்றைக் கடந்து, ஸ்ரீசைலமலையைச் சென்றடைந்தான். மலையின் மேற்குவழியாகக் கீழிறங்கி ஜ்வாலா நரசிம்மனை வணங்கி, அங்கிருந்து திருவேங்கடம் சென்று, அங்குள்ள கபிலதீர்த்தத்தில் நீராடி, திருவேங்கடமலையில் ஸ்வாமி புஷ்கரிணியில்

நீராடி, பிரமனும், சிவனும், இந்திரனும் போற்றும் பரமனான திருவேங்கடத்தெம்பெருமானின் சேவையில் மூன்று நாட்கள் ஈடுபட்டு வழிபட்டான்.

திருவேங்கடமலையினின்று சுவர்ணமுகரி ஆற்றினை அடைந்தான். அங்கு ஒரு பெரிய ஆலமரத்தையும் அதன் கிளையைப் பற்றியவாறு இரண்டு அசுரர்கள் தொங்குவதையும் கண்டு பரிவுடன் நின்றான். அவர்களும் பரமவைஷ்ணவனான இந்த்ரத்யும்னனைக் கண்டனர். அவ்வளவில் அவ்விருவருள் ஒருவன் மட்டும் அசுரவடிவம் நீங்கி ஒளிவடிவில் வைஷ்ணவகோலத்துடன் வானில் மறையக்கண்ட மன்னன் இந்த்ரத்யும்னன் வியப்புற்று நின்றான்.

அப்போது வானில் ஒரு குரல் ஒலித்தது 'ஸ்ரீயோகநரசிங்கப் பிரானின் மகிமையே மகிமை! ஸ்ரீயோகநரசிம்ம தீர்த்தத்தின் ஒருதுளி பட்டதால் அசுரன் தன் பொல்லாவடிவு நீங்கி மோக்ஷலோகம் சென்று சேர்ந்தான்' என்று கூறியது. அதனை விளக்கமாக அறிய விரும்பிய இந்த்ரத்யும்னனுக்கு அருகிலிருந்த தெய்வநங்கையர் சிலர், தாங்கள் கடிகாசலம் சென்று சிலாபுஷ்கரிணியில் நீராடி ஸ்ரீயோகநரசிங்கனை வணங்கி வரும்போது தங்களில் ஒருத்தியாகிய ஊர்வசியின் கூந்தலிலிருந்த நீர்த்துளி அவ்வசுரன் மேல் பட்டதால் சாபம் நீங்கி மோட்சம் பெற்றான் என்று கூறினர்.

சோமவ்ரதன், அனுவ்ரதன், சுவ்ரதன் கதை

தெய்வநங்கையர் மோட்சம் பெற்ற அவ்வசுரனைப் பற்றி இந்த்ரத்யும்னனுக்குப் பின்வருமாறு கூறினர். ''தீர்த்தாசலம் என்ற இடத்தில் சோமவிரதன் என்பவன் தன் மனைவி அனசூயையுடன் மகப்பேறு வேண்டி புஷ்கரக்ஷேத்ரம் சென்று சிலகாலம் தவம் புரியலானான். ஒரு நாள் சோமவ்ரதன் தவம் மேற்கொண்ட மாலை நேரத்தில் பாறையொன்றில் அரக்கன் ஒருவன் தன் மனைவியுடன் காமசுகம் அடைவதைக் கண்டான். பிறகு தமோகுணச்சேர்க்கைக் காரணமாக சோமவ்ரதனுக்கு அரக்கவடிவில் அனுவ்ரதன், சுவ்ரதன் என்ற இரட்டைப் பிள்ளைகள் பிறந்தனர். சிலகாலத்தில் அரக்கவடிவில் பிறந்த அனுவ்ரதன், சுவ்ரதன் என்ற அந்த இரட்டையர்கள் பெற்றோரை விட்டு அலைந்து திரிந்தனர். அவ்விருவரும் இந்த ஆலமரத்தைப் பற்றி வாழ்கின்றனர். அவ்விருவரில் சுவிரதன் என்பவன் மட்டும் சாபம் நீங்கி

விஷ்ணுலோகம் சென்றான். அனுவிரதன் சாபம் நீங்காமையால் அரக்கனாகவே இருக்கிறான் என்று கூறினார். மேலும் தெய்வநங்கையர் அரக்கர் வரலாற்றினைக் கூறத் தொடங்கினர்.

'பாரியாத்ரமலையில் அனுவ்ரதனும் சுவ்ரதனும் முற்பிறப்பில் வேடர்களாய் வாழ்ந்தனர். அறிவுக் கூர்மையுடன் வேட்டையாடுவதில் வல்லவரான அவ்விருவரும் இணைந்தே வேட்டையாடுவர். ஒருநாள் காட்டில் அலைந்து திரியும் முனிவர் ஒருவரைக் கண்டு அனுதாபப்பட்டு, அவருக்காக ஒரு குடிசை அமைத்துத் தந்தனர். முனிவரது ஒழுக்கத்தைத் தாமும் பின்பற்றி, முனிவர் உண்பதற்கு பழம், கிழங்கு முதலியவைகளைக் தந்து பணிவிடை செய்தனர். ஒரு நாள் அனுவ்ரதனும் சுவ்ரதனும் நற்கதி அடைய தமக்கு மந்திரோபதேசம் செய்யுமாறு முனிவரைப் பணிந்து வேண்டினர். அவர்கள் பணிவிடையில் மகிழ்ந்த அம்முனிவரும் 'நான் மானே' என பொருளுடைய 'மிருக ஏவாஹம்' என்று உபதேசம் செய்தார். 'மிருக ஏவாஹம்' என்ற வார்த்தைக்குப் பொருள் தெரியாத அனுவ்ரதனும் சுவ்ரதனும், முனிவர் கூறியதை நம்பிக்கையுடனும் சிரத்தையுடனும் ஜபம் செய்ததால், மந்திரப் பொருளுக்கேற்ப அனுவ்ரதனும் சுவ்ரதனும் மானுருவம் பெற்று, காட்டில் அலைந்து திரிந்தனர். ஒரு நாள் தமக்கு மந்திர உபதேசம் செய்த முனிவரைக் கண்டு பக்தியுடன் வணங்கினர். அவர்களுடைய பக்தி சிரத்தை கண்டு வியந்த முனிவர், தன் கமண்டலநீரை அனுவ்ரதன் சுவிரதன் மீது தெளித்துக் காதில் வாசுதேவமந்திரத்தை உபதேசம் செய்தான். கடிகாசலம் சென்று ஏகசிலாமலைத் தாழ்வரையில் விளங்கும் ஹனுமத்தீர்த்தத்தில் நீராடி மனிதவடிவம் பெறுமாறு உபதேசம் செய்தார்.

